# तत्त्वचिन्तामणेस्तर्कप्रकरणे प्रसिद्धटीकानां समीक्षणम्

यादवपुरविश्वविद्यालयस्थे संस्कृतसंकाये विद्यावारिधिः (पि-एइच्.डि.)
इत्युपाध्यधिगमनिमित्तकः शोधप्रबन्धः


**गवेषकः**

**सुव्रत-गायेनः**

यादवपुरविश्वविद्यालयस्थसुरवाग्विभागीयः

**मार्गदर्शकाः**

**प्राध्यापकाः ड. तपनशङ्कर-भट्टाचार्य्याः**

यादवपुरविश्वविद्यालयस्थसुरवाग्विभागीयाः



**संस्कृतविभागः**

**यादवपुरविश्वविद्यालयः**

**यादवपुरम्, कलिकाता, ७०००३२**

२०२३

# Tattvacintāmaṇestarkaprakaraṇe Prasiddhaṭīkānāṃ Samīkṣaṇam

Thesis Submitted to the Department of Sanskrit, Jadavpur University for the Degree of Doctor of Philosophy


**<u>Submitted by:</u>**

**Subrata Gayen**
Department of Sanskrit
Jadavpur University

**<u>Supervisor:</u>**

**Professor Dr. Tapan Sankar Bhattacharyya**
Department of Sanskrit
Jadavpur University



**Department of Sanskrit**
**Jadavpur University**
**Jadavpur, Kolkata, 700032**
**2023**

## <u>Certified that the thesis entitled</u>

**'तत्त्वचिन्तामणेस्तर्कप्रकरणे प्रसिद्धटीकानां समीक्षणम्'** submitted by me, for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my own work carried out under the Supervision of **Professor Dr. Tapan Sankar Bhattacharyya, Professor, Department of Sanskrit, Jadavpur University,** and that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere/ elsewhere.

……………………………………..

Countersigned by
The Supervisor:
**Prof. Tapan Sankar Bhattacharyya**

…..……………………….

Candidate:
**Subrata Gayen**

# कार्तज्ञ्यार्पणम्

अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम्।

पृथुमित्थमथाणुरस्तु वा न विशेषे विदुषामिह ग्रहः।।

इति श्रीहर्षभणितिं स्मारं स्मारं कृतज्ञो ननु दुर्लभ इति च विद्वदुपज्ञं वचनं ध्यायं ध्यायं कार्तज्ञ्यज्ञापनमत्यावश्यकमिति तद्विज्ञापने रतिर्मे। तथा हि येषां परमकृपालूनां कृपालवं विना अस्याधमस्य भृङ्गायमानं भ्रमच्चेतः परमेशपदरजःस्पर्शाभावात् सर्वतः निराश्रय एव, तेषां त्यागमूर्त्तीनां जगदनुजिघृक्षया परमेशावतारस्वरूपाणां श्रीमत्स्वामि-गौतमानन्दमहाराजपादानां चरणशतदलयोः सर्वादौ सहस्रशः भक्तिपूतप्रणामप्रसूनाञ्जलिः समर्प्यते। ये हि त्यक्तसर्वैषणा अपि शिष्यवत्सलाः बाल्यात्प्रभृत्यशनवसनादिप्रदानपूर्वकं संस्कृतशास्त्राण्यध्यापितवन्तस्तेभ्यः अध्यापितानेकशिष्येभ्यः अध्यापनकुशलैः शिष्यैः समुद्भासितयशस्केभ्यस्तपोमूर्तिभ्यः सदैवेश्वरनिष्ठेभ्यः करुणावरुणालयेभ्य आनन्दघन-मूर्तिभ्यस्तत्तत्त्वविद्भ्यः स्वामितत्त्वविदानन्दपादेभ्यस्तच्चरणकमलचञ्चरीकोऽहं तत्प्रत्युप-क्रियाम् अन्यथा विधातुमक्षमः सश्रद्धं साष्टाङ्गं प्रणतिततिं समर्प्य भूयो भूयः हार्दां श्रद्धां विज्ञापयामि।

अथ च, येषां ज्ञानेन निर्देशनेन प्रवचनेनाध्यापनेन विषयनिर्वचनेनैतादृश-नव्यन्यायनिगूढतत्त्वग्रथितग्रन्थग्रन्थिविमोचने तथा तत्तन्मतसमीक्षणरूपगवेषणे साफल्य-मवापं तेषां शब्दशास्त्रपारावारपारङ्गतानां न्यायनदीष्णानां मीमांसादिदर्शनशास्त्रनिपुणानां काव्यकलाकोषादिनिगमपारावारपारङ्गतानां सरलहृदयानामार्याणां प्राध्यापकवर्याणां ड.तपनशङ्कर-भट्टाचार्य्य-महाभागानां चरणारविन्दयोर्मुहुर्मुहुः प्रणतिततिं निवेद्य कार्तज्ञ्यं ज्ञापयामि।

शब्दशास्त्राम्बुधिपारदृश्वनां साहित्यसुधासुहितमानसानां तर्कादिशास्त्रसार्वभौमानां पश्चिमवङ्गराज्यविश्वविद्यालयस्य अध्यापकवर्याणाम् अयनभट्टाचार्याणां तथा व्याकरण-

साहित्यन्यायदर्शनवेदान्ताद्यनेकविधविद्यामर्मज्ञानां शेखसाबिर-आलिमहोदयानां तथान्येषां प्रणम्यानां व्याख्यानपाटवपटहबधिरीकृतवादिवृन्दानां व्याकरणमीमांसान्यायादिशास्त्रेष्व-कुण्ठितमतिवैभवानाम् आचार्याणां स्वर्गतसत्यव्रतपाहाडि-श्रीरामकृष्णभट्ट-श्यामापदकर-मेरुडिसूर्यनारायण-गोपालदेशिकादिमहाभागानां चरणारविन्दयोः कोटिशः प्रणतिततीर्विनिवेदयामि। एषु आचार्येषु स्वीयायासशतमविगणय्याधुनापि अध्यापनेन पुत्रस्येव मे क्लेशापनोदने नितरां निरताः श्रीरामकृष्णभट्टमहाभागाः इति तान् वारं वारं प्रणतिततिं निवेदयन् स्मरामि। तर्कप्रकरणस्य पाठः श्रीवेङ्कटरमणभट्टमहाभागेभ्यः अपि कियत्कालं यावद्गृहीतः, परं दौर्भाग्यं मदीयं यदाचार्याः कोरोणाक्रान्ताः सहसैवामृतलोकं प्रस्थिताः। दुर्मनायितः असावधमः सम्प्रति अनुसन्धानसमाप्तिसमये तानपि वारं वारं स्मरन् स्वकार्तज्ञं श्रद्धां च विज्ञापयति। शोधकर्मणि दुरूहस्थलानां सरलव्याख्यानेन प्रभूतोपदेशदानेन च मदहुपकारमाचरितवद्भ्यः श्रीगङ्गाधरकरमहाभागेभ्यः अपि श्रद्धा कृतज्ञता च विवेद्यते। एवं, यादवपुरविश्वविद्यालयस्थसंस्कृतविभागस्य, बाँकुडाविश्वविद्यालयस्थसंस्कृत-विभागस्य अन्येभ्यः अन्याभ्यः अपि आचार्येभ्यस्तथाचार्याभ्यः स्वकार्तज्ञ्यं प्रणामांश्च विज्ञापयामि।

‘सर्वतीर्थमयी माता सर्वदेवमयः पिता।

मातरं पितरं तस्मात् सर्वयत्नेन पूजयेत्।।’

- इति भणितिं स्मारं स्मारं मम जननीं शोभादेवीं जनकं पञ्चाननदेवञ्च सश्रद्धं प्रणमामि। पित्रोराधमर्ण्यं न वाक्यैः प्रकाशयितुं शक्यते। विविधग्रन्थादिप्रदानेन, मानसशक्तिप्रदानेन चोदयित्र्यै, विशेषतः प्रीतिस्नेहप्रदानेन यथासाध्यं विविधप्रकारेण साहाय्यमाचरितवत्यै हृदयसमायै प्रियायै रियायै प्रेमस्नेहादिकं विज्ञाप्यते। प्रभूतोत्साह-प्रदानाय प्रेमास्पदं मदीयसहोदरा सुदीप्ता सप्रेम स्मर्यते।

न केवलमेतदनुसन्धानात्मककार्यं सम्पादयितुम्, अपि तु, अग्रजोपमस्याचार्यस्य सन्तु-सिंहस्य बाँकुडा-विश्वविद्यालयप्राध्यापकस्य साक्षात्परोक्षं वा सहायं विनाद्यावधि अध्ययनकर्मसम्पादनेऽपि असमर्थोऽहं, स्वप्रयोजनगणमगणयन्नपि मत्प्रयोजनीयवस्तु-

संग्रहपराय, मम संस्कृतजगति प्रतिष्ठाप्राप्तये यथास्वसामर्थ्यं विविधप्रकारसहायप्रदात्रे कार्तज्ञ्यप्रसूनं हार्दं विनिवेद्यते। गवेषणकर्मणि विशेषसहायमाचरितवते स्वर्गत-श्रीसञ्जय-कुमार-सिंहमहाभागायापि स्वीयमाधमर्ण्यं कार्त्तज्ञ्यं च निवेदयामि। सारस्वतसुधानु-सन्धानरतानां कौशिक-निरुपम-दयामय-गौतम-प्रियाङ्का-प्रदीप-दीपक-सुजित-विपत्तारण-नीलाद्रि-स्वागताद्यग्रजानां देवाशिष-कौशिक-सुरजित्-दीप्तेन्दु-विवेकानन्दलक्ष्मणानां प्रत्यक्षतः परोक्षतः यत्साहाय्यं मया प्राप्तं तत्सर्वं स्मारं स्मारं सम्प्रत्यनुसन्धानतपःपूर्तिसमये तेभ्यः कायेन मनसा वाचा धिया च भूयो भूयः हार्दिकान् धन्यवादान् विनिवेदयामि।

किञ्च, शोधकर्मणि सहायकभूता ग्रन्थाः रामकृष्णमिशन्-विद्यामन्दिरस्य, यादवपुर-विश्वविद्यालयस्य, बाँकुडा-विश्वविद्यालयस्य, एशियाटिक-सोसाइटेः, संस्कृत-साहित्य-परिषदश्च ग्रन्थालयेषु मया लब्धाः, अतस्तत्तद्ग्रन्थालयं प्रति तथा तत्तद्ग्रन्था-लयाधिकारिकान् प्रति च मदीयं कार्तज्ञ्यं व्याहरामि। अन्ततश्च,

यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे नहि।

यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्न हि।।

इति विनिवेद्य श्रीश्रीसारदा-श्रीरामकृष्ण-श्रीयतिराजपादारविन्देषु मद्गवेषणप्रसूनाञ्जलिं विनिवेद्य प्रार्थये

भ्रान्तेर्मानुषधर्मत्वादल्पज्ञत्वाच्च मादृशाम्।

दयालवः सदा सन्तः कुर्वन्त्वत्र दयालवम्।।

इति निवेदनं,

विदुषामनुचरस्य
श्रीमतः सुव्रत-गायेनस्य

# प्रस्तावना

मनुजनूनां चरमं परमं च लक्ष्यमपवर्गप्राप्तिः। अपवर्गस्य प्रापणार्थमेव भारतीयदर्शनपरम्परा प्रवृत्ता। तेषु भारतीयदर्शनेषु अनन्यम् अनितरसाधारणम् अक्षपाद-दर्शनम्। अतो हि भगवताक्षचरणमहर्षिणा सर्वजन्तूनामात्यान्तिकदुःखोन्मूलनार्थं 'प्रमाण-प्रमेय...निग्रहस्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमः' इति प्रथमसूत्रेण निःश्रेयस-साधनतया प्रतिपादितं षोडशपदार्थतत्त्वज्ञानं तदनुवर्तिभिः सर्वैरेव विद्वद्वरैः तत्तद्ग्रन्थेषु अनुमोदितम्। षोडशपदार्थेषु तर्कस्य प्राधान्यमनितरसाधारणम्। न्यायदर्शने विशेषतो नव्यन्याये यथा चर्चितं तर्कतथ्यं न तथान्यत्रास्मद्दृग्गोचरतामुपैति।

वैशेषिकदर्शनप्रणेता परमकारुणिको महर्षिकणादः तर्कस्वरूपचर्चायां सूत्रेषु मौनं भावमवलम्बते। परं परभाविनः श्रीशशधराचार्याः श्रीशङ्करमिश्राश्च तर्कस्याप्रमान्त-र्भावित्वं मन्यन्ते। ततश्च तत्प्रस्थानमवलम्ब्यैव किरणावल्यां उदयनाचार्य्यः, न्यायकन्दल्यां श्रीधराचार्यश्च तर्कस्याप्रमात्वमप्रमासु स्वातन्त्र्यञ्चोदघोषयत्।

परमक्षपादैः सकलनैयायिककुलगुरुवरैः स्वकृतौ प्रथमत एव तर्कस्याप्रमात्वं प्रमाणानुग्राहकत्वं जेगीयते मुक्तकण्ठम्। ततः गौतमानुगामिप्राचीनाचार्य्यैः उद्द्योतकर-वाचस्पतिमिश्र-जयन्तभट्टादिभिस्तर्कस्याप्रमात्वं सर्वप्रमाणानुग्राहकत्वं चोदितम्। परं तत्रापि तर्कस्यानुमाने अन्तर्भावः सम्भवो न वेति विषये विप्रतिपत्तिर्विपश्चिताम्।

न केवलं प्राचीनन्याये, नव्यन्यायाकरकृतौ ग्रन्थमणौ चिन्तामणौ मीमांसादीनां प्राचाञ्च मतानि पूर्वपक्षत्वेन निरुच्य तेषु भूरिशः दोषप्रदर्शनेनावरत्वं प्रदर्श्य स्वकः तर्कविषयकः सिद्धान्तः प्रपञ्चितः गङ्गेशोपाध्यायेन। अतः मणिग्रन्थस्थतर्कप्रकरणस्य स्वल्पाक्षरग्रथितदुर्बोधविरुद्धपूर्वपक्षखण्डनपूर्वकस्वसिद्धान्तान् सविशदं प्रकाशयितुं रघुनाथशिरोमणिर्दीधितिं, आचार्यः श्रीमथुरानाथश्च प्रणिनाय रहस्यम्। पुनस्तत्तद्ग्रन्थानां जटिलतत्त्वजातोपनिबद्धत्वात्तत्तत्त्वानां सुकुमारमतीनां समक्षं सरलतया समुपस्थापनार्थं

प्रकाशः, जागदीशी गादाधरी च विनिर्मिता आचार्यभवानन्दसिद्धान्तवागीशेन, आचार्यजगदीशतर्कालङ्कारेण आचार्यगदाधरभट्टाचार्य्येण च। इत्थं मणिग्रन्थस्थ-तर्कविमर्शो बहुव्याख्यानोपव्याख्यानटीकाटिप्पण्यादिनिबन्धबद्धो दुर्बोध्यः। अपि च, एकस्यैव ग्रन्थग्रथिततर्कतत्त्वस्य व्याख्यानपरायामपि दीधित्यां माथुर्यां गादाधर्यां जागदीश्यां च सिद्धान्तभेदः समेषां सुलभः। किञ्च, न्यायसमानतन्त्रेऽपि वैशेषिकतन्त्रे यत्तर्कतथ्यजातं विततं न्यायनयाद्वैलक्षण्यं तत्रापि वरीवर्त्ति। अतो वैशेषिकदर्शनं, प्राचीनन्यायं नव्यन्यायं परिशील्य ततस्तर्कतथ्यं संहृत्य तत्तत्सम्प्रदायानुगुणं परिष्कृत्य तेषु किं सादृश्यं किं वैसादृश्यं, किं निदानं वैसादृश्ये, किञ्च निगमनम्, किं निदानं मतयोर्हेयत्वोपादेयत्वे, व्याख्याग्रन्थेष्वपि क्व सादृश्यं क्व च वैसादृश्यं, वैसादृश्यनिदानप्रदर्शनपुरःसरं कस्य च टीकाकारस्य ज्यायो मतम् इत्येतदखिलतत्त्व-प्रकाशकामनया मया ***तत्त्वचिन्तामणेस्तर्कप्रकरणे प्रसिद्धटीकानां समीक्षणम्*** इति गवेषणबन्धो बद्धुं यतिष्यते।

तथा हि, नव्यन्यायनये तर्कस्वरूपविमर्शे चिन्तामणिस्थतर्कप्रकरणव्याख्यान-निरतयोरपि मथुरानाथगदाधरयोर्मिथो मतभेदः सुलभः। तद्यथा तर्कलक्षणविमर्शावसरे श्रीमता मथुरानाथेन तर्काकारं प्रतिपादयता तर्कलक्षणमित्थं लक्षितम् – **‘अत्रोच्यते तर्कत्वं ज्ञानत्वावान्तरजातिविशेषः, स एव लक्षणं तर्कस्य’** इति। गादाधर्यां तु मथुरानाथमतमुल्लिख्य तन्मतस्य हेयताप्रदर्शनाय ‘यद्वा..’ इति पक्षान्तरमुपस्थापितम्। तत्र च गादाधरी **“यद्वा व्याप्यारोपत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रय-व्यापकारोपत्वमेव तर्कत्वमि**”ति। ननु अत्रेदं स्पष्टं, यद्वेति कल्प एव गादाधरस्वारस्यम्। ननु कथं तत्र सिद्धान्तभेदः? कथं वा मथुरानाथमतं हेयम्?

दीधितिकारा रघुनाथशिरोमणयः अपि क्वचित्सार्वभौममतं ‘परे’ इति पदेन उल्लिख्य ‘तच्चिन्त्यमि’त्यादिना तिरस्कुर्वन्ति। तथा हि – **“केचित्तु कार्यकारणभाव-ग्रहानन्तरं व्याप्तिग्रहाय व्यधिकरणस्य जनकत्वशङ्कानिरासार्थमयं तर्कः। ... इदमेव च वाचोभङ्ग्या परे परिष्कुर्वन्ति। धूमो यदि वह्न्यनधिकरणदेशानुत्पत्तिकत्वे सति वह्न्यधि-**

**करणदेशोत्पत्तिकः न स्यात्, जन्यो न स्यात्। तादृशानुत्पत्तिकत्वग्रहश्च धूमानुत्पत्तिं प्रति वह्निसम्बन्धाभावस्य प्रयोजकत्वे ग्राह्ये उपस्थितत्वात् लाघवाच्च तादृशसम्बन्धाभावस्यैव तथात्वावधारणात् इति। तच्चिन्त्यम्।**[1] इति। क्वचिच्च पक्षधरमिश्रमते अपि दीधितिकृद्भिः स्वकीयास्वारस्यं 'प्राहु'रिति पदेन प्रदर्श्यते। तथाहि – **"मिश्रास्तु परं प्रति व्याप्तिग्रहोपाये प्रदर्शमाने व्यभिचारशङ्कानिरास-हेतुत्वेनोपदर्शिते तर्के मूलशैथिल्यादिशङ्कोद्भावकं तं प्रति व्याघातो यमुपदर्श्यते, मैवं शङ्कीष्ठाः, तथा सति तत्तत्कार्यार्थितया तत्र त्र कारणे तवैव प्रवृत्तयो व्याहन्येरन्। यदाह, न हि सम्भवति स्वयं वह्न्यादिकमिति इति प्राहुः।**[2] इति। अत्र 'प्राहुः' इति पदेन स्वारस्यम् अस्वारस्यं वा तदपि पुनः टीकाकृतां विमर्श-विषयतामुपैति। ननु कथं तत्र सिद्धान्तभेदः? कतरन्मतं ग्राह्यं कतरन्मतं वा हेयम्?

आचार्यगदाधरः अपि जगदीशाचार्यगिरमुल्लिख्य तत्खण्डयति – **"केचित्तु जन्यत्वानिवेशप्रयुक्तलाघवमनुसृत्याह। तथाविधेति इति व्याचक्रुस्तन्न शोभनम्।"**[3] इत्यत्र 'तन्न शोभनम्' इत्यादिना। एवं सर्वत्र व्याख्याविवृतिकृतां सिद्धान्तेषु क्व सादृश्यं क्व च वैसादृश्यं, किं निदानं सादृश्य-वैसादृश्ययोः, निदानं मतयोर्हेयत्वोपादेयत्वे, किञ्च निगमनम्, क्व चाधेयं स्वस्वारस्यमिति सर्वमत्रामूलचूडं सयुक्ति विमृश्य प्रतिपादयिष्यते।

तथा हि पर्यालोचयिष्यमाणे प्रथमे अध्याये समालोचयिष्यन्ते प्रस्तावित-विषयोपयोगिनो विषयाः। यथा नव्यन्यायप्रादुर्भावः, गङ्गेशोपाध्यायपरिचयः, तत्त्वचिन्तामणेः परिचयः प्रथमतः प्रतिपादयिष्यते। सत्स्वपि बहुषु व्याख्यानेषु तत्त्वचिन्तामण्याश्रितेषु इह प्रबन्धे प्रसिद्धाः पञ्च दीधिति-रहस्य-प्रकाश-जागदीशी-गादाधर्यः च पर्यालोचयिष्यन्ते। एवं प्रथमाध्यायान्ततः प्रबन्धस्य पूर्वपरिकल्पना, शोधपद्धतिः इत्येते विषया अपि सन्निवेशिताः स्यात् यथामति।

---

[1] तत्त्वचिन्तामणौ, कीर्त्यानन्दझा-सात्करिशर्म-सम्पादिते, पृ 142

[2] तत्रैव

[3] तत्त्वचिन्तामणौ, सोमनाथाचार्यसम्पादिते, पृ 224

आलोचयिष्यमाणे द्वितीये अध्याये पर्यालोचयिष्यते प्राचीनन्याय-नव्यन्याय-वैशेषिकसम्मतं तर्कस्वरूपं, तर्कलक्षणं च। अत्रापि प्राचीनसौत्रलक्षणस्य नव्यन्याय-सम्मतेन लक्षणेन सामञ्जस्यं सम्भवति न वा विचारयिष्यते। एवं क्रमेण तर्कस्य सर्वप्रमाणानुग्राहकत्वं सम्भवति न वा, किं तर्कस्य प्रयोजनं, के च तर्कभेदाः इत्येतेषां पर्यालोचनानन्तरम् अध्यायान्ततः तर्कस्य संशयनिश्चयानुमानान्तर्भावः युक्तो न वेति पर्यालोचयिष्यते।

पर्यालोचयिष्यमाणे तृतीये अध्याये प्रदर्शयिष्यते तत्त्वचिन्तामणौ तर्कस्वरूपं कथं पर्यालोचितमिति। तर्के अङ्गीकृते अनवस्थादोषः जायते वा न वा, जायते चेत्कथं वा तत्परिहारः सम्भवति इति विचारः न्यायकुसुमाञ्जलि-खण्डनखण्डखाद्यमतानुवादपुरःसरं पर्यालोचयिष्यते। अन्ततः पूर्वपक्षिणां मतनिरासः विवेचयिष्यते।

प्रबन्धस्यालोचयिष्यमाणे चतुर्थे अध्याये रघुनाथ-मथुरानाथयोर्मतानुवादेन सह तयोः सादृश्य-वैसादृश्ये विवेचयिष्यते।

आलोचयिष्यमाणे पञ्चमाध्याये च तत्त्वचिन्तामणेस्तर्कप्रकरणे दीधितिमाश्रित्य रचितानां भवानन्द-जगदीश-गदाधरकृतटीकानां समीक्षणं करिष्यते। तत्रापि यथामति मूलटीका-ग्रन्थानुवादानन्तरं टीकाकृन्मतेषु सादृश्य-वैसादृश्ये उपादेयत्व-हेयत्वे चालोचयिष्यन्ते। अन्तिमे उपसंहारांशे व्याख्याविवृतिटीकादिसहितकर्कशतर्क-प्रकरणोदधिमन्थनोत्थं सिद्धान्तसारपीयूषं पेपीयमानेन पूर्वोत्तरपक्षपर्यालोचनपरेण स्वमतनिबन्धनेन निबन्धसमाप्तिः विधास्यते।

इतः पूर्वं वर्धमानविश्वविद्यालयस्य पण्डितप्रवरस्य राष्ट्रपतिसम्मानितस्य प्रो.मृणालकान्तिवन्द्योपाध्याय-महाभागस्य तत्त्वावधानेन '**নৈয়ায়িকভাবনায় প্রমাণ, প্রমেয়, তর্ক**' इत्याख्यं शोधकार्यं सुमिता-मण्डल-महाभागया विहितम्। परं तत्र प्राचीन-न्यायमनुसृत्य समासतः सभेदतर्कस्वरूपादि प्रपञ्चितम्। शिलचरविश्वविद्यालयात् अपि समीरण-देवनाथ-महाभागेन '**The Concept of Aprama**' इति गवेषणप्रबन्धः

सम्पादितः, परं तत्रापि तर्कस्य लक्षणं स्वरूपं च केवलं प्रपञ्चितम्। मया त्वत्र नव्यन्यायपरम्परायाः प्रमुखटीकाग्रन्थानाश्रित्य सविशदं समीक्षणं विधास्यत इति न पिष्टपेषणशङ्कावसर इति विशेषः। किञ्च, नव्यन्यायसम्प्रदाये तर्कविषयिणी चर्चा सुकृतीनां कृतिततिषु स्वल्पैवाद्यत्वे, यच्च सुलभं तदितस्ततो विक्षिप्तं, विततं विस्तृतञ्च। अतस्तेषां स्वरूपलक्षणसंख्यागुणधर्मसम्बद्धोपपत्तिविप्रतिपत्तिनिराकृतिसनाथितावितथ-तत्त्वजातानां तौल्येन पर्यालोचनस्य समीक्षणस्य च प्रयोजनमावश्यकमिति मन्यामहे। किञ्च, सहैव नव्यन्यायेन न्यायवैशेषिकेतरसम्प्रदायसिद्धान्ता अपि यथायथविश्लेषणेन अत्र प्रबन्धे पर्यालोचयिष्यन्ते येनात्र न्यायेतरनयोऽपीह सहृदयनयनपथगामी स्यादित्यपि विशेषः अस्य प्रबन्धस्येति शिवम्।

# सूचीपत्रम्


| विषयः | पृष्ठाङ्कः |
|---|---|
| **प्रथमोऽध्यायः – उपोद्घातः** | **1-39** |
| • १.१. नव्यन्यायप्रादुर्भावः | 4 |
| • १.२. श्रीमद्गङ्गेशोपाध्यायः | 5 |
| • १.३. श्रीरघुनाथशिरोमणिः | 15 |
| • १.४. श्रीमथुरानाथतर्कवागीशः | 22 |
| • १.५. श्रीभवानन्दसिद्धान्तवागीशः | 25 |
| • १.६. श्रीजगदीशतर्कालङ्कारः | 29 |
| • १.७. श्रीगदाधरभट्टाचार्य्यः | 33 |
| • १.८. पूर्वपरिकल्पना (Hypothesis) | 37 |
| • १.९. शोधपद्धतिः (Research Methodology) | 38 |
| **द्वितीयोऽध्यायः – दर्शनशास्त्रेषु तर्कस्य स्वरूपं प्रयोजनञ्च** | **40-74** |
| • २.१. तर्कस्वरूपम् | 41 |
| • २.२. भाष्यस्थतर्कलक्षणम् | 45 |
| • २.३. नव्यन्यायसम्मतं तर्कलक्षणम् | 49 |
| • २.४. वैशेषिकाभिमततर्कस्वरूपम् | 50 |
| • २.५. शास्त्रान्तरेषु प्रतिपादितं तर्कस्वरूपम् | 52 |
| • २.६. तर्कस्य सर्वप्रमाणानुग्राहकत्वम् | 56 |

- २.७. तर्कप्रयोजनम् 61
- २.८. तर्कभेदाः 63
- २.९. तर्कस्य संशयनिश्चयानुमानातिरिक्तत्वविचारः 66
- २.१०. अध्यायोपसंहारः 73

**तृतीयोऽध्यायः – तत्त्वचिन्तामणिस्थतर्कप्रकरणसमीक्षणम् 75-104**

- ३.१. तर्केऽनवस्थादोषप्रसङ्गः 79
- ३.२. अनवस्थापरिहारः 80
- ३.३. न्यायकुसुमाञ्जलिकारमते मणिकारस्य स्वारस्यम् 84
- ३.४. खण्डनखण्डखाद्यमतखण्डनम् 86
- ३.५. भूयोदर्शनस्य व्याप्तिग्राहकत्वप्रदर्शनम् 89
- ३.६. तर्कस्य स्वरूपसतः कारणत्वम् 91
- ३.७. पूर्वपक्षमतनिरासः 92
- ३.८. अध्यायोपसंहारः 99

**चतुर्थोऽध्यायः – तत्त्वचिन्तामणेस्तर्कप्रकरणे रघुनाथमथुरानाथकृतटीकयोः समीक्षणम् 105-149**

- ४.१.१. मण्युक्ततर्कस्य कार्यकारणभावग्राहकत्वोपपादनम् 106
- ४.१.२. व्याप्तिग्रहे कार्यकारणभावज्ञानस्यावश्यकत्वप्रदर्शनम् 108
- ४.१.३. तर्कशरीरस्थपदव्यावृत्तिप्रदर्शनम् 109
- ४.१.४. रघुनाथमतानुसारं मण्युक्तायाः प्रथमशङ्काया मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम् 111

- ४.१.५. रघुनाथमतानुसारं मण्युक्ताया द्वितीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम् 114
- ४.१.६. रघुनाथमतानुसारं मण्युक्तायास्तृतीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम् 115
- ४.१.७. मणिस्थतदुपादानपदार्थनिरूपणम् 115
- ४.१.८. मिश्रमतप्रदर्शनम् 117
- ४.१.९. धूमत्वावच्छिन्नधूमे वह्निजन्यत्वविचारः 118
- ४.२.१. चिन्तामणिग्रथिततर्कस्य वह्निधूमयोर्व्याप्तिग्रहोपयोगित्वप्रदर्शनम् 120
- ४.२.२. चिन्तामणिग्रथिततर्कस्य अन्योन्याभावघटिततया निरूपणम् 122
- ४.२.३. मण्युक्ततर्कशरीरस्थाभावपदेन अन्योन्याभावग्रहणप्रयोजननिरूपणम् 122
- ४.२.४. अव्याप्यवृत्तित्वस्वरूपनिरूपणम् 123
- ४.२.५. तर्कघटकदलानां सार्थक्यम् 125
- ४.२.६. यज्ञपत्युपाध्यायमतोपस्थापनं तद्दूषणञ्च 130
- ४.२.७. रघुनाथशिरोमणेः मतानुवादः 134
- ४.२.८. मण्युक्तशङ्कात्रयस्य तर्कप्रतिबन्धकत्वोपपादनम् 138
- ४.२.९. वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य शङ्कात्रयप्रतिबन्धकत्वनिरूपणम् 143
- ४.२.१०. तर्कानुसरणस्य वैयर्थ्यशङ्का, तत्सार्थक्यप्रदर्शनं च 145
- ४.२.११. तर्कस्य सत्त्वासत्त्वपरिष्कारः 146
- ४.३. अध्यायोपसंहारः 147

**पञ्चमोऽध्यायः – तत्त्वचिन्तामणिदीधितेस्तर्कप्रकरणे भवानन्दजगदीशगदाधरकृतटीकानां समीक्षणम्** **150-233**


- ५.१.१. हुताशनेत्यादिदीधितिपङ्क्तिप्रणयनप्रयोजननिरूपणम् 151
- ५.१.२. दीधितिस्थस्य रासभाहेतुत्वप्रदर्शनस्य प्रयोजननिरूपणम् 153
- ५.१.३. दीधितिस्थस्य एतेषामन्यतमं कारणं धूमस्येत्यवधारणम् इति भागस्य प्रयोजननिरूपणम् 154
- ५.१.४. दीधितिकृत-रासभादेरहेतुत्वनिश्चयोपदर्शनप्रयोजननिरूपणम् 155
- ५.१.५. मण्युक्ततर्कस्य कार्यकारणभावग्राहकतया प्रकृतोपयोगित्वप्रदर्शनम् 157
- ५.१.६. दीधित्युत्थापितचिन्ताबीजनिरूपणम् 158
- ५.२.१. हुताशनेत्यादेदीधितिप्रणयनप्रयोजननिरूपणम् 160
- ५.२.२. तर्कलक्षणनिरूपणम् 164
- ५.२.३. तर्कभेदविचारः 165
- ५.२.४. तर्कस्य कारणविचारो फलविचारश्च 167
- ५.२.५. दीधितिकृतस्य मिश्रमतानुवादस्य प्रकर्षत्वविचारः 168
- ५.२.६. धूमत्वावच्छिन्नं प्रति वह्नेः कारणत्वविचारः 169
- ५.३.१. हुताशनेत्यादिदीधितिपङ्क्त्युपस्थापनप्रयोजनविवेचनम् 173
- ५.३.२. दीधितौ हुताशनेत्यादौ रासभपदोपादानप्रयोजननिरूपणम् 174
- ५.३.३. कार्यकारणभावग्रहस्य आवश्यकत्वप्रदर्शनम् 176
- ५.३.४. तर्काकारप्रविष्टपदव्यावृत्तिकथनम् 177
- ५.३.५. वह्न्यसमवधानपदार्थविचारः 180
- ५.३.६. वह्न्यसमवधानकालीनत्वविचारः 183
- ५.३.७. शङ्कात्रयविचारः 184

- ५.३.८. अवह्नेरेव भविष्यतीति शङ्काघटकावह्निपदार्थविचारः 190
- ५.३.९. धूमो यदीत्यादितर्कविरोधिशङ्कायाः धूमार्थिनः वह्नौ प्रवृत्तेः प्रतिरोधकत्वविचारः 191
- ५.३.१०. वह्नौ धूमरूपफलसाधनताज्ञानस्य धूमो यदीत्यादितर्कविरोधिशङ्का-प्रतिरोधकत्वविचारः 193
- ५.३.११. वह्नौ धूमप्रयोजकत्वनिश्चयस्य धूमो यदीत्यादितर्कविरोधिशङ्काप्रतिरोधकत्व-विचारः 193
- ५.३.१२. आपाद्यव्यतिरेकनिश्चयापत्त्योः कार्य्यकारणभावविचारः 194
- ५.३.१३. आपाद्यव्याप्यापादकवत्ताज्ञानयोः कार्यकारणभावविचारः 195
- ५.३.१४. आपाद्यव्याप्यापादकवत्तानिश्चयापत्त्योः प्रतिबध्यप्रतिबन्धकभावविचारः 196
- ५.३.१५. आपादकसंशयापाद्यव्यतिरेकनिश्चयादीनां प्रतिबध्यप्रतिबन्धकभावविचारः 197
- ५.३.१६. धूमत्वावच्छेदेन वह्निजन्यतासाधनविचारः 197
- ५.३.१७. धूमत्वावच्छेदेन वह्निजन्यतासाधने बाधकोपस्थापनम् 198
- ५.३.१८. धूमत्वेन वह्निजन्यत्वसाधने बाधकोपस्थापनम् 208
- ५.३.१९. तर्कवैयर्थ्याक्षेपसमाधानविचारः 219
- ५.३.२०. चार्वाकमतखण्डनम् 226
- ५.४. अध्यायोपसंहारः 232

**उपसंहारः** **234-249**

**सहायकग्रन्थग्रामाः** **250-265**

चिन्तामणिकृतं भक्तचिन्तितार्थफलप्रदम्।

उपाध्यायमहं वन्दे गङ्गेशं युक्तिसिद्धये।।

अनल्पकल्पनाभिज्ञं मणिदीधितिकारिणम्।

नमामि सिद्धये वाचां रघुनाथशिरोमणिम्।।

गङगेशयुक्तितत्त्वार्थकोविदं मधुरोक्तिकम्।

मधुरोक्त्यै सेवयामि मथुरानाथपण्डितम्।।

जगदीशबुधं तर्कालङ्कारोपाधिकं गुरुम्।

भट्टाचार्यमहं वन्दे गदाधरमनारतम्।।

ॐ नमः कणादगौतमादिभ्यस्तर्कविद्यासम्प्रदायकर्तृभ्यो वंशर्षिभ्यो नमो महद्भ्यो गुरुभ्यः।।

# प्रथमः अध्यायः

## उपोद्घातः

**“आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तवो निदिध्यासितव्य”** इति भागवती श्रुतिर्भवबन्धननाशसाधनत्वेन श्रवणमनननिदिध्यासनानि उपदिशति। तेषु मननप्रतिपादको हि न्याय इति निर्णीतमुदयनेन **“न्यायचर्चेयमीशस्य मननव्यपदेशभाक्”**[1] इति कारिकायाम्। अतो भगवताक्षचरणेन महर्षिणा सर्वजन्तूनामात्यान्तिकदुःखोन्मूलनार्थं प्रमाणप्रमेय... इति प्रथमसूत्रेण निःश्रेयससाधनतया प्रतिपादितं षोडशपदार्थतत्त्वज्ञानं तदनुवर्तिभिः सर्वैरेव विद्वद्वरैः तत्तद्ग्रन्थेषु अनुमोदितम्। तथाहि उक्तं *तत्त्वचिन्तामणौ* –

**“अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रेक्षावत्प्रवृत्त्यर्थं प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसा-धिगम इत्यादावसूत्रयत्”**[2] इति।

न्यायनये प्रमाणादिनिग्रहस्थानान्तानां षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसाधि-गमः। तथाहि महर्षिगौतमप्रणीतमाद्यं सूत्रम् – **“प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञाना-**

[1] न्यायकुसुमाञ्जलौ, प्रथमस्तवके, कारिका 3

[2] प्रामाण्यवादे, एन्. एस्. ताताचार्य्यसम्पादिते, पृ 3

**न्निःश्रेयसाधिगमः"**[3] इति। षोडशपदार्थेषु तर्कस्य प्राधान्यमनितरसाधारणम्। न्यायदर्शने विशेषतो नव्यन्याये यथा चर्चितं तर्कतथ्यं न तथान्यत्रास्मद्दृग्गोचरतामुपैति। तत्त्वज्ञानार्थं तर्कस्योपयोगिता वस्तुतः अनस्वीकार्या एव।

अतः अक्षचरणैः सकलनैयायिककुलगुरुवरैः स्वोपज्ञकृतौ प्रथमत एव तर्कस्याप्रमात्वं तथा प्रमाणानुग्राहकत्वं जेगीयते मुक्तकण्ठम्। न केवलं प्राचीनन्याये, नव्यन्यायाकरकृतौ ग्रन्थमणौ चिन्तामणौ मीमांसादीनां प्राचाञ्च मतानि पूर्वपक्षत्वेन निरुच्य तत्र तेषां भूरिदोषप्रदर्शनेनावरत्वं प्रदर्श्य स्वसिद्धान्तः प्रपञ्चितः गङ्गेशोपाध्यायेनापि। ततो मणिग्रन्थस्थस्य तर्कप्रकरणस्य स्वल्पाक्षरग्रथितदुर्बोधविरुद्धपूर्वपक्षस्वीयाविरुद्धोभयराद्धान्तं सविशदं प्रकाशयितुमाचार्यवरः पण्डितशिरोमणिरघुनाथशिरोमणिर्दीधितिं, न्यायशास्त्रनाथः आचार्यः श्रीमथुरानाथभट्टाचार्यश्च प्रणिनाय रहस्यम्। पुनस्तत्तद्ग्रन्थानां जटिलतत्त्व-जातोपनिबद्धत्वात्तत्तत्त्वानां सुकुमारमतीनां समक्षं सरलतया समुपस्थापनार्थं प्रकाशः, जागदीशी गादाधरी च विनिर्मिता न्यायनयाभिज्ञानन्दजनकाचार्यभवानन्देन, तर्ककुलालङ्कारभूतेनाचार्येण श्रीजगदीशतर्कालङ्कारेण आचार्येण श्रीगदाधरभट्टाचार्य्येण च। इत्थं चिन्तामणिग्रन्थस्थतर्कविमर्शो बहुव्याख्यानोपव्याख्यानटीकाटिप्पण्यादिनिबन्धबद्धो दुर्बोध्यः। अपि च, एकस्यैव ग्रन्थग्रथिततर्कतत्त्वस्य व्याख्यानपरायामपि दीधित्यां माथुर्यां गादाधर्यां जागदीश्यां च सिद्धान्तभेदः समेषां सुलभः। किञ्च, न्यायसमानतन्त्रेऽपि वैशेषिकतन्त्रे यत्तर्कतथ्यजातं विततं न्यायनयाद्वैलक्षण्यं तत्रापि वरीवर्त्ति। अतो

[3] न्यायदर्शने, अमरेन्द्रमोहनतर्कतीर्थसम्पादिते, पृ 28

वैशेषिकदर्शनं, प्राचीनन्यायं नव्यन्यायं दर्शनशास्त्रान्तरं परिशील्य ततस्तर्कतथ्यं संहृत्य तत्तत्सम्प्रदायानुगुणं परिष्कारः अपेक्षितः। अतः ***तत्त्वचिन्तामणेस्तर्कप्रकरणे प्रसिद्धटीकानां समीक्षणम्*** इति विमर्शयतामादौ केचन विषया अवश्यमवधेयाः। तथा हि घटितज्ञानं प्रति घटकज्ञानस्य हेतुत्वनियमात्, वाक्यार्थज्ञानं प्रति पदार्थज्ञानस्य हेतुत्वनियमाद् वादौ तत्त्वचिन्तामणेः, तदाश्रितप्रसिद्धानां टीकानां बोध इहापरिहार्यः। अथ अधस्तात् तत्सर्वं क्रमश आलोच्यते।

तथा हि, ***तत्त्वचिन्तामणेस्तर्कप्रकरणे प्रसिद्धटीकानां समीक्षणम्*** इत्यत्र तत्त्वचिन्तामणेः इति पदे षष्ठी विभक्तिः, निष्ठत्वं षष्ठ्यर्थः। तस्य च तर्कप्रकरण इत्यनेनान्वयः। तेन तत्त्वचिन्तामणिनिष्ठतर्कप्रकरणमिति बोधः। तर्कप्रकरणे इति सप्तमी, विषयत्वं च तत्सप्तम्यर्थः। प्रसिद्धा टीका इति विग्रहेण कर्मधारयसमासेन प्रसिद्धटीका इति निष्पद्यते। सप्तम्यर्थस्य च तेनान्वयः। तेन तत्त्वचिन्तामणिनिष्ठतर्कप्रकरणविषयक-प्रसिद्धटीकाः इति बोधः। तासां, तत्त्वचिन्तामणिनिष्ठतर्कप्रकरणविषयकप्रसिद्धटीकानाम् इति सप्तमीबहुवचनम्, विषयत्वं च तदर्थः। तेन तत्त्वचिन्तामणिनिष्ठतर्कप्रकरण-विषयकप्रसिद्धटीकाविषयकसमीक्षणम् इति वाक्यार्थवोधः फलति। समीक्षणमित्यस्य सम्यग्विचारणं सम्यक्पर्यालोचनं सम्यग्दर्शनमित्यर्थः।

अनुबन्धचतुष्टयज्ञानेन विना न प्रेक्षावतां प्रबन्धाध्ययने प्रवृत्तिरिति धियादावेव मद्गवेषणप्रबन्धस्य अनुबन्धचतुष्टयमप्यत्र वक्तव्यमिति न्यायपदार्थेषु तर्कपदार्थस्य विशेषतः तत्त्वचिन्तामणिग्रन्थस्थस्य तट्टीकाग्रन्थस्थस्य च तर्कप्रकरणस्य जिज्ञासुरिह अधिकारी,

विषयः तर्कपदार्थतत्त्वम्, प्रयोजनं तर्कपदार्थतत्त्वज्ञानम्, सम्बन्धश्च प्रतिपाद्यप्रतिपादक-भावः इति बोध्यः। अधस्तादन्ये प्रवन्धाश्रयिविषया अपि क्रमशः पर्यालोच्यन्ते।

## १.१. नव्यन्यायप्रादुर्भावः

महर्षिगौतमप्रणीतं तर्कशास्त्रं कालक्रमेण बहुभिः कृतिभिः महतीं वृद्धिं प्रापितं सकलदर्शनसम्प्रदायविच्चेतस्सु विराजतेतमाम्। तदिदं तर्कशास्त्रं सर्वशास्त्रोपकारकं न्यायशास्त्रम् आन्वीक्षिकीति वा प्रसिद्धं प्राचीन-अर्वावीनभेदेन द्वेधाधुनातनैर्व्यपदिश्यते। गङ्गेशोपाध्यायप्राग्भाविभिर्विरचितानां नव्यन्यायशास्त्रग्रन्थानां प्राचीनन्याय इति प्रसिद्धिः, गङ्गेशोपाध्यायप्रणीतं तत्त्वचिन्तामणिमारभ्य पश्चाद्भाविनां न्यायशास्त्रग्रन्थानां च नव्यन्याय इति व्यपदेशश्च वरीवर्त्ति। ननु एतादृशे व्यपदेशे बीजं किमिति परिशीलननिरताः केचिदाचार्याः अवच्छेदकावच्छिन्नादिपारिभाषिकाणां शब्दानां प्राचुर्यात्, प्रमेयपदार्थानां प्रमाणायात्तसिद्धिकतया प्रधानतया प्रमाणपदार्थप्रपञ्चनपरत्वाद् गङ्गेशोपाध्यायपश्चात्तनानां नव्यन्यायव्यपदेश इत्याक्षिपन्ति। तेन, गङ्गेशोपाध्यायात्प्राचीनतनेषु न्यायशास्त्रग्रन्थेषु न्यायसम्मतानां प्रमाणादिषोडशपदार्थानामेव विस्तरेण विचारोऽवलोक्यते। गङ्गेशस्तु तं प्राचीनं पन्थानमनादृत्य प्रमाणमात्रविवेचने प्रावर्ततेति नूत्नधारायाः प्रवर्त्तनात् तदीयो ग्रन्थः नव्यन्यायस्याकरग्रन्थतया व्यपदेशमगात्। परं प्रमेयपदार्थः अपि न सर्वथा अनादृतः, प्रमाणस्य प्रमेयाविनाभूतत्वात् चिन्तामणौ प्रमेयमपि सोपयोगि निरुक्तम्।

## १.२. श्रीमद्गङ्गेशोपाध्यायः

आचार्यो गङ्गेशोपाध्याय एव नव्यन्यायस्य प्रवर्त्तकः। केषाञ्चिन्मते आचार्योदयनः अस्याः शैल्याः प्रवर्त्तनं स्वाभिमततया प्रवर्त्तयितुमचेष्टत, परं साफल्यं नावाप।

दारभाङ्गामण्डलान्तर्गत-कमलानदीतटवर्ति-कोरियावनामकग्रामवास्तव्यः मैथिलो विप्रकुलोद्भवः असौ तत्त्वचिन्तामणिप्रणेता गङ्गेशोपाध्यायः वर्धमानोपाध्यायस्य पिता, यज्ञपत्युपाध्यायस्य पितामहः, नरहर्युपाध्यायस्य प्रपितामहश्च। यद्यपीह कोरियाव-ग्रामस्योल्लेखः कृतः, तथापि गङ्गेशोपाध्यायस्य जन्मग्रामः मिथिलाप्रदेशस्थः 'छदन' इति पञ्जीतः अवगम्यते। परं सम्प्रति स ग्रामः विलुप्तः। केषाञ्चिन्नये गङ्गेशोपाध्यायस्य एकः आत्मजः, एका आत्मजा चास्ताम्। अन्येषां विदुषां मते तु गङ्गेशस्य द्वे भार्ये बभूवतुः। ज्येष्ठपत्न्यां प्रसिद्धः वर्धमाननामा एकः पुत्रः, एका पुत्री च उदपद्येताम्। द्वितीयायां पत्न्यां सूपन इति हरि इति च द्वौ तनयौ अजनिषातामिति किंवदन्ती।

बाल्ये गङ्गेशोपाध्यायो विद्याविहीनः परं साहसी आसीत्। ततः कालीदेव्याः सपर्यया असौ महान् विद्वान् समभवदिति वदन्ति केचित्। केषाञ्चिन्मते च देवीप्रदत्तचिन्तामणिमन्त्रजपजनिता शक्तिरेव गङ्गेशोपाध्यायस्य प्रतिभास्फुरणे बीजम्। **'चिन्तादिव्यविलोचनेन'**[4] इति गाङ्गेशं वच एवात्र मानम्।

[4] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 3

तत्त्वचिन्तामणिकारः गङ्गेशोपाध्यायस्य गङ्गेश्वरः इति अभिधापि क्वचिते क्वचित् व्यवहृता। यथा –

**यस्तर्कतन्त्रशतपत्रसहस्ररश्मि-**

**र्गङ्गेश्वरः सुकविकैरवकाननेन्दुः।।**

**न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने।**

**गङ्गेश्वराय गुरवे पित्रेऽत्र भवते नमः।।[5]**

चेति वर्धमानोपाध्यायकृतं पद्यमेवात्र मानम्। पञ्जीकारैः काचित् पञ्जी संरक्षितासीत् इति विदुषामभिमतम्। सा पञ्जी कर्णाटदेशात् मिथिलां समागतानां ब्राह्मणानां कायस्थानां च वैशिष्ट्यप्रतिपादिका। तस्यां पञ्ज्यामपि गङ्गेशोपाध्यायस्य 'गङ्गेश्वर:' इति नामनिर्देशः सुप्राप इति प्रमाणमपरम्।

**गङ्गेशोपाध्यायस्य कालः –**

नव्यन्यायप्रवर्त्तकः श्रीगङ्गेशोपाध्याय कञ्च कालं स्वाविर्भावेन विभूषयामास तदाश्रित्येदानीमपि सम्प्रदायेषु विपश्चित्सु विप्रतिपत्तयः विराजमानाः। परं तत्त्वचिन्तामणेः अनुमानखण्डे 'इति खण्डनकारमतमपास्तम्' इत्युक्त्या, तथा तर्कप्रकरणे उदयनमत-समर्थनेन खण्डनखण्डखाद्यग्रन्थमतखण्डनेन च श्रीमद्गङ्गेशोपाध्यायः श्रीहर्षात्पश्चात्काल-

[5] व्याप्तिपञ्चके, भूमिकांशे, राजेन्द्रनाथघोषसम्पादिते पृ 17

सम्भवः, नेत्रग्रहपक्षचन्द्रमिते शकाब्दे सर्वतन्त्रस्वतन्त्रेण वाचस्पतिमिश्रेण तत्त्वचिन्तामणेः व्याख्यातत्वात् उक्तशकाब्दपूर्वभावी चेत्यत्र न कश्चित्संशयलेशः। अपि च, चतुस्सहस्रेसवीयवर्षे द्वांविशत्यधिकत्रयोदशे शकाब्दे च विद्यमानस्य पक्षधरमिश्रेति अपराभिधेयस्य श्रीजयदेवमिश्रस्य तत्त्वचिन्तामण्यालोकटीकाकारस्य पितृव्यात् श्रीहरिमिश्राद्विद्यासम्पादनं तमेव समयं गङ्गेशोपाध्यायस्य द्रढयति।

निर्विकल्पकप्रत्यक्षवादे विशेषणोपलक्षणवादे च चिन्तामणौ शिवादित्यमिश्रकृतस्य सप्तपदार्थीति ग्रन्थस्य, अन्यत्र बहुत्र उदयनचार्यमतस्य तत्कृतग्रन्थानाञ्चासकृदुद्धरणात् शिवादित्यमिश्रोदयनाचार्योभयानन्तरकालिकश्चासौ गङ्गेशोपाध्याय इति निश्चप्रचम्। अपि च, गङ्गेशोपाध्यायापेक्षया ईषत्प्राचीनत्वेन सम्भाविताः नारायणसर्वज्ञ-दिवाकर-मणिकण्ठ-हरिनाथादय आचार्याः त्रयोदशे शतके न्यवात्सुः। अतो गङ्गेशोपाध्यायस्य पाण्डित्यप्रकर्ष-प्रचारः त्रयोदशे एव शतके बभूवेति कथयितुं शक्यते।

प्रख्यातस्यैतिहासिकस्य पुरातत्त्वविदः इङ्गल्स्-महाशयस्य मतानुसारं, श्रीहर्षकृतस्य खण्डनखण्डखाद्यस्य चिन्तामणौ समुल्लेखात् श्रीहर्षादनन्तरभावी एव गङ्गेशोपाध्यायः। खण्डनखण्डखाद्यकारः श्रीहर्षश्च राज्ञः जयचन्द्रस्य समानकालिकः। अतः गङ्गेशोपाध्यायस्य कालः त्रयोदशशतकमिति अनुमानेन निर्दुष्टं कथयितुं शक्यते।

चिन्तामणिकारेण तत्प्राग्भाविनः तत्समकालिका वा केचिद् ग्रन्थकारा तदीयग्रन्थाश्च चिन्तामणौ समुल्लिखिताः। यथा तत्त्वचिन्तामणौ निर्विकल्पकवादे **‘इति शिवादित्यमिश्राः’** इति प्रोक्तम्। एवम् ईश्वरानुमानावसरे **‘वाचस्पतिमिश्रास्तु’** इति

नामनिर्देशः कृतः। एवं श्रीकराचार्यः, मण्डनमिश्रः, रत्नकोशकारः, आचार्य उदयनः, प्रभाकरमिश्रः, वल्लभाचार्यः, सौन्दडोपाध्यायः, तरणिमिश्रः, महार्णवकारः इत्यादयः ग्रन्थकारास्तत्र तत्र मणौ निर्दिष्टाः। एषु आचार्येषु उदयनाचार्ये एव गङ्गेशस्यादरातिशयो महान् मणिग्रन्थे सर्वत्र स्फुटं दरीदृश्यते। एतेषां समेषां समयकालस्य पर्यालोचनया अत्र उल्लिख्यमान एव समयः गङ्गेशस्येति सुस्थिरम्।

**गङ्गेशकृततत्त्वचिन्तामणेः परिचयः –**

मानाधीना मेयसिद्धिरिति न्यायेन प्रमेयप्रतिपिपादयिषायाः प्रमाणप्रतिपादनायत्त-सिद्धिकतया शास्त्रेषूपजीव्यतया प्रमाणजिज्ञासाया एवौत्सर्गिकतया प्रमाणमात्रमाश्रित्य निरतिशयवाङ्माधुरीगुम्फितो निखिलशास्त्रकृदादरणीयतमः निसर्गसुन्दरातिसंक्षिप्तपद-सङ्घटनैर्विनिर्मितोऽप्यतीवनिगूढार्थगर्भितः तत्त्वचिन्तामणिग्रन्थो विप्रतिपन्नोपपत्तिनिराकृति-मुखेन श्रीमद्गङ्गेशोपाध्यायैरकारि, अस्यैव परभाविनि नव्यन्याय इति लोकोत्तरमर्यादा। अस्मिन् मणिग्रन्थे प्राचीनन्यायशास्त्रसिद्धान्तानां मीमांसासिद्धान्तानां च पर्यालोचनपुरःसरं तिरस्कृत्य स्वयमपूर्वं निष्कर्षमुपस्थापयन्ति गङ्गेशोपाध्यायाः। अत एव ग्रन्थारम्भे –

**अन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतं**

**गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिम्।।**[6]

[6] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 3

इति गङ्गेशेनैव स्वयं प्रतिज्ञा कृता।

तत्त्वचिन्तामणेः प्रथमतः प्रत्यक्षखण्डे मङ्गलवादः प्रपञ्चितः। तत्र प्रथमे वादे अविगीत-शिष्टाचारानुमितश्रुतेः मङ्गलाचरणस्य प्रामाण्यम्, विघ्नध्वंसफलकत्वञ्च सम्भावितपूर्वपक्ष-निराकरणपुरःसरं प्रतिपादितम्। ततः प्रामाण्यवादे परतःप्रामाण्यवादः, प्रमायाः परतो ज्ञप्तिः उत्पत्तिश्च वर्णिता। प्रभाकराभिमताख्यातिवादनिराकरणमुखेनान्यथा-ख्यातिः संसाधितः अन्यथाख्यातिवादे। ततः सामान्यतः प्रमास्वरूपं निरूप्य प्रत्यक्षादिभेदेन चतुर्धा प्रमाया विभागं संसाध्यादौ प्रत्यक्षप्रमायाः गौतमीयसूत्रोदितलक्षणविवेचनपूर्वकम् इन्द्रियार्थसन्निकर्षवादः पर्यालोचितः, ततस्तत्प्रसङ्गात् चोद्भूतरूपाभावाद्वायुरप्रत्यक्षः, समवायः, मीमांसाप्रतिपादितानुपलब्धेः प्रामाण्यनिरासः, मनसोऽणुत्वम् इन्द्रियत्वञ्च, मीमांसासम्मताधिकरणात्मकत्वनिरासेनाभावस्यातिरिक्तपदार्थत्वम्, सुवर्णस्य तैजसत्वम् इत्येते विषया साधूपवर्णिताः। एवं प्रत्यक्षलक्षणावसरे निर्विकल्पकसविकल्पकभेदेन प्रत्यक्षद्वयमपि लक्षणादिप्रपञ्चनपुरःसरं संसाधितम्।

द्वितीये खण्डे अनुमानपरिच्छेदे अनुमितिलक्षणम्, अनुमानस्य प्रामाण्यं च प्रतिष्ठापितम्। अत्रैवानुमानोपयोगिन्याः व्याप्तेः स्वरूपलक्षणादिविचारमुखेन विविध-पूर्वपक्षव्याप्तिलक्षणानि खण्डितानि। ततो मीमांसकमतनिरसनपुरःसरं व्याप्तिग्रहोपाय-निरूपणं, व्याप्तिज्ञानोपपत्तिप्रदर्शनार्थं सामान्यलक्षणाप्रत्यासत्तिनिरूपणं, व्याप्तिनिर्णय-प्रसङ्गेनोपाधिस्वरूपविचारः, हेतोर्गमकतानियामकव्याप्तिस्वरूपनिरूपणानन्तरं गमकतौप-यिकः पक्षधर्मताविचारः, ज्ञानद्वयादनुमानवादिनां मीमांसकानां मतं निरस्य व्याप्तिविशिष्ट-

पक्षधर्मताज्ञानात्मकपरामर्शस्यानुमितिहेतुत्वसाधनं च क्रमशः प्रपञ्चितम्। ततः अर्थापत्ते-रतिरिक्तप्रमाणतां निराकृत्य केवलव्यतिरेक्यनुमाने तदन्तर्भावं चोपवर्ण्य केवलान्वयि-केवलव्यतिरेक्यनुमानभेदः अपि वर्णितः। ततो परमन्यायस्य परार्थानुमानस्य पञ्चावयवाः प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाः, अवान्तरभेदसहिताः पञ्च हेत्वाभासाः सलक्षणं साङ्गोपाङ्गं विमृष्टाः। अनुमानेनैव ईश्वरः जगत्कर्ता जगद्गोप्ता संसाधितः, अपवर्गः तदीयपरमपुरुषार्थता च प्रतिपादिता।

ततः तृतीयखण्डे उपमानप्रमाणनिरूपणावसरे मीमांसकानां जरन्नैयायिकानां पक्षानाक्षिप्योपमानस्य प्रामाण्यं प्रपञ्चितम्।

तुरीये च शब्दखण्डे वैदिकशब्दानामेव केवलं प्रामाण्यमिति प्रतिपादयतां मीमांसकानामभिमतं निरस्य, बौद्धवैशेषिकाद्यभिमतनिरसनपुरःसरं शब्दस्य प्रामाण्यं निरूपितम्। प्रसङ्गादत्र वाक्यार्थबोधसहकारिणाम् आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्याणां प्रतिपादनं, वेदपौरुषेयत्वप्रतिष्ठा, शब्दानित्यत्ववादः, वेदस्य प्रवाहनित्यता, कार्यान्वयवाद-खण्डनमुखेन इष्टसाधनताज्ञानस्य प्रवर्तकता, लिङर्थविचारश्चेति विषयाः वैशद्येन साधूप-वर्णिताः। जातिशक्तिवादनिरासव्याजेन पदानां जात्याकृतिविशिष्टव्यक्तौ शक्तिरिति वादः, तत्प्रसंगात् शक्तिलक्षणे, आख्यातार्थः, धात्वर्थः, उपसर्गाणां द्योतकत्वमित्यादयोऽपि विषयाः गङ्गेशेन विशदीकृताः।

इतरमतव्यूदासव्याजेन प्रमाणतत्त्वविमर्शाय प्रवृत्तेऽस्मिन् ग्रन्थे पूर्वपक्षीयाणां पूर्वभाविनां च ग्रन्थानां ग्रन्थप्रणेतृणां वा नामोल्लेखं विनापि तेषां सिद्धान्ता इह निर्दिष्टाः,

क्वचित्ते समर्थिताः क्वचिच्च विमर्दिताः अपि। तत्त्वचिन्तामणिग्रन्थेऽस्मिन् तत्र तत्र स्थलेषु वाचस्पतिमिश्रस्य, जरन्नैयायिकजयन्तभट्टस्य, रत्नकोशकारस्य, सौन्दडोपाध्यायस्य, शिवादित्यमिश्रस्य च परामर्शः स्पष्टं बोधविषयतां याति।

**तत्त्वचिन्तामणेः प्रभावः –**

प्राभाकरभाट्टादिमीमांसकानां प्राचीननैयायिकानाञ्च मतव्युदासपुरःसरं प्रमाणतत्त्वं व्युत्पादयता गङ्गेशोपाध्यायेन प्रणीतः अन्वर्थनामा चिन्तामणिग्रन्थः नव्यन्यायशास्त्रस्यादिम आकरभूतश्च स्वभासा भासतेतराम्। प्राचीनानां लक्षणेषु अव्याप्त्यादीन् दोषानुद्भाव्य ग्रन्थे तत्परिष्करणे चातुरी ग्रन्थकर्तुः विद्वन्मनोहारिणी। निसर्गत एव चिन्तामणिप्रादुर्भावादनन्तरं मणिरसास्वादनलम्पटाः प्रचण्डपण्डिताः सर्वे साक्षात्परम्परया वा तद्व्याख्याननिबन्धनेन विमलं यशः प्राप्तुमैच्छन्। किं बहुना! गङ्गेशानन्तरभाविनः अन्ये शास्त्रकर्त्तारः अपि तदीयपरिष्कारशैल्याकृष्टचेतसः स्वस्वकृतीषु तादृशपरिष्कारशैलीसमावेशमकुर्वन्, ग्रन्थ-रचनशैल्यामपि मणिमेवान्वगच्छन्। रसगङ्गाधराद्वैतसिद्ध्यादिप्रौढप्रबन्धा एवात्र निदर्शन-स्वरूपाः। वादेषु बहुषु उदयनाचार्यप्रदर्शितामेव सरणिमवलम्ब्य परिष्कारो विहित इत्ययं विषयः सूक्ष्मेक्षिकया प्रामाण्यवादप्रमालक्षणवादादिग्रथावलोकनेन सुज्ञानः।

प्राचीनग्रन्थेषु विस्तृतमुपपादितानां विषयाणां मितेन वचसा सनिष्कर्षं प्रतिपादनमपि चिन्तामणिग्रन्थस्य वैशिष्ट्यम्। प्राचीनग्रन्थस्थायास्त्रुटेः परिपूरणमपि चिन्तामणेर्विलक्षणत्वख्यापकम्। अत्र भाषा पारिभाषिकपदसन्निवेशेन किञ्चित्कठिना, परं

नातिकठिना नातिसरला वा। रचनाशैली बहुत्र न्यायकुसुमाञ्जलिमनुसरन्त्यपि वस्तुतस्तु ततोऽप्यतिशायिन्येव। ग्रन्थस्यैवं गाम्भीर्यं यन्मणेरेकं वाक्यमवलम्ब्यैव शताधिकैः पुटैर्विवरणं सम्भवति व्याख्यातृणाम्। किं बहुना! तत्त्वचिन्तामणिग्रन्थस्य महिमातिशयं पुनःपुनरालोडनजनितानुभवैकवेद्यं स्ववाचा प्रकटयितुमसमर्था एव वयम्।

**तत्त्वचिन्तामणिश्रितकृतयः –**

मुख्यप्रतिपाद्यतया प्रमाणमवलम्ब्य सम्भावितसमस्तविप्लवविध्वंसनपुरःसरं गङ्गेशोपाध्यायाः सम्प्रदायप्रथिते प्राक्तने मार्गे परिष्कारमाधातुं तत्त्वचिन्तामणिनामकं पाण्डित्यप्रकर्षप्रख्यापकं लोकप्रसिद्धसकलग्रन्थातिशायिवैभवभासुरं ग्रन्थं न्यभान्त्सुः इति विज्ञातमेव विदुषां समेषाम्। तत्त्वचिन्तामणिः ग्रन्थरत्नो यदा प्रादुर्बभूव तत एव सर्वेऽपि प्रचण्डपण्डिताः विद्वत्तल्लजाः साक्षात्परम्परया वा चिन्तामणिव्याख्यानविरचनेन आत्मनः कृतविद्यानमन्यन्त।

प्रसिद्धासु मणिव्याख्यासु प्रथमतः गङ्गेशोपाध्यायात्मजस्य वर्धमानोपाध्यायस्य न्यायनिबन्धप्रकाशादिप्रणेतुः तत्त्वचिन्तामणिव्याख्या प्रकाशाख्या, मैथिलस्य प्रसन्नराघवव्याख्यातुश्चन्द्रालोकप्रणेतुः महादेवमिश्रपुत्रस्य जयदेवाद्यपराभिधस्य पक्षधरमिश्रस्य आलोकनाम्नी व्याख्या, वङ्गीयस्य नवद्वीपनिवासिनो रघुनाथशिरोमणिगुरोर्वासुदेवसार्वभौमस्य परीक्षापराभिधा तत्त्वचिन्तामणिद्वारावलीनाम्नी व्याख्या, गङ्गेशोपाध्यायकालिकस्य मैथिलस्य वटेश्वरोपाध्यायस्य मणिदर्पणमिति समाख्याता चिन्तामणिव्याख्या,

वासुदेवसार्वभौमात्मजस्य ज्ञानेश्वरस्य उद्योतनाम्नी चिन्तामणिव्याख्या, कारिकावली-न्यायसूत्रवृत्तिकारविश्वनाथभट्टाचार्यजनकस्य विद्यानिवासभट्टाचार्यस्य विवेचनीति संज्ञिता तत्त्वचिन्तामणिव्याख्या, पण्डितशिरोमणेः रघुनाथशिरोमणेः तत्त्वचिन्तामणिदीधितिनाम्नी व्याख्या, दीधितिकालसामयिकस्य नरपतिमिश्रसूनोः प्रगल्भमिश्रस्य प्रागल्भीति प्रसिद्धा बालबोधिनीति संज्ञिता प्रत्यक्षभागान्ता मणिव्याख्या, यज्ञपत्युपाध्यायात्मजस्य नरहरिमिश्रस्य पितृमतप्रतिष्ठापनी दूषणोद्धारनाम्नी चिन्तामणिव्याख्या, पक्षधरभ्रातुष्पुत्रस्य पक्षधरशिष्यस्य वासुदेवमिश्रस्य मणिव्याख्यानव्याजेनालोकटीकायामुद्भावितदूषण-खण्डनात्मिका न्यायसिद्धान्तसाराख्या व्याख्या, खण्डनोद्धारादिबहुविधग्रन्थप्रणेतुर्वत्स-गोत्रजस्य गिरिपतिपुत्रस्य मैथिलस्य शङ्करमिश्रकालिकस्य द्वितीयवाचस्पतिमिश्रस्य व्याख्या प्रकाशाभिधा, वासुदेवसार्वभौमान्तेवासिनः वङ्गीयस्य हरिदासन्यायालङ्कारस्य मणिव्याख्या मणिप्रकाशाख्या, काश्यपवंशजस्य बटेश्वरोपाध्यायप्रपौत्रस्य मैथिलस्य यज्ञपत्युपाध्यायस्य प्रभानाम्नी चिन्तामणिव्याख्या, मैथिलस्य प्रकाण्डपण्डितस्य वैशेषिकोपस्कारकर्तुः व्याख्या श्रीशङ्करमिश्रस्य चिन्तामणिमयूखाख्या, श्रीरामतर्कालङ्कारसूनोः श्रीराम-रघुनाथशिष्यस्य नवद्वीपनिवासिनः मथुरानाथतर्कवागीशस्य माथुरीति प्रसिद्धा मण्यर्थावबोधे महदुपकारिणी रहस्याख्या तत्त्वचिन्तामणिव्याख्या, मैथिलस्य पक्षधरशिष्यस्य रुचिदत्तमिश्रस्य प्रकाशाख्या तत्त्वचिन्तामणिव्याख्या, वङ्गदेशजस्य वासुदेवसार्वभौमशिष्यस्य रघुनाथशिरोमणि-सहाध्यायिनः कणादतर्कवागीशस्य तत्त्वचिन्तामणिव्याख्या, रामकृष्णभट्टाचार्यस्य रघुनाथ-शिरोमणिपुत्रस्य प्रकाशाख्या तत्त्वचिन्तामणिव्याख्या, पद्मनाभमिश्रस्य बलभद्रपुत्रस्य परीक्षाख्या चिन्तामणिव्याख्या, रुचिदत्तमिश्रपुत्रस्य रघुपतिमिश्रस्यापि परीक्षाख्या अपरा

तत्त्वचिन्तामणिव्याख्या, नवद्वीपवासिनः कुसुमाञ्जलिव्याख्याकाररामभद्रसार्वभौमजनकस्य जानकीनाथभट्टाचार्यस्य मणिमरीचिनाम्नी तत्त्वचिन्तामणिव्याख्या च त्रयोदशशतकादारभ्य पञ्चदशशतकं यावद्विरचिताः। ततः, षोडशशताकादारभ्य ऊनविंशशतकं यावत् या व्याख्या विरचिताः, तासु यादवविद्यावागीशद्वितीयपुत्रस्य शब्दशक्तिप्रकाशिकाकर्तुः रामभद्रसार्वभौम-भवानन्दसिद्धान्तवागीशशिष्यस्य जगदीशभट्टाचार्य्यस्य मयूखनाम्नी तत्त्वचिन्तामणिव्याख्या, रघुदेवन्यायालङ्कारगदाधरभट्टाचार्ययोर्गुरोः नवद्वीपवासिनो हरिरामतर्कवागीशस्य विचाराख्या व्याख्या, पीताम्बरविद्यानिधिपुत्रस्य नवद्वीपवासिनः तान्त्रिकविद्वत्कुलावतंसस्य पदवाक्यप्रमाणकाव्यधर्माद्यखिलशास्त्रविदुषो न्यायकुसुमाञ्जलि-टिप्पणीप्रणेतुः गोकुलनाथोपाध्यायस्य चक्ररश्मिनाम्नी चिन्तामणिव्याख्या, रघुदेव-न्यायालङ्कारस्य कुसुमाञ्जलि-पदार्थतत्त्वनिरूपण-आलोकादिव्याख्यातुः गूढार्थदीपिकाख्या मणिव्याख्या, वङ्गदेशीयस्य हरिरामतर्कवागीशशिष्यस्य जीवाचार्यात्मजस्य गदाधर-भट्टाचार्यस्य गादाधरीति सुप्रसिद्धा सर्वजनविदिता तत्त्वचिन्तामणिव्याख्या, महामहोपाध्यायरामपतिपुत्रस्य वङ्गदेशीयस्य विष्णुपतिपण्डितस्य चिन्तामणिशब्दखण्ड-व्याख्या तत्त्वदीपननाम्नी, उमापतिपुत्रस्य कौण्डिन्यगोत्रजस्य काशीपतिकविराजस्य चिन्तामणिव्याख्या न्यायकल्पतरुसंज्ञिता, कर्णाटकदेशीयस्य व्यासरायात्मजस्य तर्कसंग्रह-दीपिकाव्याख्यातुः हनूमद्भट्टस्य हनूमदीया इति प्रसिद्धा चिन्तामणिव्याख्या वाक्यार्थदीपिकाख्या च व्याख्याः तत्त्वचिन्तामणिमाश्रित्य विरचिताः। एतत्सर्वं विविच्य वक्तुं शक्यते यत् तत्त्वचिन्तामणिः तदानीं पाण्डित्यनिकषग्रावा बभूवेति नातिशयोक्तिः।

## १.३. श्रीरघुनाथशिरोमणिः

आयतनेन विषयगाम्भीर्येण च महतः तत्त्वचिन्तामणेः व्याख्यासु एकैव व्याख्या षड्शतं वर्षेभ्यः जगति सर्वैराद्रियमाणाधीयमाना चास्ति, यया व्याख्यया एव वङ्गदेशे नव्यन्यायस्य प्राणप्रतिष्ठा, यया च विद्वत्तल्लजेषु भारतव्यापिषु वङ्गदेशस्य स्थानमनुपमं महदुच्चैर्वरीवर्त्ति, सा हि व्याख्या चिन्तामणिदीधित्याख्या सुप्रसिद्धा भवे। वङ्गदेशवास्तव्यः श्रीवासुदेवसार्वभौम-पक्षधरमिश्रान्तेवासी श्रीरघुनाथशिरोमणिभट्टाचार्यः तार्किकसम्प्रदाय-शिरोमणिः तत्त्वचिन्तामणिदीधितिनाम्नीमेनां तत्त्वचिन्तामणेष्टीकां वितेने। रघुनाथ-शिरोमणिरसौ नैष्ठिकब्राह्मणः नदियान्तःपातिशान्तिपुराभिजनः श्रीगोविन्द-सीतादेव्योः आत्मजः। रघुनाथात्मजो रामकृष्णभट्टाचार्यो न्यायदीपिकारचयितापि महान् विद्वानासीत्। बाल्यकाल एवासौ बालो रघुनाथः पितृसहायविहीनो जनन्या महता कृच्छ्रेण पोषितः। एवं किंवदन्ती, बुद्धिमानसौ बालो रघुनाथः कदाचित् जनन्या वह्नेरानयनाय श्रीवासुदेव-सार्वभौमनिवासं प्रेरितः। रिक्तहस्तं तत्रोपस्थितं तं वलोक्य ननु वह्निं कथं नेष्यसि इति श्रीवासुदेवसार्वभौमेन रघुनाथो जिज्ञासितः। सपदि बुद्धिमानसौ रघुनाथः सिकताः करे संस्थाप्य सिकतोपरि नेष्यामीति प्रत्युवाच। तदा तदीयां तीक्ष्णां प्रत्युत्पन्नां मतिं निशाम्य नितरां सन्तुष्टः श्रीवासुदेवसार्वभौमस्तं स्वशिष्यत्वेन गृहीत्वा सादरं सर्वाणि शास्त्राणि अध्यापयामास। गुरोः शास्त्राण्यधीत्याखिलानि गुर्वाज्ञामादाय मिथिलां गत्वा तत्र पक्षधर-मिश्रस्य शिष्यत्वं गृहीत्वा न्यायशास्त्रं विशेषतो सम्पूर्णं नव्यन्यायशास्त्रमधिजगे। एवमपि

किंवदन्ती प्रसिद्धा, पक्षधरादध्येतुं समागते रघुनाथे आजन्मन एकलोचनं तं पक्षधरमिश्रः तिर्य्यग्भावेन पप्रच्छ –

**आखण्डलस्सहस्राक्षः विरूपाक्षस्त्रिलोचनः ।**

**अन्ये द्विलोचनास्सर्वे को भवानेकलोचनः । ।**[7] इति ।

श्रुत्वैव सपदि शिरोमणिरुवाच सविनयं –

**कुशद्वीप-नलद्वीप-नवद्वीप-निवासिनः ।**

**तर्कसिद्धान्त-सिद्धान्त-शिरोमणिमनीषिणः । ।**[8] इति ।

तदा रघुनाथस्य विनयेन ज्ञानेन च सन्तुष्टः पक्षधरमिश्रः तं न्यायशास्त्रमध्यापयितुं शिष्यत्वेन साग्रहमङ्गीचक्रे। अध्ययनविधौ गुरुमुखात्पाठं श्रृण्वन् स्वल्पेनैव कालेन सामान्यलक्षणा-प्रत्यासत्तिं खण्डयामास रघुनाथशिरोमणिः। तदा क्रुद्धः पक्षधरमिश्रस्तं पप्रच्छ –

**वक्षोजपानकृत् काण संशये जाग्रति स्फुटम् ।**

**सामान्यलक्षणा कस्मादकस्मादवलुप्यते । ।**[9] इति ।

गुरोराचरणेन ईषत्खिन्नः प्रत्युवाच शिरोमणिरपि सविनयं –

**योऽन्यं करोत्यक्षिमन्तं यश्च बालं प्रबोधयेत् ।**

---

[7] व्याप्तिपञ्चके, भूमिकांशे, राजेन्द्रनाथघोषसम्पादिते, पृ 50

[8] तत्रैव, पृ 50

[9] तत्रैव, पृ 51

**तमेवाध्यापकं मन्ये तदन्ये नामधारिणः । ।**[10] इति ।

एवमपि किंवदन्ती श्रूयते, कदाचित् न्यायनिष्णातस्य रघुनाथस्य काव्यशास्त्रेऽपाटवं मन्यमानेन गुरुणा उपहसितः रघुनाथशिरोमणिः गुरोर्भ्रमं दूरीकर्तुं श्लोकेनाह –

**कवित्वं कियदौन्नत्यं चिन्तामणिमनीषिणः ।**

**निपीतकालकूटस्य हरस्येवाहिखेलनम् । ।**[11] इति ।

अपि च,

**काव्येऽपि कोमलधियो वयमेव नान्ये**

**तर्केऽपि कर्कशधियो वयमेव नान्ये ।**

**तन्त्रेऽपि यन्त्रितधियो वयमेव नान्ये**

**कृष्णेऽपि संयतधियो वयमेव नान्ये । ।**[12] इत्येवम् ।

एवमन्या अपि किंवदन्त्यः रघुनाथाश्रयिण्यः प्रसिद्धाः, व्याप्तिपञ्चकादिग्रन्थेषूप-निबद्धाश्च, परमिह प्रबन्धविस्तारभिया नोच्यन्ते । तेन यद्यपि वासुदेवेन वङ्गे न्यायस्याध्ययनं प्राथम्येन प्रारब्धं, तथापि वङ्गे नव्यन्यायचर्चायाः प्रतिष्ठातासौ रघुनाथशिरोमणिरेव ।

यद्यपि भट्टाचार्य्येति चक्रवर्त्तीति वा रघुनाथस्योपाधिः प्रसिद्धा, तथापि तदीयानन्य-साधारणया कर्कशतर्कचातुर्या परितोषिता पण्डितमण्डली अमुं शिरोमणीत्युपाधिना

---

[10] व्याप्तिपञ्चके, भूमिकांशे, राजेन्द्रनाथघोषसम्पादिते, पृ 51

[11] तत्रैव, पृ 52

[12] तत्रैव, पृ 52

भूषयामास। शिरोमणेः श्रेष्ठतमा कृतिः तत्त्वचिन्तामणेर्विवरणात्मिका विवेचनात्मिका प्रगाढपाण्डित्यप्रकर्षपूर्णा व्याख्या दीधितीति संज्ञिता, कालान्तरे या स्वयम् आकरग्रन्थवत् पाण्डित्यनिकषग्रावतां गता। प्राचीनव्याख्याभेदपराकरणमुखेन विषयशोधनपरः शिरोमणिः स्वकृतौ स्वगुरूणामपि मतं दूषयमासेति स्पष्टं व्याप्तिपक्षधर्मतादिप्रकरणेषु। परन्तु मणिव्याख्याता शिरोमणिः न सम्पूर्णां मणिं विवृणोतीति तदीयग्रन्थाध्ययनेनैव सुस्पष्टम्। केवलव्यतिरेकि-अर्थापत्ति-हेत्वाभासानामसाधकता-शक्ति-मोक्षादीनां प्रकरणानां व्याख्या दीधितावनुपस्थिता। बहुषु स्थलेषु मूलमणिग्रन्थेन विसंवादः अपि स्फुटं दरीदृश्यते शिरोमणेः। तथापि, अनुमितिलक्षण-व्याप्त्यादिप्रकरणेषु मणिग्रन्थस्थवाक्यान्युद्धृत्य कतिपयानि या परिष्कारशैली तत्र समाश्रिता, समादृता सा सर्वत्र शास्त्रान्तरेषु। किञ्च, सैव शैली सकलदार्शनिकानां सन्मार्गसन्देशिनी विशेषतो नैय्यायिकलोकानन्दसन्दायिनी च। अत एव व्याख्याव्यपदेशेन अयं स्वचन्त्र मूलग्रन्थोपम एवेत्यपि प्रसिद्धिः विदुषां निकाये।

न केवलं तत्त्वचिन्तामणेदीधितिः, अपि तु पदार्थखण्डनम्, आत्मतत्त्वविवेकटीका, प्रामाण्यवादः, नानार्थवादः, क्षणभङ्गुरवादः, आख्यातवादः, व्युत्पत्तिवादः, नञ्वादः, लीलावतीटीका, अवच्छेदकत्वनिरुक्तिः, खण्डनखण्डखाद्यदीधितिः, न्यायकुसुमाञ्जलि-टीका, गुणकिरणावलीप्रकाशदीधितिः, न्यायलीलावतीप्रकाशदीधितिः, न्यायलीलावती-विभूतिः, ब्रह्मसूत्रवृत्तिः, मलिम्लुचविवेकः इत्येते नैके ग्रन्था अपि रघुनाथेन विरचिताः, परं सम्प्रति कालकवलिताः नोपलभ्यन्ते।

यद्यपि श्रीरघुनाथशिरोमणेः आविर्भावादिकालविषये विदुषां विवादः सुलभः, तथापि नवत्यधिकद्वादशशताब्दीतः पञ्चाशदधिकत्रयोदशशताब्दीपर्यन्तं कालः रघुनाथस्य इत्यभ्युपगमः न्यायवैशेषिकनिकाये।

**दीधितिश्रितकृतयः –**

श्रीरघुनाथशिरोमणिकृतायाः तत्त्वचिन्तामणिदीधितेरन्यूनाः त्रिंशद्भ्योऽप्यधिकाः व्याख्याः टीका वा प्राप्यन्ते। तासु कृष्णदाससार्वभौमभट्टाचार्येण प्रणीता काचन दीधित्यनुमानखण्डव्याख्या प्रसारिण्याख्या प्रसिद्धा। यजुर्वेदिना काश्यपगोत्रजेन मैथिलेन काव्यप्रकाशरहस्य-शब्दशक्तिप्रकाशिका-तर्कामृतादिकर्त्रा श्रीजगदीशभट्टाचार्येण विरचिता दीधितिव्याख्या प्रकाशिकाख्या जागदीशीति प्रसिद्धा सुलभा। आलोकसारमञ्जर्यादिकर्त्रा जगदीशभट्टाचार्यगुरुणा श्रीभवानन्दसिद्धान्तवागीशेनापि सम्पादिता काचन दीधितिव्याख्या गूढार्थप्रकाशाख्या भवानन्दीति प्रसिद्धा मुद्रितोपलभ्यते। अस्या व्याख्यायाः सम्प्रदायेषु दीधितिव्याख्यासु च सुप्रसिद्धं महत्त्वं कारिकायां दृश्यते -

**गुणोपरि गुणानन्दी भवानन्दी च दीधितौ।**

**सर्वत्र मथुरानाथी जागदीशी क्वचित् क्वचित्।।**[13] इति।

[13] कारकचक्रे, लेखकपरिचित्यंशे

सन्यासाश्रमस्वीकारात्प्राक् गोविन्दशास्त्रीति प्रसिद्धेन, सन्यासस्वीकारादनन्तरं नारायणतीर्थ इत्यभिधया प्रसिद्धेन नीलकण्ठसूरिपुत्रेण वाराणसीवासिना भाषापरिच्छेदव्याख्या-भाट्टभाषाप्रकाशिकयोः कर्त्रा दीधितिव्याख्या काचन सामान्यलक्षणान्ता सम्प्रणीता। न्यायवेदान्तसाहित्यज्योतिषमीमांसासु पण्डितेन मैथिलेन विद्यानिधिपीताम्बरोपाध्यायात्मजेन उमागर्भजेन श्रीगोकुलनाथोपाध्यायेन विरचिता काचन दीधितिव्याख्या या विद्यातनाम्नी प्रसिद्धा। काश्यपगोत्रजेन श्रीरामतर्कालङ्कारात्मजेन चिन्तामण्यालोक-न्यायलीलावतीप्रकाश-न्यायलीलावतीप्रकाशदीधिति-किरणावली-प्रकाश-बौद्धाधिकारसिद्धान्तरहस्यादिग्रन्थकर्त्रा श्रीमता मथुरानाथतर्कवागीशेन कृता माधुरीफक्किकेति प्रसिद्धा दीधितिव्याख्या अमुद्रिता कासुचिन्मातृकासंरक्षणशालासु लभ्यते, यत्र अनुमानपरिच्छेदे अनुमितिप्रकरणात् आरभ्य अवच्छेदकतानिरुक्तिपर्यन्तमेवोपलभ्यते व्याख्यानम्। श्रीगोविन्दतर्कालङ्कारभट्टाचार्यसुनूना जानकीनाथीयन्यायसिद्धान्तमञ्जरीप्रणेत्रा नृसिंहपञ्चाननभट्टाचार्येण प्रपञ्चिता दीधितिव्याख्या सारिकाख्या सम्प्रदाये प्रसिद्धा। देवीदाससुनूना रघुनाथशिरोमण्यन्तेवासिना न्यायलीलावतीदीधिति-गुणकिरणावली-न्यायदीपिका-तर्कामृतप्रणेत्रा बहुवादकर्त्रा मैथिलेन सर्वतन्त्रस्वतन्त्रेण रामकृष्ण-भट्टाचार्येणापि लीलावत्यपराभिधा काचन दीधितिव्याख्या प्रणीता। आलोक-न्यायलीलावती-गुणकिरणावलिप्रकाश-आमतत्त्वविवेकदीधितीनां व्याख्याकर्त्रा गौडदेश-जेन श्रीगुणानन्दविद्यावागीशेन दीधित्यनुमानखण्डव्याख्या विवेकाख्या प्रणीता या खलु आत्मतत्वविवेकव्याख्यायां उल्लिखिता। श्रीगदाधरभट्टाचार्य्यसमकालिकेन रघुदेव-न्यायालङ्कारेण तत्त्वदीपिकाख्या तत्त्वचिन्तामणिसहितदीधितिव्याख्या सम्प्रदायेषु

सुप्रसिद्धा। विद्यानिवासभट्टाचार्यात्मजेन विश्वनाथभट्टाचार्येण विरचिता काचित् मणिदीधितितात्पर्यानुगामिनी व्याख्यापि बहुत्र कलाशालासु प्राप्यते। विद्यानिवासभट्टाचार्यज्येष्ठपुत्रेण विश्वनाथभट्टाचार्य्यज्येष्ठभ्रात्रा आलोककिरणावली-कुसुमाञ्जलिकारिका-नञ्वाद-पदार्थखण्डन-लीलावतीप्रकाशादीनां टीकायाः वादपरि-च्छेदस्य च कर्त्रा रुद्रन्यायवाचस्पतिना दीधितिव्याख्या परीक्षाख्या काचित् प्रपञ्चिता इति प्रसिद्धिः।

रामरुद्रतर्कवागीशेन दीधितेर्व्याख्यात्मको रौद्रीत्यपराभिधो बन्धो शब्दखण्डान्तः वबन्धे। लौगाक्षिभास्करगुरुणा रामभद्रभट्टाचार्यशिष्येण न्यायसिद्धान्तमाला-आलोक-व्याख्या-पदार्थमाला-कुसुमाञ्जलिकारिकाव्याख्या-गुणकिरणावलीप्रकाशव्याख्या-आख्यातवादीका-काव्यप्रकाशव्याख्यादिप्रणेत्रा जयरामन्यायपञ्चाननेन प्रपञ्चिता काचन दीधितिव्याख्या गूढार्थविद्योतनाख्या। सुबुद्धिमनोरमाख्या काचन दीधितिव्याख्या तर्कसंग्रह-दीपिका-आलोकव्याख्यादिकर्त्रा सुप्रसिद्धेन नैयायिकेन आन्ध्रदेशजेन काशीनिवासिना अन्नम्भट्टेन विरचिता इति प्रसिद्धिः। कौण्डिन्यवंशावतंसो रामभट्टात्मजो नीलकण्ठीति प्रसिद्धायाः तर्कसंग्रहदीपिकाव्याख्यायाः प्रणेता गादाधरीजागदीशीव्याख्याता श्रीनीलकण्ठभट्टः अपि चक्रे दीधितिव्याख्यामेकाम् इति किंवदन्ती सम्प्रदाये। प्रतिविम्बाख्या अनुमानदीधितेर्व्याख्या रघुनाथविद्यालंकारप्रणीता वाराणस्यां संरक्षणशालायां प्राप्यते। लक्ष्मीधरतनयेन विश्वश्वरपण्डितेन प्रवेशाख्या दीधितिव्याख्या प्रणीता, एषापि अप्रकाशिता वाराणस्यां संरक्षणशालायां लभ्यते। अपरा काचन

चिन्तामणिदीधितिव्याख्या विवेचनाख्या श्रीरामचन्द्रसिद्धान्तवागीशग्रथिता प्रत्यक्षखण्डान्ता सुप्रसिद्धा सम्प्रदाये।

## १.४. श्रीमथुरानाथतर्कवागीशः

श्रीवासुदेवसार्वभौम-श्रीरघुनाथशिरोमणिशिष्यस्य श्रीरामतर्कालङ्कारस्य सूतेन श्रीरघुनाथशिरोमणेः पितुश्चाधीतशास्त्रेण काश्यपवंशावतंसभूतेन वङ्गदेशान्तर्गतनवद्वीप-निवासिना मथुरानाथतर्कवागीशेन प्रणीता काचित् रहस्याख्या तत्त्वचिन्तामणेर्व्याख्या। सम्प्रदायेषु माथुरीति प्रसिद्धाया रहस्याख्याया अस्या व्याख्यायाः बह्वीषु मातृकासु माथुरी फक्किकेति नामान्तरमपि प्रसिद्धम्। तत्त्वचिन्तामण्यर्थावबोधे महदुपकारिणीयं व्याख्या। मूलग्रन्थे समुद्भावितानां शङ्कापत्त्यादीनां समाधानापेक्षया सरलया शैल्या मूलार्थप्रकाशन एव व्याख्याया अस्याः समधिकप्राधान्यं दरीदृश्यते। सौन्दडोपाध्यायं हरिनाथोपाध्यायं च बहुत्रोद्धृत्य निर्दिशति ग्रन्थकारः मथुरानाथतर्कवागीशः।

अत्रेदमवधेयं, न केवलं तत्त्वचिन्तामणिव्याख्या माथुरीति नाम्नी, अपि तु मथुरानाथतर्कवागीशेन कृता माधुरी फक्किकेति तत्त्वचिन्तामणिदीधितिव्याख्यापि अमुद्रिता मातृकासंरक्षणशालासु लभ्यते। तत्र ग्रन्थे हरिनाथोपाध्यायं सौन्दलोपाध्यायं च उद्धृत्य अनुमितिप्रकरणादारभ्यावच्छेदकतानिरुक्तिपर्यन्तं व्याख्यानमुपलभ्यते।

एवं किंवदन्ती प्रसिद्धा, कदाचित् गुरोः रघुनाथशिरोमणेः पाठशालायां कश्चित् पण्डितः समागम्य पूर्वपक्षव्याख्यानं श्रावयित्वा उत्तरं प्रपच्छ। तदानीमेव उत्तरस्यास्फुरणात्

रघुनाथशिरोमणिः परमागन्तुमागन्तुकमुवाच। तदानेन गुरोः अवमाननमेतत्, गुरोरवमाननं शिष्येणैव दूरीकरणीयमिति मत्वा मथुरानाथ तस्यागन्तुकप्रश्नस्योत्तरं व्याख्यानमतिशयानुपममुदीर्य एतद्गुरोरेवाभिमतं, समयाभावात् गुरुचरणः अन्यत्र लग्नमानसः, परं पुनरागम्य गुरोः सम्यक्तया शास्त्रमवधेयमिति प्रोवाच। तदा गुरुः रघुनाथशिरोमणिः सातिशयचकितः मथुरानाथं तदीयप्रतिभाप्रभाभासितमाननञ्च निशाम्य तस्य पितृप्रदत्तं नाम प्रपच्छ। परन्तु तेन मथुरानाथमनसि खेदः कश्चित् समुपजायत। एतवत्कालं गुरोरधीयानः अपि स गुरोरप्रियः, तन्नाम अपि गुरोरज्ञातमिति महत्खेदावहः अयं विषयः इति पित्रे निवेदितं तेन। तदानीं गुरोः दीधितिं पठता एव छात्रदशायां माथुरीफक्किकां नाम दीधितिरहस्यं रचयन्नासीत्। अतः तत्पिता सपद्येव तत्समाप्य मूलग्रन्थस्य तत्त्वचिन्तामणेः रहस्यं प्रणेतुं मथुरानाथमादिदेश। पित्रादेशं शिरसि वहन्नेव श्रीमथुरानाथतर्कवागीशः तत्त्वचिन्तामणिरहस्यं प्रणिनायेति प्रसिद्धम्। वस्तुतस्तु माथुरीसहायेनैव तत्त्वचिन्तमणिः मणिदीधितिश्च सरलतया गम्यत इति सहृदयाः।

परिणते वृद्धे वयसि कृतदारपरिग्रहस्य मथुरानाथस्य कश्चित् तनयो बभूव, सोऽपि पितुराशिषा महान् नैयायिकः समपद्यत इति श्रुतिः। श्रूयते, जीवनस्यान्तिमो भागः पुत्रदारादिसहितेन मथुरानाथतर्कवागीशेन काश्यामेवातिवाहितः।

न केवलं रहस्याख्यं माथुरीति चिन्तामणेर्व्याख्यानम्, अपि तु चिन्तमण्यालोकरहस्य-किरणावलीप्रकाशरहस्य-न्यायलीलावतीप्रकाशरहस्य-न्यायलीला-वतीप्रकाशदीधितिरहस्य-सिद्धान्तरहस्य-आत्मतत्त्वविवेकदीधितिरहस्य-आयुर्दयभावना-

दीधितिरहस्य (माथुरी फक्किका)-आदिक्रियाविवेकग्रन्थानामपि व्याख्याबन्धं वबन्धे असौ मथुरानाथतर्कवागीशः।

यद्यपि मथुरानाथेन स्वयं स्वकीयकालविषये नोद्धृतं किमपि, तथापि रघुनाथशिष्यत्वात्तस्य रघुनाथपरभावित्वं सुनिश्चितम्। बभूव रघुनाथशिरोमणिश्च नवत्यधिकद्वादशशताब्दीतः पञ्चाशदधिकत्रयोदशशताब्दीपर्यन्तं राराजमानः, अतः मथुरानाथतर्कवागीशस्य समयः चतुर्दशशताब्द्या मध्यभाग इति अनुमातुं शक्यते।

**माथुरीश्रितकृतयः –**

विष्णुभट्टात्मजः पटवर्धनवंशजः गदाधरभट्टाचार्यभ्रातुष्पुत्रस्तथा गदाधरशिष्यः श्रीकृष्णभट्टः माथुरीटीकां व्याख्यातवान्, तच्च व्याख्यानममुद्रितमेव मातृकासंरक्षण-शालायां प्राप्यते। श्री‘छोटे’वामाचरणभट्टाचार्येण वितता विवृत्याख्या मनोरमाख्या च माथुरीव्याख्याद्वयी मुद्रितोपलभ्यते। एवं श्रीवामाचरणभट्टाचार्यस्य सुयोग्येन शिष्येण शिवदत्तमिश्रेण विरचिता व्याप्तिपञ्चकसिंहव्याघ्रलक्षणटीका काचन गङ्गानिर्झरिणी संज्ञिता प्रसिद्धा। एवं विश्वनाथझापण्डितस्य गुरुणा मैथिलेन श्रीगोलोकनाथोपाध्यायेन प्रणीता काचन न्यायरत्नाभिधा माथुरीव्याख्या अमुद्रिता मातृकासंरक्षणशालासूपभ्यते। एवमेव आधुनिकैः नैयायिकैरपि माथुरीमाश्रित्य निर्मलं यशो महदुपलब्धम्। यथा उमानाथपण्डित-जीवानन्दविद्यासागर-हरिरामशुक्लैरुपनिबद्धा माथुरीपञ्चलक्षणीव्याख्या व्याप्तिचन्द्रिकाख्या फक्किकाख्या व्याख्या सिंहव्याघ्रलक्षणव्याख्या च यथाक्रमं वाराणस्यां

कलिकातायाञ्च मुद्रिताः प्राप्यन्ते। श्रीकालीशङ्करभट्टेन व्याख्यातं माथुरीक्रोडपत्रमपि एकं वाराणस्यां मुद्रितं सुलभं सम्प्रदायविदाम्।

## १.५. श्रीभवानन्दसिद्धान्तवागीशः

अथ दीधितेरतिगभीरार्थायाः स्वल्पसंस्थानाया निःशेषार्थबोधे तथाविधसंक्षिप्तां टीकां व्याख्यां चापरिहार्यां मन्यमानाः श्रीभवानन्दसिद्धान्तवागीशास्तार्किकशिरोमणयः विपश्चिदपश्चिमास्तथा विलक्षणव्याख्यानैर्दीधितेरतिगभीरान् अर्थान् अशेषं प्रकाशयाञ्चक्रुर्यथा तदीयदुरुहार्थताया व्यपगमेन समं समजायत नव्यतार्किकसम्प्रदायस्य सर्वस्यैव तत्रैव महती गौरवबुद्धिः सुसमिद्धा श्रद्धा च। किं बहुना, अद्यापि तत्त्वचिन्तामणिदीधितेः प्रकाशाख्यसुविख्यातव्याख्यानप्रजापतिः स्वतन्त्रमतिः श्रीभवानन्दसिद्धान्तवागीगभट्टाचार्य नः समश्नुते समालोचनगोचरताम्।

स एष श्रीभवानन्दसिद्धान्तवागीशभट्टाचार्यः खृष्टीयषोडशशतकोद्भवो (१५०० इत्यतः १५२५ इति खीष्टाब्दान्तर्गतसमयः) वङ्गेषु नवद्वीपधाम्नि तदानीं प्रसिद्धो नैयायिकमध्यमणिः समवर्ततेति विशुद्धसिद्धान्तः शुद्धबुद्धीनामैतिहासिकवृद्धानाम्। समाससाद प्रकाशाख्या तदीया दीधितिव्याख्या तदानीन्तनसमाजेषु प्रेक्षावत्सु महतीं सुख्यातिमिति प्रसिद्धः प्रचारः –

**गुणोपरि गुणानन्दी भावानन्दी च दीधितौ।**

**सर्वत्र मथुरानाथी जागदीशी क्वचित् क्वचित्।।**[14] इति।

भारतभूमौ षोडशशतकस्य श्रेष्ठः नैयायिकः भवानन्दसिद्धान्तवागीश एव। तस्य जनकः श्रीरमापतिभट्टाचार्य्यः। सिद्धान्तवागीशस्य द्वावात्मजावप्यास्तां श्रीरामतर्कालङ्कारः श्रीकृष्णन्यायवागीशः चेति। श्रीरामतर्कालङ्कारस्य पुत्रः रुद्रतर्कवागीशोऽपि नैयायिकसमाजे विशेषेण प्रसिद्धिं लेभे।

दीधितिव्याख्यातृषु श्रीभवानन्दसिद्धान्तवागीशस्य सर्वश्रेष्ठमासनमित्यस्य वादस्य सुतरामशक्यवचनत्वेऽपि दीधितिटीकाप्रणेतृषु तस्य सुमहती प्रशस्तिरासीदिति शक्यं निःसंशयमेव निर्वक्तुम्। दीधितिप्रकाशाख्या मणिदीधितिव्याख्या विजयपताकेव प्रचारयति श्रीभवानन्दस्य सर्वतः प्रभूतां पाण्डित्यप्रसूतामनार्त्तां कीर्त्तिम्। देशान्तरेषु सत्यपि दीधिति-प्रकाशस्य भवानन्दीयस्य तथा भूयसि प्रचारे वङ्गेषु तस्य नोपजातस्तथा प्रचार इति नितरां चकितचकिता वयमपि। श्रीभवानन्दसिद्धान्तवागीशादनन्तरं श्रीजगदीशतर्कालङ्कारः श्रीगदाधरभट्टाचार्यश्च दीधितिव्याख्याने द्वे प्रणीतवन्तौ, ततः स्वप्रवर्त्तितेषु सम्प्रदायेषु भवानन्दीयदीधितिप्रकाशमपास्य स्वस्वटीकाया एव भृशं प्रचारणेन, स्वव्याख्यानेष्वन्तरा-न्तरा प्रकाशपक्षप्रतिक्षेपेण दीधितिप्रकाशस्य बहुलः प्रचारो वङ्गेषु व्याहतिमापेदे। सिद्धान्तवागीशोऽपि तेन भृशं दुर्मनायितो वङ्गप्रदेशमपहाय स्वीयनिवासाय वाराणसी-माशिश्राय, नानादेशीयविद्यार्थिजनाधिष्ठाने तत्रैव पुण्ये धाम्नि स्वं सम्प्रदायं प्रवर्त्तयामास। ततस्तदीयशिष्योपशिष्यादिपरम्परया दीधितिप्रकाशस्य बाहुल्येन प्रचारः समजनिष्ट

[14] कारकचक्रे, लेखकपरिचित्यंशे

देशान्तरीयविद्वत्समाजेष्वेव, न वङ्गीयविद्वत्समाजेषु। वङ्गीयविद्वत्समवायः पुनः सविशेषालोचनया व्याख्यानविधौ जगदीशगदाधरयोरेव गुणातिशयविनिर्णयेन तत्रैव सुतरां रतिं भेजे, नान्यत्र, या तावदद्याप्यव्याहतमनुवर्तमाना समन्ततः सन्दृश्यते वङ्गेषु।

वागीशस्येव सिद्धान्तवागीशस्य सत्यपि नितरामनितरसाधारणे प्रौढपाण्डित्ये तस्य तान्त्रिकवीराचारपरायणतया तदानीन्तनाः सुप्रतिष्ठा नवद्वीपनिष्ठपण्डितप्रेष्ठाः तमिमं नवद्वीपाद्बहिश्चक्रुरित्यतो नास्य वङ्गेषु प्रतिष्ठा समजनिष्टेति केचिदितिहासरसिकाः। वस्तुत एतन्मतस्यासत्यत्वे अपि 'न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहत' इति न्यायेन कारणान्तरेण वा भवानन्दे आसीदेव तदानीमसूया गौडीयविदुषां, यया निर्दोषमपि प्रकाशं ते नोपादेयतया गृहीतवन्तः, दोषानध्यारोप्य च प्रत्याख्यातवन्तः। तदिदमुक्तं प्रकाशस्य टीकाकृता श्रीमता महादेवभट्टेन स्वकीयटीकाप्रारम्भे यथा –

**अनालोच्य सिद्धान्तवागीशवाण्यां वृथासूयितैः पण्डितैर्गौडजातैः।**

**यदुद्भासितं दूषणाभासवृन्दं तदुद्धारणार्थो ममोद्योग एष।।**[15] इति

न्यायवैशेषिकमीमांसादिशास्त्रे भवानन्दसिद्धान्तवागीशभट्टाचार्य्यस्य प्रज्ञा सुगभीरा अविस्मरणीयापरिमेया। दरीदृश्यमानो विविधेषु स्थानेषु सिद्धान्तवागीशानुकारिणः इति सम्प्रदायस्योल्लेखः अपि। तद्विरचितग्रन्थसम्भारः शब्दानुशासनशास्त्रे न्यायवैशेषिकशास्त्रे सम्पत्स्वरूपः। तदीयग्रन्थेषु कारकचक्रम् अन्यतमम्। कारकचक्रं विहायापि प्रत्यक्षालोक-सारमञ्जरी, अनुमानालोकसारमञ्जरी, शब्दालोकसारमञ्जरी, शब्दार्थसारमञ्जरी, अनुमान-

[15] प्रकाशटीकायां, प्रस्तावनांशे,

दीधितिसारमञ्जरी, लकारार्थवादः, व्यादिवादः, अवयववादः, कारकवादः, कारकवादार्थः कारकवादार्थनिर्णयः वा, दशलकारविचारः, आख्यातवादटिप्पणी, उदाहरणलक्षणटीका, उपनयनलक्षणटीका, उपाधिसिद्धान्तग्रन्थटीका, केवलान्वयिग्रन्थटीका, द्वितीयचक्रवर्त्तिलक्षणटीका तृतीयचक्रवर्त्तिलक्षणटीका, प्रथमप्रगल्भलक्षणटीका, तृतीयप्रगल्भलक्षणटीका, सत्प्रतिपक्षपूर्व्वग्रन्थटीका, सत्प्रतिपक्षसिद्धान्तग्रन्थटीका, सामान्यनिरुक्तिटीका, सव्यभिचारपूर्व्वग्रन्थटीका, प्रथमस्वलक्षणटीका, द्वितीयस्वलक्षणटीका, पक्षतापूर्व्वग्रन्थटीका, पक्षताग्रन्थरहस्यम्, प्रामाण्यवादरहस्यम्, प्रतिज्ञालक्षणटीका, सिद्धान्तलक्षणटीका, वादबुद्धिविचारः, मिश्रलक्षणम्, सङ्गतिलक्षणम् चाद्यापि प्रमाणयति यच्छ्रीमद्भवानन्दः विद्वदानन्दवर्धनः एव। परं करालकालकवलिता एता कृतयो न सम्प्रति विद्वद्धस्तगताः सन्ति।

**भवानन्दीश्रितकृतयः –**

एकदा समवर्त्तत महानादरः प्रचारश्च भारतान्तर्वर्तिसर्वप्रदेशेषु मणिदीधितिप्रकाशस्येति प्रतिपद्यते नानाप्रदेशीयग्रन्थशालासु तदीयसुप्राचीनप्रतिलिपीनां समुपलम्भेन। तथाहि महाराष्ट्रप्रदेशीयो नैयायिकवरः पुन्तामकरश्रीमहादेवभट्टो नाम भवानन्दीयदीधितिप्रकाशग्रन्थस्य भवानन्दीप्रकाशाख्यं विस्तृतं टीकाग्रन्थं, सर्वोपकारिणीति संक्षितां टीकाञ्च प्रणिनाय। तस्मादन्येऽपि भिन्नदेशीया दिनकरभट्ट-गुरुपण्डित-विश्वेश्वर-

विश्वनाथसुत-वीरेश्वर-कृष्णमित्राचार्यप्रभृतयो भवानन्दीयदीधितिप्रकाशमुपटीकाभिरलञ्चक्रुरिति प्रत्नतत्त्वगवेषकाणां सविशेषो निर्देशः।

देशान्तरेषु बहुविश्रुतस्य भवानन्दस्य वङ्गेष्वपि केचन शिष्याः सुप्रसिद्धा आसन्। येषु विद्वन्मोदतरङ्गिणीकारस्य श्रीचिरञ्जीवभट्टाचार्य्यस्य जनकः श्रीराघवेन्द्रशतावधानभट्टाचार्यः, पाटलिस्थो देवीदासविद्याभूषणश्च तेषु सुतरां प्रशस्तिमर्हति। तदेवं सत्स्वपि द्वित्रेषु भवानन्दशिष्येषु वङ्गीयेषु सम्प्रति नोपलभ्यन्ते, नापि समीक्ष्यते बङ्गेषु जगदीशगदाधरादिसम्प्रदाय इव भवानन्दीयः सम्प्रदायः। परं कृते तावद् व्याख्यानगुणविचारे तदीयः दीधितिप्रकाशग्रन्थो जगदीशगदाधरादिकृतदीधितिव्याख्यानग्रन्थान्नातिन्यूनगुणः प्रतिभायात्। अतः स एष भवानन्दीयः प्रकाशग्रन्थोऽपि जगदीशादिकृतदीधितिव्याख्यानमिव मणिदीधितितत्त्वप्रतिपत्त्या नव्यन्यायविद्याभिवृद्धये सुतरामुपयुज्यते। प्राचीनतरञ्चेदं व्याख्यानं तत्त्वचिन्तामणिदीधितेरिति सर्वथायं प्रकाशः प्रकाशनीय इति निर्धार्यास्माभिरिह कृतं प्रकाशसमीक्षणमिति श्रद्धाः साधुवादाश्च अस्मद्गुरुभ्यः।

## १.६. श्रीजगदीशतर्कालङ्कारः

सनातनमिश्रप्रपौत्रस्य माधवमिश्रपौत्रस्य यादवचन्द्रविद्यावागीशपुत्रस्य मैथिलस्य मिश्रान्वयावतंसस्य रघुनाथरुद्रेश्वरजनकस्य रामभद्रसिद्धान्तवागीशपितामहस्य काश्यपगोत्रोद्भवस्य रामभद्रसार्वभौमभवानन्दसिद्धान्तवागीशयोः प्रियतमशिष्यस्य श्रीजगदीश-

तर्कालङ्कारभट्टाचार्यस्य नाम येन न श्रुतं, वस्तुतस्तु न दर्शनशास्त्रज्ञ एव सः। महापुरुषस्य एतस्य प्रतिभाप्रभा न केवलं भारतवर्ष, अपि तु समग्रं विश्वं स्वयशोभासा भासयति।

श्रीजगदीशतर्कालङ्कारमाश्रित्य प्रसिद्धा किंवदन्तीयम्, अष्टवर्षदेशीयोऽयं बालो जगदीशः अनधीतविद्यः दुराचारी सन् कदाचित् पक्षिशावकानाहर्तुं वृक्षमारुह्य तत्रस्थं करालकालसदृशं कृष्णसर्पं निर्भयं स्वीयदृढमुष्ट्या ग्रीवायामाक्रम्य तालवृक्षे निघृष्य अच्छिनत् इति। तस्य निर्भीकतां प्रत्युत्पन्नां मतिञ्चावलोक्य सन्तुष्टेन केनापि महर्षिणा उपदिष्टः एवासौ विद्याभ्यासे तत्परोऽभूत्। पितृविहीनः बालः घोरदारिद्र्येण भृशं पीडितः दीपप्रज्वालनार्थं किञ्चित्तैलमपि क्रेतुमसमर्थः शुष्कवंशपत्राणि प्रज्वाल्य तत्सहायेन पापठीति स्म। रात्रिकालीने पठने निद्रामन्तरायं ज्ञात्वा निद्रां दूरीकर्तुं स्वशिखां रज्वा बध्वा पठन् निद्राभिभवकाले शिखाकर्षणेन निद्राभङ्गमनुभवन् पुनः पाठे मनो निदधाति स्म। एवं रात्रिन्दिवं अध्ययनपरात् तीक्ष्णधियो बालकात् वैदुष्यं पुनः कियद्दूरं व्रजेत्? पूर्वमनध्ययनदशायां 'जगा' इति निकृष्टेन शब्देन आहूयमानोऽयं पश्चात् विद्याव्यसनोत्कर्ष-सुचकेन 'जगु'रिति शब्देनाहूतः सादरं केवलं स्ववैदुष्यवैदूर्यप्रभयैव। शास्त्रार्थविचारेण ज्ञानसम्पत्त्या च गुरुणा जगदीश इत्याहूतश्च। पद्यमिदञ्च प्रसिद्धम् –

**आदौ जगा जगुः पश्चात् जगच्च तदनन्तरम्।**

**अधुना ज्ञानसम्पत्या जगदीशायते जगा।।**[16] इति।

---

[16] शब्दशक्तिप्रकाशिकायां, भूमिकांशे, ढुण्ढीराजशास्त्रिसम्पादितायाम्

शब्दशक्तिप्रकाशिकादिप्रसिद्धकृतीनां कर्ता श्रीजगदीशभट्टाचार्यः जागदीशीति प्रसिद्धां प्रकाशिकाख्यां तत्त्वचिन्तामणिदीधितिव्याख्यां दीधितिग्रन्थस्य यथार्थाशयप्रकाशनाय चक्रे। तथा हि स्वयं तेनोक्तं –

**कुर्वन्ति नित्यमनुमानमणेरनेके प्रायः**

**प्रयासमधिदीधिति नीतिभाजः।**

**एषा पुनस्तदपि नैव निजं निरूढम्**

**अर्थं प्रकाशयति तेन ममैष यज्ञः।।**[17] **इति।**

सार्वभौम-वाचस्पतिमिश्र-यज्ञपत्युपाध्याय-पक्षधरमिश्र-उदयनाचार्य-प्रगल्भमिश्र-सौन्दड-कुब्जशक्तिवादिश्रीकराश्वत्याचार्याः ग्रन्थे अस्मिन् निर्दिष्टाः।

न केवलं एकस्यैव ग्रन्थस्य निबन्धनकर्तासौ, अपि तु चिन्तामणिव्याख्यामयूख-गादाधरीसिद्धान्तलक्षणव्याख्या-प्रशस्तपादभाष्यव्याख्यासूक्ति-दीधितिव्याख्याप्रकाशिका-न्यायलीलावतीप्रकाशव्याख्या-तर्कामृतादीनां बहूनां ग्रन्थानां कर्तासौ जगदीशः। तदीयेषु ग्रन्थेषु शब्दसौष्ठवेन भावगाम्भीर्येण च विवरणसरणिरतिमनोग्राहिणी भवतीति सुधियां मतम्। तत्रापि शब्दशक्तिप्रकाशिका इति कृतिस्तदीया सर्वा अन्या कृतयः अतिशेते। तथा हि प्रसिद्धेयं भणितिः –

**जगदीशस्य सर्वस्वं शब्दशक्तिप्रकाशिका।** इति।

---

[17] शब्दशक्तिप्रकाशिकायां, भूमिकांशे, ढुण्ढीराजशास्त्रिसम्पादितायाम्

**जागदीशीश्रितकृतयः –**

वाराणसीनिवासिना नारायणानुजेन श्रीकृष्णभट्टेन विरचिता मञ्जूषाख्या जगदीशी-व्यधिकरणधर्मावच्छिन्नाभावप्रकरणसामान्यनिरुक्तिप्रकरणयोर्व्याख्या, सिद्धान्तलक्षण-भागव्याख्या तोषिण्याख्या च प्रसिद्धा। नञ्वादव्याख्या-सिद्धान्तमुक्तावलीव्याख्या-तर्कसंग्रहव्याख्यानां च प्रवक्ता रामनाथपण्डितः अपि जागदीशीव्याख्याबन्धं वबन्धे। शङ्करमिश्रेण काचन जागदीशीव्याख्या विरचितासीत्, या अमुद्रिता सम्प्रति मातृका-संरक्षणशालासु प्राप्यते। कौण्डिन्यवंशोद्भवेन मणिप्रभानामकचिन्तामणिदीधिति-व्याख्यायाः प्रवक्त्रा श्रीनीलकण्ठेन प्रपञ्चिता काचन जागदीशीव्याख्येति प्रसिद्धा। मैथिल-पण्डितेन व्युत्पत्तिवादव्याख्यात्रा धर्मदत्तवच्चाझाशर्मणा जागदीशी अवच्छेदकतानिरुक्ति-व्याप्तिपश्चक-सिद्धान्तलक्षणव्याख्या विवृत्याख्या प्रणीता। आधुनिकेन वङ्गप्रदेशजेन जीवानन्दविद्यासागरेण विहिता काचन जागदीशीव्याख्या वादार्थाख्या, मधुसूदन-भट्टाचार्येण प्रणीता सुषमाख्या जागदीशीपक्षताव्याख्या तदानीं कलिकातानगरे मुद्रिता। केशवद्विवेदिनः जागदीशीसामान्यलक्षणव्याख्या नारायण्याख्या वाराणस्यां मुद्रितासीत्। एवमाधुनिकेषु वामाचरणभट्टाचार्यशिष्यस्य शिवदत्तमिश्रस्य गङ्गेति संज्ञिता जागदीशी-व्याख्या विशिष्योल्लेखमर्हति। एतस्य ग्रन्थस्य व्याप्तिपञ्चकसिंहव्याघ्रलक्षणानि, व्यधिकरणधर्मावच्छिन्नाभावप्रकरणव्याख्या, अवच्छेदकतानिरुक्तिभागव्याख्या, सिद्धान्त-लक्षणभागव्याख्या च विदुषां चेत आवर्जयति। एवं काशिकानन्दस्वामिना निरूक्ता जागदीशीसामान्यलक्षणव्याख्या, वामाचरणभट्टाचार्यस्य मनोरमाख्या जागदीशी-

व्याप्तिपञ्चक-सिंह-व्याघ्र-सिद्धान्तलक्षणव्याख्याश्च अतीव प्रसिद्धाः। एवं कालीशङ्कराचार्येण वामाचरणभट्टाचार्येण च प्रणीतानि क्रोडपत्राण्यपि विदुषामतिप्रियाणि।

### १.७. श्रीगदाधरभट्टाचार्य्यः

हरिरामतर्कवागीशस्यान्तेवासी जीवाचार्यगोस्वामिनः पुत्रो, रघुनन्दनवाचस्पतेः पौत्रः, रामतर्कालङ्कार-कृष्णदेवविद्याभूषण-रघुदेवन्यायवागीशादीनां श्रद्धेयो जनकः, गोविन्दन्यायपञ्चानन-रमाकान्तविद्यालङ्कारानां पितामहः वङ्गदेशान्तर्गतलक्ष्मीपाश-ग्रामाभिजनः वारेन्द्रब्राह्मणकुलोत्पन्नः श्रीगदाधरचरणरेणुसञ्चरिष्णुः श्रीमद्गदाधरभट्टाचार्यः स्वीयकृतिततिना यथावर्जयति सचेतसां चेतांसि न तथान्यः कश्चित् विद्वानिह प्रपञ्चे समर्थः। गदाधरभट्टाचार्यः असौ पूर्ववङ्गप्रदेशीय इति अपि तात्कालिकानामनेकेषामाशयः। पूर्ववङ्गे पावनामण्डले तेषां पूर्वपुरुषाणां वसतिरिति केचित्।

प्राप्तवयस्को गदाधरः न्यायशास्त्रे विशेषवैदुष्यसम्पादनाय तार्किकशिरोमणेः हरिरामतर्कवागीशादध्येतुं नवद्वीपामाजगाम। परं सहसा स्वोत्तमशिष्याय गदाधरभट्टाय पाण्डित्यलक्ष्म शिरोमणिबिरुदमवितीर्यैव करालकालवशं गते तद्गुरौ हरिरामतर्कवागीशे तच्चतुष्पाठीस्थाः शिष्याः अनवाप्तोपाधिकाद् गदाधरभट्टात् शास्त्राध्ययनाय पराङ्मुखा बभूवुः। गदाधरभट्टाचार्यस्तु स्वयमेव गङ्गायास्तटे कस्मिंश्चिदुपवने उपविश्य तत्रस्थान् लतावृक्षानेवाध्यापयितुमारेभे। पूर्वविद्यालयस्थानं परित्यज्य राजमार्गसमीपस्थे तस्मिन् उपवने स्वनिवासः कल्पितः। एवं विद्यार्थिनामभावे तत्रैवोपवने लतावृक्षादीनुद्दिश्योच्चैः

शास्त्रीयनिगूढस्थलविचारं श्रावयन् गदाधरः कांश्चित् दिवसाननैषीत्। राजमार्गेण गच्छद्भिः विद्यार्थिभिः विद्वद्भिश्च सकुतूहलं प्रच्छन्नरूपेणोदासीनतया च गादाधरीयं शास्त्रीयविचारं श्रुत्वा तदीयविशिष्टवैदुष्यपरिचयः अनुमितः। कदाचित्तत्रोपवने कुसुमावचयनाय प्रविष्टाः केचिद् जिज्ञासवः गादाधरस्यानितरसाधारणान् परिशीलनपरिशोधनपरिपाठान् च निशम्य वृक्षमेवोद्दिश्य पूर्वपक्षसामाधाने रतं गदाधरं निशाम्य तदीययोग्यतायमसन्दिहाना अतिविस्मिताश्च समभवन्। ततः तदीयवैदुष्यपरिमलाकृष्टाः बहवश्च्छात्रा समाजग्मु-रध्ययनाय गदाधरात्, अत्यल्पेनैव कालेन गदाधरस्य पाण्डित्यख्यातिः प्रसृता जगति इति साम्प्रदायिकी किंवदन्ती।

गदाधरकृतिषु काश्चन मुद्रिताः अमुद्रिताश्च सन्ति काश्चन। एतासु गदाधरकृतीषु उल्लेखार्हाः तत्वचिन्तामणिटीका, अनुमानखण्डटीका, शब्दमण्यालोकटीका, प्रत्यक्षालोकटीका, अनुमानालोकटीका, प्रत्यक्षदीधितिटीका, अनुमानदीधितिटीका, आत्मतत्त्वविवेकदीधितिटीका, न्यायकुसुमाञ्जलिटीका, दुर्गासप्तशतीटीका, ब्रह्मनिर्णय इत्येते प्रसिद्धा ग्रन्थाः। रत्नकोषवादरहस्यम्, आख्यातवादः, कारकवादः, कारकार्थनिर्णयो, विधिवादः, मुक्तावलीटीका इत्यादय ग्रन्था अपि गदाधरविरचिता इति प्रसिद्धिः, परं करालकालकवलिता नेदानीं लभ्यन्ते। अनेन चतुष्षष्टिवादग्रन्थाः प्रणीता इति सम्प्रदायप्रसिद्धिः। केचन च ते उल्लेख्याः वादग्रन्था यथा – व्युत्पत्तिवादः, शक्तिवादः, मुक्तिवादः, प्रामाण्यवादः, विशिष्टवैशिष्ट्यवादः, संशयनिर्विकल्पकस्मरणवादः, नञ्वादः, विषयतावादः, आख्यातवादः, कारकवादः, बुद्धिवादः, स्मृतिसंस्कारवादः, कारणतावादः,

अपेक्षाबुद्धिकारणतावादः, सादृश्यवादः, रत्नकोशवादः, नव्यमतवादः, अनुमितिमानस-वादः, विधिस्वरूपवादः इति।

शक्तिवादटीकाकारः जयरामः प्रधानः शिष्य आसीत् श्रीगदाधरभट्टाचार्य्यस्य। तेन गदाधरस्याविर्भावकालः पञ्चाशदुत्तरषड्शताधिकैकसहस्रमितः (१६५०) ईशवीयाब्द इति कथ्यते।

**गादाधरीश्रितकृतयः –**

विद्वत्कुलशिरोमणिः श्रीगदाधरावतारश्रीकृष्णार्चनपरायणः श्रीमद्गदाधरभट्टाचार्यः हरिरामतर्कवागीशान्तेवासी देवीप्रसादप्राप्तबुद्धिकौशलेन व्युत्पत्तिवाद-शक्तिवाद-मुक्तिवाद-आत्मतत्त्वविवेकदीधितिटीकादिकर्त्ता प्रणिनाय काञ्चिद् दीधितिव्याख्यां प्रकाशिकाख्यां, या खलु गादाधरीति प्रसिद्धा प्रपञ्चे। दीधितिव्याख्यात्मकोऽयं ग्रन्थः अतिसरलः विशदश्च। नव्यन्यायशास्त्रशैलीमर्मज्ञानां मतिमतां गादाधरीयग्रन्थार्थावबोधे नैव वीक्ष्यते काठिन्यम्। दीधितिवाक्यस्यावतरणनिदानतदर्थविषयविचारपूर्वपक्षसमाधाननिरूपणमुखेन परिशीलनं, शाब्दबोधविचारश्चाध्येतृणां न्यायशास्त्रे व्युत्पत्तिमुत्पादयति। हेत्वाभाससामान्यलक्षणविचारे गादाधर्यां विहितः परिष्कारः ग्रन्थकर्तुरपारं बुद्धिपाटवं, शास्त्रवैशारद्यञ्चागाधं प्रकाशयति।

गदाधरप्रणीतां चिन्तामणिव्याख्यामाश्रित्य समजनिषत बह्व्यः कृतयः। तत्र महादेवपौत्रस्य नारायणानुजस्य कृष्णभट्टस्य कर्षिकाख्या कृष्णम्भट्टीति प्रसिद्धा गादाधरी-व्याख्या, कौण्डिन्यगोत्रजस्य रामभट्टपुत्रस्य तर्कसंग्रहदीपिकाव्याख्यातुः नीलकण्ठभट्टस्य

नीलकण्ठीयाख्या गादाधरीव्याख्या, हरनारायणाचार्यकृता हरनारायणीया इति प्रसिद्धा गादाधरीव्याख्या, वेणीमाधवप्रणीता प्रभाख्या गादाधरीप्रामाण्यवादव्याख्या, श्रीवत्स-गोत्रजस्य अण्णादीक्षित-लक्ष्म्योस्तनयस्य अश्वत्थनारायणदीक्षितस्य भावसंग्रहाख्या गादाधरीव्याख्या, जागदीशीव्याप्तिपञ्चक-सिद्धान्तलक्षणादिव्याख्याकर्तुः सर्वतन्त्रस्वतन्त्रस्य मिथिलानिवासिनः शाण्डिल्यगोत्रजस्य धर्मदत्तबच्चाझाशर्मणः गादाधरीसामान्यनिरुक्ति-व्याख्या विवृत्याख्या, गोपीनाथकविराजगुरुवर्यस्य जागदीशीमाथुरीव्याख्याननिबन्धकस्य छोटेवामाचरणभट्टाचार्यस्य मनोरमाख्या गादाधरीव्याख्या, वामाचरणभट्टाचार्यशिष्यस्य वाराणसीवासिनः गौडीयस्य जागदीशीमाथुरीव्याख्यातुः शिवदत्तमिश्रस्य गादाधरीव्याख्या गङ्गाख्या, श्रीरङ्गाचार्यविरचिता नक्षत्रमालिकाख्या गादाधरीव्याख्या, शङ्करभट्टीयेति प्रसिद्धा गादाधरीव्याख्या शङ्करभट्टप्रणीता, विट्ठलभट्टेन त्र्यम्बकशास्त्रिणा कालीशङ्करभट्टेन रघुनाथ-भट्टेन कृष्णताताचार्येण चन्द्रनारायणेन चन्द्रमण्युपाध्यायेन तथा चान्यैः प्रपञ्चिताः क्रोडपत्र-व्याख्याः, झञ्झामारुतमित्याख्याता वेङ्कटाचार्यकृता व्याख्या, गुरुप्रसादशास्त्रिप्रणीता दीपिकाख्या गादाधरीसिद्धान्तलक्षणव्याख्या च सम्प्रदायविदां मनोहारिण्यः समपद्यन्त।

एवं यथामति न्यायाचार्याणां प्राचां संक्षिप्तं विवरणं इहोपन्यस्तम्। वस्तुतः प्रातःस्मरणीयानां सदा श्रद्धाभाजनानामेषां कर्कशतराखिलतर्कसाम्राज्यचक्रवर्त्तिनां कृतय एव मदीयशोधप्रबन्धाधारः, अतः शोधप्रबन्धप्रारम्भे तान् महतः गुरून् स्मारं स्मारं सम्प्रदायकर्तृभ्यो महद्भ्यस्तेभ्यो गुरुभ्यः सविनयं श्रद्धां विज्ञाप्य प्रकृतमनुसरामः, ***तत्त्वचिन्तामणेस्तर्कप्रकरणे प्रसिद्धटीकानां समीक्षणम्*** इति विषयं विशामः।

## १.८. पूर्वपरिकल्पना (Hypothesis)

प्रबन्धे विषयानुसारमस्माभिरादौ विविधतथ्यानि संगृहीतानि। विविधेषु ग्रन्थागारेषु स्थिताः नव्यन्यायाकरग्रन्थः तट्टीकाग्रन्थाश्च संगृह्य परिशीलिताः। तत्परिशीलनेन प्राप्तैः तथ्यादिभिः तर्कप्रकरणे तत्त्वचिन्तामणेः तत्प्रसिद्धटीकानां समीक्षणं कृतम्। अस्मिन् शोधकार्ये अधोलिखितानाम् प्रश्नानामुत्तरम् अन्वेष्टुं मया प्रयासः विहितः।

1. तत्त्वचिन्तामणेः तर्कप्रकरणे गङ्गेशोपाध्यायस्य किं तर्कविषयकं स्वारस्यम्?
2. तत्त्वचिन्तामणेः तर्कप्रकरणे साक्षाट्टीकयोः दीधितिमाथुर्योः सादृश्यवैसादृश्ये स्तः वा न वा? सतोः किं सादृश्यं किञ्च वैसादृश्यम्? किञ्च बीजं वैसादृश्ये?
3. तत्त्वचिन्तामणेः तर्कप्रकरणे दीधितिमाश्रित्य प्रवृत्तयोरपि प्रकाश-जागदीशी-गादाधरीटीकयोः सादृश्यवैसादृश्ये स्तः वा न वा? सतोः किं सादृश्यं किञ्च वैसादृश्यम्? किञ्च बीजं वैसादृश्ये?
4. तत्त्वचिन्तामणेः तर्कप्रकरणे दीधितिटीकया माथुरीटीकया च सह प्रकाश-जागदीशी-गादाधरीटीकयोः सादृश्यवैसादृश्ये स्तः वा न वा? सतोः किं सादृश्यं किञ्च वैसादृश्यम्? किञ्च बीजं वैसादृश्ये??
5. तत्त्वचिन्तामणेः तर्कप्रकरणे दीधिति-माथुरी-प्रकाश-जागदीशी-गादाधरीटीकानां मिथो मतवैभिन्न्ये सति तेषु मतेषु कतरन्मतं कथञ्च श्रेयः? इत्येवम्।

## १.९. शोधपद्धतिः (Research Methodology)

मदीये शोधकार्ये शोधपद्धतिः निर्दिष्टा काचित् अनुसृता। शोधप्रबन्धस्य शीर्षकचयनादनन्तरमेव शोधबन्धोपयोगितथ्यसंग्रहः आरब्धः। अतः अस्य शोधकार्यस्य प्राथमिकपर्याये संग्रहात्मिका (Accumulative Research), द्वितीय पर्याये विश्लेषणात्मिका (Analytical Research) तुलनात्मिका (Comparative Research) च शोधपद्धतिः अङ्गीकृता। वस्तुतः प्राथमिके पर्याये अर्थात् प्रथमद्वितीयाध्याययोः सम्पादनसमये केवलमुपयुक्तानां तथ्यानां संग्रह एव मया विहित इति तदानीन्तनीया शोधपद्धतिः संग्रहात्मिका एव। परं तृतीय-चतुर्थ-पञ्चमाध्यायानां सम्पादने प्रवृत्तेन मया तत्त्वचिन्तामणेः तथा तट्टीकानां विश्लेषणं, तौल्येन समीक्षणं च विहितमिति तदानीन्तनीया पद्धतिः विश्लेषणात्मिका तुलनात्मिका च। अत्रेदमपि उल्लेख्यं नव्यन्यायाकरभूतस्य तत्त्वचिन्तामणिग्रन्थस्य अन्या अपि सन्त्यनेकाः प्रसिद्धाः टीकाः व्याख्याश्च। परं याः पञ्च प्रसिद्धाः टीकाः अद्यापि भारतवर्षस्य सर्वत्र गुरुशिष्य-परम्परयाधीयन्ते, ता एव पञ्चात्र समीक्षणाय संगृहीताः, न च सर्वा एव।

शोधप्रबन्धः अयं सरससुरगिरा देवनागरीलिप्या ‘संस्कृत-टेक्ष्ट्’ इति संगणकीयफ्रण्ट्-सहायेन निबद्धः। अन्येषां बोधसौकर्य्याय मार्गनिर्देशकानुमतिमादाय संस्कृतविभागानुमोदिता सरला सहायकग्रन्थसूचीशैली चानुसृता।

भाविनि काले मदीयबन्धः अपि विषयविवेचनेन प्रतिपादनशैल्या परिष्कारसरण्या चान्येषामपि शोधार्थिनामाधारः स्यादिति हृदि निधायात्र शोधोत्कर्षापादने प्रयासो महान् विहितः। तथापि सदा स्मर्तव्या महाकविभणितिः -

**“आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**

**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।।”**[18] इति शिवम्।

[18] अभिज्ञानशाकुन्तले 1.2 श्लोकः

# द्वितीयः अध्यायः

# दर्शनशास्त्रेषु *तर्कस्य* स्वरूपं प्रयोजनञ्च

भारतीयदर्शनसम्प्रदायेषु तर्कस्योपयोगित्वमनस्वीकार्यमनन्यमपरिहार्यञ्च। वादे जल्पे वा विषयविचारेण तत्त्वज्ञानलाभायादौ तद्विषयिण्याः शङ्कायाः प्रयोजनीयता। भाष्ये अपि भाषितं, **"नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते, किं तर्हि संशयितेऽर्थे"**[1] इति। अतो विषयविचाराय संशयस्योपयोगित्वात् असौ न्यायपूर्व्वाङ्गः न्यायनये पृथक्प्रस्थानभूतः संशयः प्रमेयान्तर्भूतः अपि न्यायसूत्रे पृथगुल्लिखितः। परं संशयः न्यायपूर्वाङ्गो वादजनकमात्रः, यावत् तस्य निरासो न भवति तावत् तत्त्वज्ञानं नोदेति। अतः संशयस्य निरासेणैव तत्त्वनिर्णयस्य सुलभत्वात् तस्य संशयस्य निराकरणाय न्यायशास्त्रे तर्कः प्रयुज्यते इति असावपि तत्त्वनिर्णयसहायकः प्रमाणानुग्राहकः पृथक्प्रस्थानत्वेन महर्षिणा प्रथमन्यायसूत्रे पृथगुल्लिखितः। अतः निःसंशयं कथयितुं शक्यं यत् तापत्रयोपशमेन निःश्रेयससाधकत्वेन प्रतिपादितेषु षोडशसु पदार्थेषु प्रमाणप्रमेयसंशयादिषु तत्त्वज्ञानद्वारकमिथ्याज्ञानविनाशायापरिहार्योऽनन्यश्चासौ तर्कः। सर्वज्ञगमकोऽसौ तर्कस्तर्कतन्त्रे यथा, तथा शास्त्रान्तरेष्वपि विद्वच्चेतांसि गृहयालुभिरनितरसाधारणीभिर्गीर्भिरुपपादितः साङ्गोपाङ्गः। तथापि विविधदर्शनेषु सत्यामपि तर्कतत्त्वचर्चायां न्यायदर्शनदर्शनस्यानुपसर्जनत्वमनस्वीकार्यम्। न्यायदर्शने विशेषतो

[1] वात्स्यायनभाष्ये, फणीभूषणतर्कवागीशसम्पादिते, पृ 31

नव्यन्याये यथा चर्चितं तर्कतत्त्वं न तथान्यत्रास्मद्दृग्गोचरतामुपैति। तथाहि ग्रन्थमणौ तत्त्वचिन्तामणौ मीमांसादीनां प्राचाञ्च मतानि पूर्वपक्षत्वेन निरुच्य मणिकृता तत्र तेषां भूरिदोषप्रदर्शनेनावरत्वं प्रदर्श्य तर्कविषयकः स्वकः सिद्धान्तः प्रपञ्चितः। मणिकारम् अनुसृत्य तत्पश्चाद्भाविनो नैयायिका अपि महतायासेन स्वीयग्रन्थेषु तर्कस्वरूपं प्रपञ्चितम्। तदिदं समुद्रवदतलं तर्कतत्त्वं मथित्वा यल्लभ्यते तदिह संक्षेपेण समुपस्थाप्यते।

## २.१. तर्कस्वरूपम्

वैशेषिकदर्शनप्रणेतारः परमकारुणिकाः महर्षयः कणभक्षाः हि तर्कस्वरूप-वचश्चर्चायां सूत्रेषु मौनं भावमालम्बन्ते। परं परभाविनः पण्डिताः श्रीशशधराचार्याः श्रीशङ्करमिश्राश्च तर्कस्याप्रमाविशेषेष्वन्तर्भावित्वं मन्यमानाः स्वसम्प्रदायविरोधपदवीम् अधिरोहन्ति। ततश्च तत्प्रस्थानमवलम्ब्यैव किरणावलीकृदुदयनाचार्य्याः कर्कशतरतर्क-प्रपञ्चचक्रवर्तिनः विपक्षराद्धान्तपक्षच्छेदिनः तर्कधाराविशेषस्याप्रमाविशेषत्वमप्रमासु च स्वातन्त्र्यं सर्वप्रमाणानुग्राहकत्वञ्चोदघोषयन्महत्यारभट्या। परमक्षचरणैः सकलनैयायिक-कुलगुरुवरैः स्वोपज्ञकृतौ प्रथमत एव तर्कस्याप्रमात्वं तथा प्रमाणानुग्राहकत्वं जेगीयते मुक्तकण्ठम्।

तर्क्यन्ते प्रमितिविषयीक्रियन्ते इति तर्काः द्रव्यादिसप्तपदार्था इति व्युत्पत्त्या तर्कशब्दः न्यायवैशेषिकशास्त्रप्रतिपादितपदार्थगमकः। अत्र तर्कशब्दः पारिभाषिकः। परं लोके तर्कशब्दः वादार्थे प्रयुक्तो दृश्यते। क्वचित् असौ तर्कः मीमांसार्थे, क्वचित् हेत्वर्थे,

क्वचिच्च न्यायार्थे अपि प्रयुज्यते। कुत्रचित् तर्कशब्दः संशयबोधकः, केषाञ्चिन्मते च तर्कशब्दः अनिष्टापत्तिज्ञापकः।

अनिष्टस्य प्रसङ्ग आपत्तिरेव वा तर्कः। केषाञ्चित्सम्प्रदायानां नये, संशय-निर्णयपदार्थाभ्यां भेदः तर्कस्यासम्भवः, तर्कः संशय-निर्णयात्मक एव। परं न्यायसूत्र-भाष्यवार्त्तिकादिषु **'भवेदित्येष प्रत्यय इत्यस्य स्वरूपम्'** इत्यत्र भवेत् इति पदे सम्भावनायां विधिलिङः प्रयोगात् संशयनिर्णयाभ्यामतिरिक्तः सम्भावनात्मकः ज्ञानविशेष एव तर्क इति केचित्। परन्तु संशयनिश्चयाभ्यां भिन्नतया सम्भावनात्मकस्य ज्ञानविशेषस्य तर्कत्वं न स्वीकृतं प्राचीनैः नैयायिकैः। वस्तुतः सम्भावनात्मकं ज्ञानं हि संशय एवेति केचित्। किन्तु न्यायनये तर्कः संशयाद् भिद्यते। अतः उदयनाचार्यादीनां प्राचीनानाम् अनिष्टापत्तिरेव तर्क इति सिद्धान्तः। परं बौद्धाभिमतानुगामि अनिष्टप्रसङ्गत्वं नेह न्यायेऽभ्युपगतम्। अत्र न्याये प्रमाणैः बाधितः पदार्थ एव अनिष्टपदार्थः, तस्य प्रसङ्ग आपत्तिरूपं ज्ञानमेव तर्कः इति स्वीकृतः। अतोऽनिष्टप्रसङ्ग इति प्रयोगापेक्षया बाधितार्थप्रसङ्ग इति एव न्यायशास्त्रेषु प्रयोगः समधिकः सुलभः। संशयनिवर्त्तकत्वात् असौ तर्कः संशयव्युदास इत्यपि संज्ञितः प्राञ्चैः।

एतादृशोऽनिष्टप्रसङ्गो मनसैव सम्भवति, अतस्तर्कस्य मानसप्रत्यक्षग्राह्यत्वम् इति केचित्। किञ्च, एतत् आहार्यभ्रमज्ञानम्। भ्रमस्य बाधकनिश्चये सत्यपि इच्छापूर्वको य आरोपः, स एव आहार्य्यभ्रमः। किन्तु तर्कस्याहार्यभ्रमरूपत्वेऽपि तत्सहायेन प्रमाणेन तत्त्वविनिश्चयः सुलभः।

**"व्याप्यारोपेण व्यापकारोपस्तर्क"**[2] इति नव्यमतम्। ननु न सर्वत्र, यत्र कुत्रचित् व्याप्यारोपेण व्यापकारोप एव तर्कः। तथा हि यत्र यस्य पदार्थस्य स्थितिः सर्वसम्मता, तत्र तस्यापत्तिः न तर्कः। वस्तुतस्तथात्वे तत्र तस्य पदार्थस्य ज्ञानं नारोपात्मकं, किन्तु यथार्थानुभव एव। यथा पर्वते कस्यचित् 'पर्वतो यदि धूमवान् भवेत् तर्हि वह्निमान् भवेत्' इत्येवं वह्नेः आपत्तिः न तर्कः, पर्वते वह्निसत्त्वनिश्चयात्। एतादृशी आपत्तिः इष्टापत्तिरेव, न तु अनिष्टप्रसङ्गः तर्को वा।

तर्केऽनिष्टपदार्थः आपाद्यः, यत्सत्तायाम् अनिष्टप्रसङ्गः स आपादकः। यथा पूर्वोक्ते धूम-वह्न्योः उदाहरणे धूम आपादकः, वह्निरापाद्यः। आपाद्यः व्यापकः, आपादकश्च तद्व्याप्यः। तर्करूपे आहार्यभ्रमज्ञाने अपि आपादके आपाद्यस्य व्याप्तिः स्मरणीया, यतः तादृशी व्याप्तिरेव तर्कस्य प्रथममङ्गम्। आपाद्यरूपस्य व्यापकपदार्थस्य अभावहेतुना आपादकस्य व्याप्यपदार्थस्य अभावः अनुमानेन सिध्यति। यथा जलं यदि धूमवत्, तर्हि वह्निमत् भवतु इति तर्केण जले वह्नेरभावेन हेतुना धूमस्य अभावः प्रमाणितः। अत एतादृशेन तर्केण विषयपरिशुद्धिसम्पत्त्यर्थं प्रमाणविषयनिश्चयार्थम् एष तर्कः विषयपरिशोधकः इत्यपि संज्ञितः। केषाञ्चिन्मते लिङ्गपरामर्शरूपस्य न्यायस्य विषयीभूतस्य लिङ्गस्य परिशुद्धिसम्पादनात् तर्कः विषयपरिशोधक ईरितः।

येन तर्केण अनुमानहेतौ साध्यधर्म्मव्यभिचारसंशयस्य निवृत्तौ व्याप्तिनिश्चयः, स तर्कः हि व्याप्तिग्राहकः तर्कः। यथा 'धूमो वह्निव्यभिचारी न वा' एतादृशे संशये

[2] तर्कसङ्ग्रहे, नारायणचन्द्रगोस्वामिसम्पदिते, पृ 569

समुत्पन्ने 'धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यात्' एतादृशः तर्कः प्रयुज्यते। प्रकृते वह्निव्यभिचारः आपादकः, वह्निजन्यत्वाभावः आपाद्यः। वस्तुतः धूममात्रं वह्निजन्यमेव, न वह्निना विना धूमोत्पत्तिः। तेन तर्कानन्तरं 'धूमो न वह्निव्यभिचारी वह्निजन्यत्वात्' इति वह्निजन्यत्वहेतुना धूमे वह्निव्यभिचाराभावस्य निश्चये, तन्निश्चयेन व्यभिचारसंशयनिवृत्तौ धूमे वह्निव्याप्तेः निश्चयात्मकं ज्ञानं सम्पद्यते। अत एतादृशः तर्कः व्याप्तिग्राहकः तर्कः। तथाहि प्रमेयतत्त्वबोध इति ग्रन्थे वर्द्धमानोपाध्यायेनाभाणि – **"तर्को न्यायस्य पूर्वाङ्गम्, न्यायविषयपरिशोधकत्वात् व्याप्तिग्राहकत्वाच्च"** इति। भाष्यकारः अपि पञ्चावयवानां परमन्यायत्वं प्रपञ्च्य अवयवनिरूपणानन्तरं न्यायाङ्गस्य तदनु निरूपणं सङ्गतमिति मत्वा तर्कं प्रत्यपादयत्।

प्रागेवोक्तमा आपाद्यापादकयोः व्याप्तिः तर्कस्य प्रथममङ्गम्। वस्तुतः तर्कस्य सन्ति पञ्चाङ्गानि। तानि च यथा वरदराजाचार्येण भणितानि –

**"व्याप्तिस्तर्काप्रतिहतिरवसानं विपर्य्यये।**

**अनिष्टाननुकूलत्वे इति तर्काङ्गपञ्चकम्।।"**[3]

अस्यायमाशयः, आपादकपदार्थे आपाद्यपदार्थस्य व्याप्तिः, तर्कव्याघातकेन प्रतिकूलतर्केण अप्रतिघातः, विपर्य्यये आपाद्यपदार्थाभावे पर्यवसानम्, आपाद्यपदार्थस्य अनिष्टत्वम्, आपत्तेः अननुकूलत्वं नाम प्रतिपक्षासाधकत्वमिति च पञ्च अङ्गानि तर्कस्य।

[3] तार्किकरक्षायां, विन्ध्येश्वरीप्रसादद्विवेदिसम्पादितायां, पृ 187

पञ्चाङ्गः तर्क एव तत्त्वज्ञानसहायः, अन्यथा कस्यचित् अङ्गस्य अभावे प्रकृततर्कत्वनाशः, तदा तर्काभास एव सः। तदपि व्यनक्ति वरदराजाचार्यः -

**“अङ्गान्यतमवैकल्ये तर्कस्याभासता भवेत्”**[4] इति।

## २.२. भाष्यस्थतर्कलक्षणम्

पञ्चावयववाक्यात्मकं परमं न्यायं प्रपञ्च्य तर्कस्य लक्षणं महर्षिणाक्षपादेन सूत्रितमित्थम् –

**“अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः”**[5] इति।

अस्यायमाशयः, सामान्यतो ज्ञातस्य यस्य पदार्थस्य तत्त्वं विशेषतयाज्ञातं, तस्य पदार्थस्य तत्त्वज्ञानार्थं कारणोपपत्तितः प्रमाणसम्भवप्रयुक्तो ज्ञानविशेष एव तर्कः। अतः **‘सामान्यतो ज्ञाते, विशेषतः अज्ञाते धर्म्मिणि एकपक्षानुकूलकारणदर्शनात् तस्मिन् सम्भावनाप्रत्ययः भवितव्यतावभासः तदितरपक्षशैथिल्यापादनेन तद्ग्राहकं प्रमाणमनुगृह्णन् सुखं प्रवर्तयन् तत्त्वज्ञानार्थी भवतीति ऊहस्तर्कः’** इति सूत्रार्थः जरन्नैयायिक-जयन्तभट्टाभिमतः।

न्यायदर्शने तर्कः प्रमाणानुग्राहकः ऊहात्मको ज्ञानविशेषः। अतः सूत्रे – ‘ऊहस्तर्क’ इति उपात्तम्। न्यायसूत्रवृत्तौ विश्वनाथेनापि ऊहशब्दप्रयोगेण तर्कलक्षणं

---

[4] तार्किकरक्षायां, विन्ध्येश्वरीप्रसादद्विवेदिसम्पादितायां, पृ 187

[5] वात्स्यायनभाष्ये, फणीभूषणतर्कवागीशसम्पादिते, पृ 304

विहितं – **"परे तु ऊह इत्येव लक्षणम्"**[6] इति। जयन्तभट्टेनापि तर्कलक्षणं लिलक्षयिषुणा ऊहस्तर्क इत्याकलितं न्यायमञ्जर्याम् – **"तर्क ऊह इति पर्यायोपादानस्य प्रयोजनं वक्ष्यामः"**[7] इति। प्रसङ्गत उल्लेख्यम्, तर्कः अनुमानान्तर्गत इति केचन। परं तेषां मतं खण्डयन् जरन्नैयायिकः जयन्तभट्टो तर्कस्य सम्भावनात्मकज्ञानत्वमेवाभ्युपगतवान्।

तर्कस्य प्रयोजनं प्रतिपादितं महर्षिगोतमेन सूत्रकारेण – 'कारणोपपत्तितः' इति। कारणेत्यस्य प्रमाणमिति, उपपत्ति इत्यस्य सम्भावनेति तात्पर्यम्। तेन प्रमाणसम्भावनप्रयुक्तो ऊहात्मको ज्ञानविशेषः तर्क इति फलति। कुत्र चास्य तर्कस्य प्रवृत्तिः, को वा तर्कस्य विषयः इति जिज्ञासायां सूत्रे – 'अविज्ञाततत्त्वेऽर्थे' इति।

अत्रेदमवधेयं, विज्ञाततत्त्वे विषये शुश्रूषा-श्रवण-धारणा अपि सांख्यशास्त्रे ऊह बुद्धिधर्मस्वरूप इति कथितः। सूत्रे 'अविज्ञाततत्त्वेऽर्थे' इति पदं सांख्यशास्त्रोक्तात् तर्कात् न्यायशास्त्रोक्तस्य तर्कस्य पृथक्त्वप्रदर्शनाय। न्यायदर्शने ऊहः अविज्ञाततत्त्वे विषये सम्भावनात्मकः ज्ञानविशेषः। किन्तु सांख्यशास्त्रे ऊहः बुद्धिधर्मस्वरूपः प्रत्ययसर्गस्वरूपो वा। तथा हि महत् बुद्धिर्वा प्रकृतेः प्रथमो विकारः, तस्यः महतः उद्भवः सत्त्वगुणाधिक्यात्। तत्र यदा ऊहशब्दस्य प्रयोगस्तदा विचारार्थक एव मूलतया सः। तथा हि सांख्यतत्त्वकौमुद्यां श्रीमता वाचस्पतिमिश्रेणाकलितं – **"ऊहः तर्कः, आगमाविरोधिन्यायेनागमार्थपरीक्षणम्। तदिदं मननमाचक्षते आगमिनः"**[8] इति।

---

[6] 1/1/40 न्यायसूत्रवृत्तौ

[7] न्यायमञ्जर्याम्, गौरीनाथशास्त्रिसम्पादितायां, पृ 107

[8] साख्यतत्त्वकौमुद्यां, नारायणचन्द्रगोस्वामिसम्पादितायां, पृ 312

गुरुमुखोक्तस्य आगमतत्त्वस्य प्रत्यक्षागमाविरोधियुक्त्या यत्परीक्षणं क्रियते तदेव सांख्यमते ऊहः। परं न्यायशास्त्रोक्तः अयमूहः भिन्न एव सांख्यशास्त्रोक्तादूहात्। वस्तुतः, यः पदार्थः सर्वथा अज्ञातः एव, तत्स्वरूपनिर्धारणाय तत्तत्त्वनिश्चयाय वा तर्कः प्रयोक्तुं न शक्यः। अतः अविज्ञातेत्यत्र तत्त्वमिति विशेष्योपादानम्। तेन यस्य ज्ञातस्य सामान्यतो ज्ञातस्य वा पदार्थस्य तत्त्वमविज्ञातं, तस्य अविज्ञाततत्त्वस्य पदार्थस्य तत्त्वज्ञानाय ऊह एव तर्कः इति फलति।

ननु अविज्ञातं तत्त्वं येन इति विग्रहेण अविज्ञाततत्त्व इति पदं ज्ञातृपुरुष-विशेषणमपि भवितुं योग्यमिति चेत्, न, तत्स्वीकारे अनिष्टापत्तिः, अतः 'अविज्ञाततत्त्वे' इत्यस्य 'अर्थे' इति विशेष्यं सूत्रे उपात्तम्। अतः अर्थपदस्य प्रयोगेण अविज्ञातं तत्त्वं यस्य अर्थस्य इत्येव तात्पर्यम् अभ्युपगन्तव्यम्। तादृशस्यार्थस्य तत्त्वज्ञानार्थमेव तर्कस्य प्रयोजनीयता। ननु तथात्वे 'अविज्ञाततत्त्वेऽर्थे' इति स्थले अविज्ञाततत्त्वस्यार्थस्य इति षष्ठीप्रयोग एव उपपन्नः इति चेत्, सत्यमेतत्। तथाहि उद्द्योतकरेण एतस्य समर्थनं स्वकृतौ निबद्धमित्थम् – **'षष्ठीस्थल एवैषा सप्तमी'** इति।

ननु षष्ठीस्थले सप्तम्या अनुपपन्नत्वं नाशङ्कनीयम्। अन्यत्रापि शास्त्रेषु एवं दरीदृश्यते। तद्यथा वैशेषिकं सूत्रमिहोदाहरणीयम् – **"इषावयुपवत् संयोगविशेषाः कर्म्मान्यत्वे हेतवः"**[9] इति। अत्र वैशेषिके सूत्रेऽपि षष्ठीविभक्तितात्पर्ये सप्तमीविभक्ति-

[9] वैशेषिकसूत्रम् 5/1/16

प्रयोगः। तथाहि तत्र सूत्रस्य व्याख्याने वैशेषिकसूत्रोपस्कारे श्रीमता शङ्करमिश्रेणागादि – **‘इषाविति षष्ठ्यर्थे सप्तमी’** इति।

ननु ऊह-तर्कशब्दयोः पर्यायत्वात् कथं लक्षणे उभयपदनिवेशनम्? अलमन्यतरनिवेशेन। तथात्वे तर्कलक्षणे तर्कपदस्यापरिहार्यत्वात् ऊहपदस्य वैयर्थ्यं न वाच्यम्, तर्कोऽनुमानमेवेति एकदेशिमतनिरासरूपप्रयोजननिर्वाहात्, ‘यस्तर्केणानुसन्धत्ते’ इत्यादिकारिकासु तर्कपदस्य अनुमानतया व्याख्यातत्वात्।

ननु प्रमाणानुग्राहकतया परम्परया तत्त्वज्ञानजनकत्वात् तत्त्वज्ञानार्थस्तर्क इत्युक्तः, कथं तत्त्वज्ञानमेव न तर्क इति चेत् वात्स्यायनेन भाषितम् – **“अनवधारणात्, अनुजानात्ययममेकतरं धर्मं कारणोपपत्त्या, न त्ववधारयति, न व्यवस्यति, न निश्चिनोति एवमेवेदम्”**[10] इति। प्रमाणसम्भवप्रयुक्तयोः विरुद्धधर्मयोः एकतरानुज्ञां करोति, न अनधारयति, न तर्को निश्चयं जनयति इति तर्को न तत्त्वज्ञानम्, किन्तु तत्त्वज्ञानार्थः।

न्यायसूत्रभाष्याणामेव वृत्तिकारत्वेन प्रसिद्धेन जरन्नैयायिकेन जयन्तभट्टेन विरचिता न्यायमञ्जरी प्राचीनन्यायग्रन्थेषु अन्यतमो न्यायसूत्रव्याख्यानग्रन्थः। तत्र तर्कप्रकरणे भाष्यादिवर्णितं तत्त्वमेव स्वकीयशैल्या वर्णितमस्ति।

तथा हि जयन्तनये नैव तर्के संशयवत् कोटिद्वयस्य समानतयोल्लेखः, नापि निर्णयवत् अन्यतरधर्मिणो विषयत्वं भवति। नैव संशयवत् धर्मिगतविशेषस्य अनवगमात् उभयोः पक्षयोः साम्येन निर्देशः। नापि निर्णयवत् अन्यतरधर्मगतानां विशेषाणामवगाहनं

[10] वात्स्यायनभाष्ये, फणीभूषणतर्कवागीशसम्पादिते, पृ 313

तर्के। किन्तु अन्यतरपक्षे सम्भावनां प्रकटयति यथा भवेदयं पुरुष इति। एवमेवायं त्रिशङ्कुरिवाल्वमानः प्रत्ययान्तरनिवृत्तये प्रभवन् प्रत्ययानुभवादेवायं तर्कः परिकल्प्यते इति जयन्तसिद्धान्तः।

## २.३. नव्यन्यायसम्मतं तर्कलक्षणम्

प्राचां सूत्रकारभाष्यकारादीनामेतन्मतं परभाविनि काले नव्यनैयायिकैः विशदतया प्रपञ्चितमित्थम् – यस्मिन् पदार्थे व्यापकपदार्थस्य अभावः निश्चितः, तस्मिन् पदार्थे तद्व्याप्यपदार्थारोपप्रयुक्तो व्यापकपदार्थारोप एव तर्कः इति। तथा हि तर्कसंग्रहादिषु नव्यन्यायानुगतेषु प्रकरणग्रन्थादिषु – **“व्याप्यारोपेण व्यापकारोपस्तर्कः”** इत्येवंविधानि लक्षणानि समुपलभ्यन्ते। तर्कयामीत्यनुभवात् जिज्ञासाविशेषनिवर्त्तक आहार्यारोपविशेषः मानसत्वव्याप्यो जातिविशेषस्तर्कः। वस्तुतस्तु एतादृशं व्याख्यानं न सूत्रविरोधि। तथाहि सूत्रस्थस्य कारणपदस्य व्याप्यमिति, उपपत्तिपदस्य आरोप इति अर्थोपादाने एतादृशार्थसङ्गतिः। उदाहरणेनैतस्य तात्पर्यं विशदीक्रियते यथा, धूम-वह्न्योः सम्बन्धे धूमो वह्निव्याप्यः, वह्निः धूमव्यापकः। तेन यत्र यत्र धूमस्तत्र तत्र वह्निः, यत्र यत्र धूमाभावः तत्र तत्र वह्न्यभावः। यथा महानसे धूमः वह्निः च। जले धूमस्य अभावः अतः तत्र वह्नेरपि अभावः। परन्तु कस्यचित् धूमवह्न्योः सम्बन्धे विप्रतिपन्नस्य कृते तर्कः प्रयुज्यते, व्याप्यारोपप्रयुक्तो व्यापकारोपरूपः। यथा जले धूमस्य व्याप्यस्य आरोपेण

तत्प्रयुक्तो वह्नेः व्यापकस्य आरोपो हि 'जलं यदि धूमवत्स्यात् तदावश्यं वह्निमत्स्यात्' इत्येवम्। अत्र जले धूमस्यारोपेण वह्नेः यः अनिष्टप्रसङ्गः स एव तर्कः।

अतः अनिष्टप्रसङ्गः तर्कः, अनिष्टप्रसञ्जनं तर्क इत्येवं तर्कलक्षणमपि शास्त्रेषु सुप्रसिद्धम्। प्रसज्यतेऽनेनेति प्रसङ्गः, समुच्चितयोरनिष्टयोः प्रसङ्गः तर्कः। अनिष्टप्रसङ्गो हि एकतरधर्माभ्युपगमे द्वितीयधर्मस्य नियतप्राप्तिः। यद्वा, तर्को हि आहार्यव्याप्यवत्ता-भ्रमजन्य आहार्यव्यापकवत्ताभ्रम एव।

## २.४. वैशेषिकाभिमततर्कस्वरूपम्

वैशेषिकसूत्रभाष्यकर्त्रा प्रशस्तपादेन पृथक्तया तर्कलक्षणस्योल्लेखो न कृतः। परं वैशेषिकतन्त्रे अविद्या विद्या चेति भेदेन बुद्धिः द्विधा विभक्ता। विद्या यथार्थज्ञानम्, अविद्या चायथार्थज्ञानम्। तथा चोक्तं प्रशस्तपादेन – **"बुद्धिरुपलब्धिः ज्ञानं प्रत्यय इति पर्यायाः। सा चानेकप्रकारा, अर्थानन्त्यात् प्रत्यर्थनियतत्वाच्च। तस्याः सत्यप्यनेकविधत्वे समासतो द्वे विधे विद्या चाविद्या चेति। तत्राविद्या संशयविपर्ययानवध्यासस्वप्नलक्षणा"**[11] इति।

श्रीधराचार्यप्रणीतायाः वैशेषिकदर्शनश्रितायाः प्रशस्तपादभाष्यव्याख्यायाः न्यायकन्दल्याः श्रीधरायाक्षययशोदायिन्याः प्रामाणिकत्वम् अन्येऽपि दार्शनिकाः

---

[11] प्रशस्तपादभाष्यम् गुणे बुद्धिप्रकरणम् पृ.स. 410, 411 वाराणसीस्थसम्पूर्णानन्दविश्वविद्यालयप्रकाशनम्।

नैयायिका वैशेषिकाश्चाभ्युपयन्ति। तत्र तर्कप्रकरणमिति पृथक्प्रकरणाभावेऽपि अविद्या-निरूपणे प्रसङ्गात् न्यायदर्शनाभिमतस्य तर्कस्य क्लृप्तेष्वेव प्रमाणेष्वन्तर्भावः संसाधितः। एवमविद्यान्तर्गततया संशयादीनामुल्लेखानन्तरं तर्कस्यापि अविद्यान्तर्गततया परिगणनं कृतं श्रीधरेणेति केचित्। चतुर्विधाविद्यातिरिक्तस्य पञ्चमस्य तर्कस्य प्रयोजनं च प्रपञ्चितं श्रीधरेणेतेत्यपि केचित्। तथा चोक्तं – **"नन्वविद्या चतुर्विधेति परिसंख्यानानुपपतिः, रूढस्य तर्कस्यापि सम्भवात्। अनुभूयते ह्यन्तरा संशयं निर्णयं च तर्कः"** इति। संशयनिश्चयाभ्यां विलक्षण एवासौ तर्कः। न कोटिद्वयाभावात् संशयः, विशेषदर्शनाभावान्न च निर्णय इति व्याख्यातं वैशेषिकमतम्।

तर्कस्य प्रयोजनमपि व्याख्यातं तत्रेत्थं तर्कः तत्त्वज्ञानार्थः इति। अपि च, प्रतिपक्षनिश्चयस्य इव प्रतिपक्षसंशयस्य अर्थात् बाधसंशयस्यापि हेतोरसाधकत्व-सम्पादकत्वमेव। यावत्पर्यन्तं बाधाभावसंशयस्य लेशमात्रमपि स्थितिः, न तावत्पर्यन्तं हेतोः साध्यसाधकत्वसामर्थ्यम्। तेन अपेक्षितः बाधाभावनिश्चयः। अतस्तादृशसंशय-निरासाय तर्कप्रवृत्तिः, तर्केण विषयविवेचनानन्तरमेव निर्बाधम् अनुमानप्रवृत्तिः इति सिद्धं तर्कस्य प्रमाणानुग्राहकत्वम्।

अत्रेदमपि ध्येयं, श्रीधराचार्यमते तर्को हि इतिकर्तव्यतां पूरयति। प्रमाणेन अर्थनिश्चयः कथं सम्पाद्यः इति आशङ्कायां तर्केण संशयनिरसनेन विषयो विवेच्यते, विषयविवेचनात्परं प्रवर्ततेऽनुमानम्, ततश्च तत्त्वज्ञानमुत्पद्यते।

यद्ययं तर्को न स्यात् तर्हि वैशेषिकसम्प्रदायसम्मतः अनिष्टप्रसङ्गः अपि न स्यात्, अनिष्टापादनरूपः प्रसङ्गः तर्कादनतिरिक्त एव। परं श्रीधरेण प्रसङ्गरूपेण तर्कः व्याख्यातः अपि।

अन्ततश्च श्रीधरेण स्वमतमुपस्थापयता उक्तं – ननु असौ तर्कः किंस्वरूपः? परपक्षाभावप्रतीतिरूपः चेत् सिद्धेष्वेव प्रमाणेषु अन्तर्भवति। अथ स्वपक्षसम्भावनारूपः चेत् तदा अन्योन्याश्रयः। तदा अनुमाने एव तदन्तर्भावात् नातिरिक्तः कश्चन तर्कोऽस्तीति वैशेषिकसिद्धान्तः।

सप्तपदार्थीत्याख्ये शिवादित्यमिश्रप्रणीते प्रकरणग्रन्थे तर्कः संशयविशेष इति सिद्धान्तः एव प्रतिपादितः।

## २.५. शास्त्रान्तरेषु प्रतिपादितं तर्कस्वरूपम्

शास्त्रान्तरेषु तर्कस्य अन्यविधं स्वरूपमपि प्रपञ्चितं दरीदृश्यते। यथा आक्षपादन्यायानुगतानां केषाञ्चित्सम्प्रदायानां नये, संशयनिर्णयपदार्थाभ्यां भेदः तर्कस्य असम्भवः, तर्कः संशय-निर्णयात्मक एव। केचिच्च प्रचलद्वाग्व्यवहारमनुगम्य तर्कस्य अनुमानपर्यायवाचित्वमुचूः। किञ्च, आगमाविरोधिन्यायस्तर्क इति प्रत्यक्षागमानुगामि-युक्तिः तर्कशब्देनाभिहिता। केचिच्च तर्कपदस्य मननवाचित्वम् अभ्युपयान्ति। तथा हि एषां नये हेतु-तर्क-न्याय-मनन-अन्वीक्षादिपदानि समानार्थकानि एव।

जैनसम्प्रदायाभिमततर्कस्वरूपम् – जैनादिदार्शनिकसम्प्रदायाः केचनानुमान-प्रमाणातिरिक्तस्य पृथक्प्रमाणस्य स्वतन्त्रस्य तर्कस्योपयोगित्वमनुभवन्ति। यद्यपि जैनग्रन्थेषु ऊहशब्देन तर्कस्योल्लेखः दृश्यते, तथापि जैनसम्मतं ऊहस्वरूपं भिन्नमेव न्यायदर्शनप्रदर्शितादूहस्वरूपात्। जैननये प्रमाणं स्वप्रकाशं सत् विषयप्रकाशकम्। तथा हि यशोविजयेन जैनसम्मतं प्रमाणलक्षणं संगृहीतम् – **"स्वपरव्यवसायि ज्ञानं प्रमाणम्"**[12] इति। अस्याशयः, स्वस्य तथापरस्य निश्चयात्मकज्ञानस्य जनकं यत् प्रमाणम्। तच्च प्रमाणं जैननये द्विविधं – प्रत्यक्षं परोक्षं चेति। एतयोः द्विविधप्रमाणयोः तर्कः परोक्षप्रमाणम्। तथा हि प्रभाचन्द्रसूरिणा तदीये प्रमेयकमलमार्त्तण्डे अगादि – **"उपलम्भानुपलम्भनिमित्तं व्याप्तिज्ञानमूहः"**[13] इति। अत्र लक्षणे उपलम्भस्य निश्चयः, अनुपलम्भस्य अनिश्चय इति तात्पर्यम्। यथा धूमसत्त्वे वह्निसत्ता, वह्न्यभावे च धूमाभाव इति हेतुसाध्ययोः यः अविनाभावः उपालम्भानुपलम्भाभ्यां निश्चीयते स एव ऊहः। तथा हि, प्रभाचन्द्रमते, **"व्याप्तिः साध्यसाधनयोरविनाभावः तस्य ज्ञानमूहः"**[14] इति। अतस्तस्योहस्य अविनाभावादिरूपत्वे पृथक्प्रामाण्यमङ्गीकार्यमिति जैनसिद्धान्तः।

बौद्धसम्प्रदायाभिमततर्कस्वरूपम् – बौद्धदार्शनिकाः प्रसङ्गानुमानान्तर्भावं विभावयन्ति तर्कस्य। तथाहि तेषां नये अनिष्टप्रसङ्गमूलकम् अनिष्टापत्तिमूलकं वा अनुमानमेव प्रसङ्गानुमानम् इति। तेन अनिष्टापत्तिमूलकस्य प्रसङ्गानुमानस्य अनुमानत्वे

[12] नास्तिकदर्शने प्रमाणतत्त्व इति ग्रन्थे, गङ्गाधर-कर-न्यायाचार्यसम्पादिते, पृ 143

[13] प्रमेयकमलमार्त्तण्डे, पण्डितमहेन्द्रकुमारशास्त्रिसम्पादिते, पृ 348

[14] तत्रैव

तर्कस्यापि अनुमानत्वं सिद्धम्। मोक्षाकरगुप्तेन प्रसङ्गलक्षणं लक्षितमित्थं – **“प्रमाणप्रसिद्धः व्याप्तिकेन वाक्येन परस्यानिष्टत्वादन्यायप्रसञ्जनं प्रसङ्गः”**[15] इति। अस्याशयः, यत् वाक्यं प्रमाणसिद्धां व्याप्तिं प्रकाशयति, तथा तेन परानिष्टापादनं च करोति तत् वाक्यमेव प्रसङ्ग इति।

मीमांसासम्प्रदायाभिमततर्कस्वरूपम् – नारायणभट्टेन मीमांसासम्मतं तर्क-लक्षणं तदीये मानमेयोदये पर्यालोचितं - **“प्रमाणेन साध्यमानस्यार्थस्यान्यथात्वशङ्कायां तन्निरासार्थमन्यथात्वे दोषकथनं तर्कः”**[16] इति। अस्यायमाशयः, प्रमाणेन पदार्थसाधनकाले साधनीये पदार्थे अन्यविधाशङ्कायां समुपस्थितायां तदन्यविधाशङ्काया निरसनाय दोषकथनमेव तर्कः। यथा वह्निव्याप्तिमद्धूम इति ज्ञानेन धूमेन वह्न्यनुमाने क्रियमाणे, ‘धूमः अस्तु वह्निर्मास्तु’ इति धूमसत्त्वेऽपि वह्न्यसत्त्वरूपान्यथात्वशङ्कायां समुपस्थितायां, तदन्यथात्वशङ्काया निरसनाय ‘यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यात्’ इति दोषकथनमेव तर्कः। वस्तुतः ‘यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यात्’ इति आशङ्काकारिणः कृते अनिष्टमेव। तस्यानिष्टस्य आपादनं तर्केण क्रियते इति सर्वत्र दर्शनेषु अनिष्टारोपः अनिष्टापादनमेव वा तर्कः इति फलति। मीमांसामते अपि तर्कः व्यभिचारसंशयनिरासेन अनुमितिज्ञानस्यानुग्राहकः।

सोयमूहशब्दः मीमांसकैः अनुमाने प्रयुक्तो दृश्यते। तथा हि वैकृतं कर्म धर्मि, तत्समवेतार्थप्रकाशकमन्त्रप्रयोगनिर्वर्त्यमिति साध्यो धर्मः, कर्मत्वात् प्रकृतकर्मवत् इति।

---

[15] तर्कभाषा ओ वादस्थान इति ग्रन्थे, एइच. आर. रङ्गस्वामि-आयेङ्गार-सम्पादिते, पृ 48

[16] मानमेयोदये, प्रथमखण्डे, दीननाथत्रिपाठिसम्पादिते, पृ 62

प्रकृतेषु कर्मसु तथा व्याप्तिग्रहणात् सर्वोऽयमनुमानमार्ग एव। अग्नये इत्यस्य स्थाने सूर्यायेति पदस्य प्रयोग ऊहस्य फलम्, न तु उहः। मीमांसकास्तु तदनभिज्ञया न्याये न्यायफले वा ऊहशब्दमुपचरन्ति।

वस्तुतः न्याये तावत् तर्कस्य लक्षणमूह इति कथितम् । एवञ्च एतैरभिप्रेतः अन्यादृशः। स च तर्कस्य लक्षणम्। मीमांसकैस्तु ऊहस्य लक्षणमुक्तं प्रयोगनिरूपणम् इति। एवञ्च तेषां तल्लक्ष्यस्थानीयम्। तैः तर्कस्य यल्लक्षणमूहः तन्नाभिप्रेतः इत्येव भाति। पारिभाषिकस्य ऊहस्य लक्षणमुक्तं तैः युक्त्या प्रयोगनिरूपणमिति।

परन्तु महर्षिणा गौतमेन न्यायदर्शनपृथक्प्रस्थानत्वेन प्रपञ्चितेषु पदार्थेषु प्रमाणानुग्राहकस्य तर्कस्य पृथगुल्लेखात् वार्त्तिककारैः उद्द्योतकरैः सूत्रकारानुसारि एव संसाधिता तर्कस्य पृथक्स्थितिः। तथाहि न्यायसूत्रभाष्यवार्त्तिककारमते **‘भवेदित्येष प्रत्यय इत्यस्य स्वरूपम्’** इति। अत्र ‘भवेत्’ इत्यत्र सम्भावनायां विधिलिङः प्रयोगात् संशय-निर्णयाभ्यामतिरिक्तः सम्भावनात्मकः ज्ञानविशेष एव तर्क इति बौद्धजैनादिसिद्धान्त-च्छेदः। भाष्यकारस्यापि एष एवाभिप्रायः।

किञ्च, **‘तर्को योगाङ्गमुत्तमम्’** इति राजनीतिशास्त्रशासनात्तर्कधाराविशेषो निदिध्यासनापरपर्य्यायपर ईरितः श्रीमधुसूदनसरस्वतीभिः श्रीसरस्वतीमानससूनुभिः। केचिच्च एतच्छास्त्रसहायेन तर्को योगस्य पञ्चमः अङ्ग इति प्रतिपादयन्ति। अमृतनादोपनिषदि अपि **“तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते”** इत्याम्नातम्।

## २.६. तर्कस्य सर्वप्रमाणानुग्राहकत्वम्

अक्षपादप्रणीतपादपस्य सान्द्रामृतरसस्यन्दफलेष्वनघमन्यतमं सुधियामति-प्रियञ्चेदं तर्कतत्त्वम्। सोऽयम् अनुमितिकारणीभूताविनाभावनिश्चयसम्पत्त्यर्थं साहचर्य-निश्चयप्रतिबन्धिव्यभिचारशङ्काध्वान्तकृन्तकस्तर्को हि न प्रमाणसंगृहीतः, नापि प्रमाणान्तरं, परं प्रमाणानुग्राहको न्यायपूर्वाङ्गो वादे स्वपक्षस्थापनाय परपक्षछेदनाय साधनायोपलम्भाय कल्प्यते इति न्यायसूत्रभाष्यकारराद्धान्तः। भाष्यकारेण भाषितं प्रथमसूत्रव्याख्यायां – **"तर्को न प्रमाणसंगृहीतो न प्रमाणान्तरं, प्रमाणानामनुग्राहक-स्तत्त्वज्ञानाय कल्पत"**[17] इति। अपि च, **"प्रमाणानि संशयिते विषये प्रवर्तितानि तर्केणानुगृह्यन्ते, तत्त्वज्ञानविषयस्य विभागात् तत्त्वज्ञानाय कल्पते तर्क इति सोऽयमित्थंभूतस्तर्कः प्रमाणसहितो वादे साधनायोपलम्भाय चार्थस्य भवतीत्येवमर्थं पृथगुच्यते प्रमेयान्तर्भूतोऽपि"**[18] प्रथमन्यायसूत्रभाष्ये।

ननु किं नाम प्रमाणानुग्राहकत्वमिति चेत्, उच्यते तार्किकरक्षायां –

**"पक्षे विपक्षजिज्ञासाविच्छेदस्तदनुग्रहः।"**[19] इति।

नव्यन्यायमते विशेषतः गङ्गेशोपाध्यायमते प्रमाणेन प्रमायां जननीयायां व्याप्तिनिश्चयविघटकव्यभिचारशङ्काविघटनद्वारा उपयोगीति प्रमाणानुग्राहकत्वं तर्कस्य। वस्तुतः प्रमाणेन प्रमायां जननीयायां विपर्ययाशङ्का समुदेति चेत्, यावत् अनिष्टापत्त्या

---

[17] न्यायदर्शने, फणिभूषण-तर्कवागीश-सम्पादिते, पृ 52

[18] तत्रैव

[19] तार्किकरक्षायां, पण्डितविन्ध्येश्वरीप्रसादद्विवेदिसम्पादितायां, पृ 196

विपर्ययाशङ्काया निवृत्तिर्न, तावत् प्रमाणेन प्रमोत्पत्तिरपि न सम्भवति। यदा च विपर्ययसंशयनिवृत्तिः, तदा एव प्रमाणं स्वविषये प्रवृत्तं तत्त्वज्ञानजनकं भवति। सुतरां प्रमाणानां स्वस्वविषये विपर्ययशङ्कानिवृत्तिरेव प्रमाणानुग्राहकत्वमित्याख्यातम्।

किं बहुना, **'ईशस्यैष निवेशितः पदयुगे...'** इति कुसुमाञ्जलिमङ्गल-कारिकाव्याख्यायां कुसुमाञ्जलिग्रन्थपक्षे पदपदतात्पर्यं प्रपञ्चयता टीकाकृद्भिरपि 'पद्यते गम्यते प्रत्याय्यतेऽनेनेति पदयुगमीशगमकद्वयं प्रमाणतर्कयुगलमेवे'त्यादिना कार्यत्वायोजनत्वादिहेतुकस्य ईश्वरसाधकानुमानस्य प्रमाणस्यानुग्राहकत्वेन तर्कः निर्दिष्टः। एवं न केवलमनुमानप्रमाणस्य, अपि तु समेषामेव प्रमाणामनुग्राहकस्तर्क इति सिद्धान्तः न्यायवैशेषिकशास्त्रेषु। किं बहुना, एतदनुरूपं प्रसिद्धं श्रीवरदराजाचार्यवचः - **"विरोधिशङ्कयावकुण्ठितां प्रमाजनकत्वशक्तिं प्रतिबन्धकशङ्कानिराकरणेनोद्भासयत्ययं तर्कः"**[20] इति। अपि च, वरदराजेनैव तार्किकरक्षायां भणितम् - **"प्रत्यक्षादेः प्रमाणस्य तर्कोऽनुग्राहको भवेत्"**[21] इति। तर्कसंग्रहदीपिकायायमाह अन्नंभट्टः – **"यद्यपि तर्को विपर्ययेऽन्तर्भवति, तथापि प्रमाणानुग्राहकत्वाद् भेदेन कीर्त्तनम्"**[22] इति। पदकृत्ये अपि – **"यद्यपि तर्कस्य विपर्ययात्मकत्वेन पृथग्विभागोऽनुचितः, तथापि प्रमाणानुग्राहकत्वात् स उदित"**[23] इति बोध्यम्।

---

20 तार्किकरक्षायां, पण्डितविन्ध्येश्वरीप्रसादद्विवेदिसम्पादितायां, पृ 196

21 तार्किकरक्षायां, पण्डितविन्ध्येश्वरीप्रसादद्विवेदिसम्पादितायां, पृ 193

22 तर्कसङ्ग्रहे, नारायणचन्द्रगोस्वामिसम्पदिते, पृ 569

23 तर्कसङ्ग्रहे, सात्कडिशर्मसम्पादिते, पृ 352

न्यायसिद्धान्तेन प्रभावितैः नव्यमीमांसकैः नारायणभट्टैरपि स्वकीये मानमेयोदये ग्रन्थेऽगादि -

**यतः प्रत्यक्षशब्दादिप्रमाणान्यखिलान्यपि।**

**तर्कं विना न जीवन्ति, प्रत्यक्षे तावदीक्ष्यताम्।।**

**तस्मात्सर्वप्रमाणानां तर्कोऽनुग्राहकः स्थितः।**

**साध्ये विपर्य्ययाशङ्काविच्छेदस्तदनुग्रहः।।**[24] इति।

ननु प्रसिद्धा एव कारिकैषा -

**धर्मे प्रतीयमाने हि वेदेन करणात्मना।**

**इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति।।**[25] इति।

अस्याः कारिकायाः गूढं तात्पर्यं हि, वेदार्थविचाराय मीमांसाशास्त्रस्य प्रवृत्तिः। तत्र मीमांसा नाम शब्दादिप्रमाणेन वेदार्थविषयको धर्मविषयको वा तर्कः, स एव प्रमाणानामितिकर्त्तव्यता। वेदादिशास्त्रवाक्येन धर्माणां प्रतिष्ठापनाय यथार्थार्थ-सदृशार्थाभासानामयथार्थार्थानां निराकरणं सम्पाद्य धर्मप्रतिपादकानां वेदवाक्यानां यथार्थार्थानामवधारणं व्यवस्थापनञ्चावश्यकम्, तच्च तर्केणैव संसाधयितुं शक्यम्। अतः

---

24 मानमेयोदये, गणपतिशास्त्रिसम्पादिते, पृ 18-21

25 तार्किकरक्षायां, पण्डितविन्ध्येश्वरीप्रसादद्विवेदिसम्पादितायां, पृ 193

स तर्क एव मीमांसाख्यया पारिभाषिक्या शब्दादिप्रमाणामुग्राहकः। तथाहि नारायणभट्टभणितिः -

**एवं सर्व्वत्र तर्कौघैरर्थाभासनिरासतः।**

**वाक्यार्थस्थापनी सर्व्वा मीमांसा तर्करूपिणी।।**[26] इति।

अतः तर्कात्मकमीमांसया प्रतिष्ठापितं तत्त्वमेव धर्मत्वेन ग्राह्यम्। अतः सादरमिदमुचूर्मतिमन्तः मनुभगवन्तः अपि–

**आर्षं धर्म्मोपदेशञ्च वेदशास्त्रविरोधिना।**

**यस्तर्केणानुसन्धत्ते तं धर्मं वेद नेतरम्।।**[27] इति।

अधस्तात् तर्कस्य सर्वप्रमाणानुग्राहकत्वस्य उदाहरणानि प्रदीयन्ते। तथा हि

**प्रत्यक्षप्रमाणानुग्राहकत्वम्** – न्यायमते भूतले घटाभावः इत्यत्र अभावस्य विशेषणतासन्निकर्षेण ग्रहः। ननु भूतले घटस्य प्रत्यक्षं येनेन्द्रियेण, घटाभावस्यापि प्रत्यक्षं तेनैवेन्द्रियेणिति न्यायमतम्। सम्प्रति भूतले घटः अस्ति न वा इति शङ्कायां समुपजातायां तर्कः प्रयुज्यते यदि भूतले घटः अभविष्यत् तर्हि भूतलस्येव घटस्यापि प्रत्यक्षमभविष्यत् इति। अत्र तर्के भूतले घटवृत्तिता आपादकः, घटप्रत्यक्षत्वं चापाद्यम्। भूतलवृत्तिघटस्य अवयवित्वात् प्रमातुः इन्द्रियादिना करणेन तस्येन्द्रियार्थसन्निकर्षः सम्भवः। अतः

[26] मानमेयोदये, गणपतिशास्त्रिसम्पादिते, पृ 20

[27] मनुसंहितायाम्, द्वादशे अध्याये, श्लोकः 106

आपाद्यापदकयोः व्याप्तिः सुनिश्चिता। अतः भूतले घटाभाव इति प्रत्यक्षप्रमाणस्य अनुग्राहकः असौ विपर्यये अवसानरूपः तर्कः।

**अनुमानप्रमाणानुग्राहकत्वम्** – आत्मनः नित्यत्वानुमाने संशयः जायते आत्मा अनित्य इति। तदा तर्कः प्रयुज्यते आत्मा यदि अनित्यः तदा तस्य संसारापवर्गौ न स्याताम् इति। परन्तु आत्मनः संसारापवर्गौ स्त इति सार्वजनीनप्रतीतिः। अतः अनेन तर्केण आत्मनः अनित्यत्वशङ्कानिरासेन नित्यत्वं सम्भाव्यते। एवमत्रानुमानप्रमाणस्य अनुग्राहकस्तर्कः।

**उपमानप्रमाणानुग्राहकत्वम्** – पुरोदृश्यमाने गवये गवयसादृश्यमस्ति न वेति संशये तर्कः प्रयुज्यते पूर्वदृष्टः गौः यदि न गवयसदृशः, तर्हि दृश्यमानो गवयः अपि गोसदृशो मास्तु इति। प्रकृते तर्के आपादकः गवि गवयसादृश्यताभावः, आपाद्यः गवये गोसादृश्याभावः च। अत्रापि आपाद्यविपरीते तर्कस्य पर्यवसानं भवति, आपाद्यापादकयोर्व्याप्तिश्च विद्यमाना।

**शब्दप्रमाणानुग्राहकत्वम्** – भाट्टमते अध्ययनविधेः फलत्वेनार्थज्ञानानङ्गीकारे स्वर्गस्वीकारे कल्पनागौरवम्। मीमांसामते गौरवमेव एकविधस्तर्कः। तथा हि अत्र तर्कः प्रयुज्यते यत्र दृष्टफलसम्भवः तत्रादृष्टस्वर्गरूपफलकल्पने गौरवम्। एवं कल्पनागौरवरूपस्तर्कः स्वर्गफलकत्वरूपार्थस्य प्रतिबन्धकः, तेन परपक्षदूषणं, भाट्टमतस्य च स्थापनं सम्भवति। न केवलं एतत्, बहुत्र वेदवाक्यार्थस्य विचारे अपि तर्कः शब्दप्रमाणानुग्राहकः।

## २.७. तर्कप्रयोजनम्

**'तर्काप्रतिष्ठानात्'**[28] इति ब्रह्मसूत्रस्य व्याख्याने श्रीमच्छङ्करभगवत्पादैः आम्नातमेवं यत् सूत्रार्थविप्रतिपत्तौ तर्केणैव प्रकृतसूत्रार्थो निर्णेय इति। अत्र एतत्सूत्रभाष्ये श्रीमच्छङ्कराचार्यभगवता सत्तर्कस्य प्रतिष्ठा विहिता, एतेन मोक्षोपयोगिब्रह्मतत्त्वनिरूपणे सत्तर्कस्य उपयोगिता प्रतिष्ठापिता। श्रीशङ्करभगवत्पादैः शाङ्करभाष्ये अपि भाषितम् – **"श्रुत्यर्थविप्रतिपत्तौ चार्थाभासनिराकरणेन सम्यगर्थनिर्द्धारणं तर्केणैव वाक्यवृत्तिरूपेण क्रियते।"**[29] इति।

श्रीभगवता श्रीमद्भगवद्गीतायां महर्षिणा बादरायणेन ब्रह्मसूत्रप्रणयनावसरे निरघस्य सत्तर्कस्य ब्रह्मतत्त्वनिरूपणे उपयोगित्वं यत् स्वीकृतं तस्य प्रामाणिकता प्रगीता। तथाहि त्रयोदशे अध्याये स्वयं गीतं श्रीभगवता – **"ब्रह्मसूत्रपदैश्चैव हेतुमद्भि-र्विनिश्चितैः।।"**[30] इति। ननु कथं सत्तर्कस्य ब्रह्मज्ञानोपयोगित्वमिति चेत्, उच्यते ब्रह्मविषयकानां विविधानां विरोधिमतानां निरासेन प्रकृततत्तत्त्वज्ञानस्य अवधारणं सत्तर्केणैव सम्भवति। तथाहि चार्वाक-बौद्ध-जैनादीनां आत्मतत्त्वविषयकविप्रतिपत्तीनां निरसनं भगवतप्रदर्शितेन सतर्केणैवेति महतामाचार्याणामपि एष एवाभिप्रायः। अन्यथा बौद्धप्रदर्शितेन कुतर्केण नैरात्म्यवादस्य अवधारणात् क्षणिकस्य विज्ञानस्य आत्मत्वाभ्युपगमे, जैनप्रदर्शिते देहपरिमिते आत्मतत्त्वे वा स्वारस्याधाने प्रकृतात्मतत्त्वं

[28] ब्रह्मसूत्रम् 2/1/12

[29] 2/1/11 ब्रह्मसूत्रस्य शाङ्करभाष्ये

[30] श्रीमद्भगवद्गीता 13/4

मुमुक्षोः दूरमपास्तं, तेन मुमुक्षोः आत्मसाक्षात्काराय यतमानस्य प्रकृतः अपवर्गः निर्व्वाणो वा न कदाचिदपि सेत्स्यति। अतः कठोपनिषदि भगवता यमेन आम्नातं – **"नैषा तर्केण मतिरापनेया"**[31] इति। अत्र तर्केण इति पदेन चार्वाक-बौद्ध-जैनादिनास्तिकोद्भावितैः असत्तर्कैः ब्रह्मतत्त्वनिरूपणासामर्थ्यं प्रपञ्चितम्। एवं न केवलं आत्मपदार्थं यथायथं निरूप्य तत्साक्षात्काराय यत्नवतो मुमुक्षोः कृते सत्तर्कस्य पारमार्थिकम् उपयोगित्वम्, अपि तु लोके अपि वस्तुतत्त्वनिर्णये व्यवहारिक उपयोगः अपि सत्तर्कस्य प्रसिद्धः इति अवधेयम्।

धर्मनिर्णयार्थं वेदाविरोधिनः तर्कस्य प्रयोजनीयता श्रीमनुना भगवता अपि उररीकृतम्। तथाहि धर्मनिर्णयावसरे परस्परविरोधिविविधमतानां समुपस्थितौ कतरन्मतमुपादेयं, कस्य च हेयता तत्सर्वं यथायथतया निर्णेयं वेदाविरोधिना तर्केण। एतस्य मतस्य समर्थनं महाभारते अपि प्राप्यते।

विदितमेव पदार्थतत्त्वज्ञानेन जन्तूनां निःश्रेयसाधिगतये प्रवर्तितं न्यायवैशेषिकं शास्त्रम्। निःश्रेयसापरपर्यायः अपवर्गश्च तत्त्वज्ञानद्वारकमिथ्याज्ञाननाशलभ्यः। ननु तत्त्वावबोधः कथमिति चेत् तस्य बहुषूपायेषु प्रसिद्धेषु वादो हि अनन्यः। तथाहि न्यायः – **'वादे वादे जायते तत्त्वबोधः'** इति। ननु कोऽयं वाद इति चेत् महर्षिणाक्षपादेन वादः सूत्रित इत्थम् – **"प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वाद"**[32] इति। वादे स्वपक्षस्थापनाय परपक्षनिरासाय च

[31] कठोपनिषद 1/2/9

[32] न्यायसूत्रम् 1/1/34

प्रमाणातर्कान्यतरसमाश्रयणात् प्रमाणतर्कसाधनोपालम्भत्वमस्यान्वेति। वस्तुतः प्रमाण-तर्कसाधनोपालम्भत्वं न केवलं वादस्य, अपि तु वादजल्पवितण्डासु तिसृषु एव। परं वादार्थमुपयुज्यमाने तर्के प्रमाणानुसरणं सुलभम्। यद्यपि तत्त्वनिश्चये प्राधान्यं प्रमाणस्य, तथापि प्रमाणविषयविपर्य्ययशङ्काविघटितप्रमाणानामुपोद्बलकः असौ तर्क एव। अत्रेदमवधेयं, जल्पवितण्डयोः प्रमाणसाधनाभावात् तत्र निष्प्रयोजनः परपक्षोपालम्भः, अतो वादे प्रयुज्यमानः तर्को हि सत्तर्कः, जल्पवितण्डयोः उपयुज्यमानः तर्कस्तु असत्तर्क इति व्यवहारः।

किञ्चेदमप्यवधेयम्, तत्त्वाबोधजनने कल्पते उत्सहते अयं तर्कः, परं नासौ साक्षात् साधयति तत्त्वाबोधमप्रमाणत्वात्। तथाहि तर्कस्य परम्परया तत्त्वबोधजनकत्वं साधयति भाष्यकारः अनवधारणात् इति पदेन। तथाहि भाष्यम् – 'अनुजानात्ययमेकतरं धर्मः कारणोपपत्त्या, न त्ववधारयति, न निश्चिनोति एवमेवेदमिति, तत्त्वज्ञान-विषयाभ्यनुज्ञालक्षणादूहाद् भावितात् प्रसन्नादनन्तरं प्रमाणसामर्थ्यात्तत्त्वज्ञानमुत्पद्यत इति तर्कस्तत्त्वज्ञानार्थ' इति। एतेन तर्कः तत्त्वज्ञानजनकः अपि निश्चयाद्विलक्षणः, अतः अयथार्थज्ञाने परिगणनम्।

## २.८. तर्कभेदाः

प्राचां नये तर्कस्य प्रसिद्धं पञ्चविधत्वमपि आचार्यो वरदराजः तार्किकरक्षायां संगृह्णाति –

**आत्माश्रयादिभेदेन तर्कः पञ्चविधः स्मृतः ।**[33] इति।

तथाहि तर्कस्य पञ्च भेदा यथा – आत्माश्रयः, इतरेतराश्रयः, चक्रकाश्रयः, अनवस्था अनिष्टप्रसङ्गश्चेति। तत्र कस्यचित् पदार्थस्य उत्पत्तौ, स्थितौ, ज्ञाने वा अव्यवहिततया स्वस्यैवापेक्षा चेत् तत्प्रयुक्ता या अनिष्टापत्तिः, आत्माश्रयः सः। तथाहि तल्लक्षणं - **'स्वापेक्षितत्वेऽनिष्टप्रसङ्ग आत्माश्रयः।'** इति। कस्यचित् पदार्थस्य उत्पत्तौ, स्थितौ, ज्ञाने वा यस्य अपेक्षा स पदार्थः अपि वर्ण्यमानस्य पदार्थस्य अपेक्षायां चेत् तत्प्रयुक्ता अनिष्टापत्तिः इतरेतराश्रयः अन्योन्याश्रयः वा। तथाहि तल्लक्षणम् - **'तदपेक्ष्यापेक्षितत्वनिबन्धनोऽनिष्टप्रसङ्गः अन्योन्याश्रयः।'** इति। एवं कस्यचित् पदार्थस्य उत्पत्तौ, स्थितौ, ज्ञाने वा अपरपदार्थद्वयस्य अपेक्षानन्तरं पुनः तस्य स्वस्यैवापेक्षा चेत् तत्प्रयुक्ता अनिष्टापत्तिः चक्रकाश्रयः। तथाहि तक्रकस्य लक्षणमुक्तम् - **'तदपेक्ष्यापेक्ष्यापेक्षितत्वनिबन्धनोऽनिष्टप्रसङ्गः चक्रकम्।'** इति। यादृशापत्तेः न क्वापि विश्रान्तिः, तादृशी प्रवहमाना अनिष्टापत्तिः एव अनवस्था। **'अनवस्थितपरम्परोपाधीनामनिष्टप्रसङ्गोऽनवस्था'** इति अनवस्थालक्षणम्। परन्तु एतादृशी आपत्तिः प्रामाणिकी चेत् तदा इष्टापत्तिरेव, तथात्वे तस्या अनवस्थातर्कत्वं न कल्पनीयम्। पञ्चमः तर्कः हि अनिष्टप्रसङ्गः इति। वस्तुतस्तु आत्माश्रय-अन्योन्याश्रय-चक्रकाश्रय-अनवस्थावर्जः सर्वविधः तर्कः, चतुष्टयवर्जं तर्कमात्रमेव एव वा अनिष्टप्रसङ्गः इति ज्ञेयः। वस्तुतस्तु एतस्मादेव कारणात् वृत्तिकृता विश्वनाथेन एष पञ्चमः भेदः

[33] तार्किकरक्षायां, पण्डितविन्ध्येश्वरीप्रसादद्विवेदिसम्पादितायां, पृ 196

'तदन्यवादितार्थप्रसङ्ग' इति अभिहितः। अनिष्टप्रसङ्गविषयकः सिद्धान्तः संगृहीतः श्रीमता वरदराजेन तार्किकरक्षायाम् –

**तर्कोऽनिष्टप्रसङ्गः स्यादनिष्टं द्विविधं स्मृतम्।**

**प्रामाणिकपरित्यागस्तथेतरपरिग्रहः।।**[34] इति।

अप्रामाणिकस्य अनिष्टस्य प्रसङ्ग आपत्तिरेव पञ्चमः तर्कः। स च अनिष्टो द्विविधः – प्रामाणिकपदार्थपरित्यागः अप्रामाणिकपदार्थपरिग्रहश्च। यथा जलपानं न तृष्णानिवर्त्तकम् इति श्रवणेन पिपासुः जलं न पिबतु इत्यनिष्टापत्तिः। वस्तुतस्तु जलपानस्य तृष्णानिवर्त्तकत्वं प्रामाणिकम्, तस्य अपलापे प्रामाणिकपरित्यागरूपः आद्यविधः अनिष्टः। किञ्च, जलपानमन्तर्दाहोत्पादकम् इति कथनेनापत्तिः जलपानं ममापि अन्तर्दाहमुत्पादयतु इति। अत्र जलपानस्य अन्तर्हादजनकत्वरूपः अप्रामाणिकः पदार्थो हि द्वितीयः अनिष्टः। एवं पूर्वोक्तयोः ययोः कयोरपि अनिष्टयोः आपत्तिः एव ऊहरूपः तर्कः। वस्तुतस्तु अनिष्टस्य आपत्तिः प्रसङ्ग इति अनुच्चार्य अनिष्टव्यापकपदार्थप्रसङ्ग इत्येव कथनमुपपन्नमिति भाति।

व्याघातः, आत्माश्रयः, इतरेतराश्रयः, चक्रकाश्रयः, अनवस्था, प्रतिबन्धि-कल्पना, लाघवकल्पना, गौरवम्, उत्सर्गः, अपवादः, वैजात्यमिति प्राचीननैयायिकैः तर्क एकादशविधः प्रोक्तः। सर्वदर्शनसंग्रहे अक्षपाददर्शने सायणमाधवाचार्येण आत्माश्रयादि-चतुर्विधतर्काणां, ततः व्याघातादिसप्तविधतर्काणामुल्लेखानन्तरमेते एकादशविधाः

[34] तार्किकरक्षायां, पण्डितविन्ध्येश्वरीप्रसादद्विवेदिसम्पादितायां, पृ 195

गौतमोक्ततर्कपदार्थस्यैवेति प्रतिपादयन्ति। मानमेयोदये श्रीमता भट्टनारायणशर्मणा आत्माश्रयादिचतुर्विधानां तथा गौरव-लाघवयोः नामग्राहं उल्लेखेन तर्कस्य षट् भेदा उल्लिखिताः, परम् अनिष्टप्रसङ्गस्य उल्लेखस्तत्र न विहितः। एवं न्यायपरिशुद्धौ वेङ्कटनाथेन आत्माश्रयादिचतुर्विधैः तर्कैः सह विरोध-असम्भवयोः ग्रहणेन तर्कस्य षड्विधत्वमाकूतम्, परमत्रापि अनिष्टप्रसङ्गस्य ग्रहणं न दृक्पथमायाति।

यद्यपि प्रथमोपस्थितत्वम्, उत्सर्गः, विनिगमनाविरहः, लाघवम्, गौरवम् इत्येतेषां तर्कभेदत्वं प्रपञ्च्यते तथापि तन्नोपपन्नम्, तेषाम् आरोपापत्तिरूपत्वाभावात्। वस्तुतः प्रमाणेन तत्त्वनिर्णयकाले प्रमाणसहकारितया तर्कसाधर्म्म्यमाचरतामेषां तर्कवत् व्यवहारः, तेन एषु तर्कशब्दस्य औपचारिकव्यवहारः इति न्यायसूत्रवृत्तिः। व्याघातादीनामपि अप्रसङ्गरूपत्वात् न तर्कत्वम्, किन्तु पञ्चविधत्वमेवेति नव्याः।

## २.९. तर्कस्य संशयनिश्चयानुमानातिरिक्तत्वविचारः

ननु प्रथमसूत्रे पृथगुल्लिखितः तर्कपदार्थो संशये निश्चये अनुमाने वान्तर्भवन् नातिरिच्यत इति केषाञ्चिदाक्षेपः। ते हि सम्भावनात्मकज्ञानस्य पृथक्त्वं नाङ्गीकुर्वन्ति। तथा हि सप्तपदार्थीकारः शिवादित्यमिश्रः तर्कस्य संशयात्मकत्वं स्वीकरोति - **"ऊहानध्यवसाययोस्तु संशये एव"**[35] इति। उभयकोटिके संशये यस्मिन् कोटौ सम्भावनप्राबल्यं स ऊह एव। तथा हि स्थाणुर्वा पुरुषो वा इति संशयानन्तरं

[35] सप्तपदार्थ्यां, तपनशङ्करभट्टाचार्य्यसम्पादितायां, पृ 166

करचरणादिमत्त्वात् अयं पुरुष एव इति सम्भावनस्य उत्कटत्वात् स एव संशय ऊह इत्युच्यते इति तस्याशयः। तथा हि उक्तं – **"उत्कटैककोटिकः संशयः ऊहः"**[36] इति।

परं नव्यनैयायिका नैदं सहन्ते। तेषां नये, सम्भावनात्मक ऊहो न संशयः। तथा हि संशय उभयकोटिकज्ञानम्। परं तर्के संशयविषयीभूतयोः कोट्योः एकतरस्य अनुज्ञा, एकस्मिन् एव सम्भावना नोभयकोटौ इति पृथक्त्वं संशयात् तर्कस्य। संशये उभयकोट्योः समानतया ज्ञानं सम्भवति यथा स्थाणुर्वा पुरुषो वा इति। परं तर्के एकतरकोटौ सम्भावनायामपरस्य ज्ञानं नैव भवतीतीदमपि पार्थक्यम्। किञ्च सम्भावनात्मकोहरूपस्य तर्कस्य संशयत्वे अनिष्टापत्तिरपि। तर्को हि विपर्ययशङ्कानाशकः। तर्कस्य संशयत्वे न हि एकेन संशयेन अपरसंशयनाशः सम्भवेदिति तर्कस्य संशयत्ववादिमतं हेयमेव।

किञ्च, **"विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः"**[37] इति। तर्कश्च अनवधारणात्मकं ज्ञानम्। अतस्तर्को निर्णये नान्तर्भावमर्हति।

तथा हि विशदतया पर्यालोच्यते चेद्वक्तुं शक्यते, अत्र पूर्वपक्षिणां प्रसिद्धं कोटित्रयम्। प्रथमतः, अयथार्थज्ञानत्वात् संशयाद् न भिद्यते तर्कः इति। द्वितीयतः, प्रमाणानुग्राहकतया निश्चितज्ञानजनकत्वेन निश्चयान्तर्गत एवासौ तर्क इति। तृतीयतः, उपपत्तिसापेक्षत्वात् युक्तिनिर्भरत्वात् अनुमानस्यैव तर्क इति व्यपदेशः, न तर्को भिन्नः

---

36 सप्तपदार्थ्यां, तपनशङ्करभट्टाचार्य्यसम्पादितायां, पृ 166

37 न्यायसूत्रम् 1/1/41

अनुमानात् इति, अत एव अनुमानस्य परमन्यायः, अन्वीक्षा, हेतुविद्या तर्क इत्यादिसंज्ञाभेदाः प्रसिद्धाः। कोटित्रये एव तर्कस्य पृथग्ग्रहणमनावश्यकमिति कारणात् न्यायशास्त्रे पृथक्पदार्थत्वेन तर्कस्य विचारः असङ्गत इत्येवं प्रपञ्चितः।

अत्रोच्यते, संशयः हि उभयकोटिकः अनवधारणात्मकः प्रत्ययः। तथाहि प्राचां ग्रन्थे प्रपञ्चितम् – **"स चायं किंस्विदिति वस्तुविमर्शमात्रमनवधारणरणं ज्ञानं संशयः"**[38] इति। यथा अयं स्थाणुर्वा पुरुषा वेति वस्तुविमर्शमात्रमनवधारणं ज्ञानम्। नहि अत्र संशये स्थाणुरेव, पुरुष एव इत्येवम् अवधारणात्मकं निश्चयज्ञानं जायते। विशेषदर्शने सति संशयो निवर्तते, विशेषदर्शनजन्यं ज्ञानं हि निश्चयः। यथा स्थाणुत्वव्याप्यकोटरादि-मानयमिति विशेषदर्शने सति पुरतो दृश्यमानः पदार्थः स्थाणुरेव इति निश्चयात्मकं ज्ञानं जायते, यथा वा पुरुषत्वव्याप्यकरचरणादिमानयमिति विशेषदर्शने सति पुरतो दृश्यमानः पदार्थः पुरुष एव इति निश्चयात्मकः प्रत्ययो जायते। तर्के तु तादृशस्य विशेषदर्शनस्य अभावात् नायं तर्को निश्चय इति द्वितीयः पक्षो निरस्तः।

किञ्च, उभयकोटिकविमर्शात्मकानवधारणप्रत्ययत्वाभावात् नायं संशय इति प्रथमः अपि पक्षः उपहसित एव। वस्तुतो यस्य पदार्थस्य स्वरूपं तत्त्वतः अज्ञातं, तस्य यतार्थतया तत्त्वनिर्धारणाय स्वाभाविकी या इच्छा सा जिज्ञासा। जिज्ञासायां सत्यां सामान्यतया ज्ञातस्य तस्य स्वरूपविषये संशय उभयकोटिक उत्पद्यते यथा किंस्विदित्येवम् आहोस्वित् नैवमिति। एकस्मिन् एव धर्मिणि विमृश्यमानयोः तयोः परस्परविरोधिनोः

[38] वात्स्यायनभाष्ये, फणीभूषणतर्कवागीशसम्पादिते, पृ 27

धर्मयोः युगपदेकत्र सद्भावाभावात् एकतरपरित्यागेनान्यतरस्य ग्रहणमनिवार्यम्। अथ कस्मिन् पक्षे स्वारस्यमाधेयमिति ज्ञातुं विरुद्धधर्मयोः तयोः यस्मिन् पक्षे कारणोपत्तितः सम्भावनात्मकः प्रत्ययो लभ्यते, स एव पक्षो यथार्थः। एवं संशयानन्तरं सम्भावितयोः द्वयोः विरुद्धधर्मयोः एकस्मिन् पक्षे प्रमाणसम्भावनप्रयुक्तो ऊहात्मको ज्ञानविशेष एव तर्कः। अतः संशयः तर्कस्य पूर्वभावी, न हि संशये अन्तर्भावः तर्कस्य। सूत्रकारेण गोतमेनापि संशये तर्कान्तर्भावस्य अनिष्टत्वं प्रपञ्चयितुं '**कारणोपपत्तितः**' इत्यादि पदं सूत्रे सन्निवेशितम्।

अत्र पुनः आशङ्का इत्थं पूर्वपक्षिणां यत् एकस्मिन् धर्मिणि सामान्यतया ज्ञातयोः धर्मयोः एकतरपक्षयोः हेयत्वं प्रदर्श्य अन्यतरे पक्षे कारणोपपादनेन सम्भावनात्मकः प्रत्ययो हि तर्क इति यदुच्यते तत्रापि संशयनिश्चयान्यतरयोः तर्कस्यान्तर्भावः प्रदर्शयितुं शक्यम्। यथा अश्वधावनादिक्रीडायां दूरतः ऊर्ध्वत्वविशिष्ट-व्यापारवद्धर्मिणो दर्शनेन प्रत्ययो जायते अयं पुरुष इति, एष प्रत्ययः तर्क एव। किन्तु अत्र ज्ञाने धर्मिणः विशेषदर्शनमस्ति न वेति आशङ्का। प्रथमपक्षस्वीकारे एतस्य ज्ञानस्य निश्चयात्मकत्वं विशेषदर्शनात्, द्वितीयपक्षाभ्युपगमे विशेषदर्शनाभावे सामान्य-ज्ञानाभ्युपगमे तु एतस्य संशयात्मकत्वम्। तथाहि धर्मिणः विशेषज्ञानं निर्णये, तथा सामान्यज्ञानं संशये प्रयोजकमिति प्रसिद्धम्। एवं संशय-निश्चययोः मध्यगतस्तर्कः न पृथक्प्रमेय एवाभ्युपगन्तव्यः, तस्य प्रमाणानुग्राहकत्वं तु दूरमपास्तम् इति दूषयितारः।

अत्रोच्यते, संशये द्वयोः धर्मयोः समप्राधान्येन प्रतीतिः प्रसिद्धा। यथा स्थाणुर्वा पुरुषो वा इति प्रतीतौ उभयकोट्योः समानं प्राधान्यम्। एवम् निश्चये एकस्यैव धर्मस्य कोटेः वा प्राधान्यं, तस्यैव सिद्धान्तरूपेण पर्यवसानम्। यथा अयं पुरुष एव इति। अत्र अवधारणार्थकेन एव इति शब्देन एकतरस्य पक्षस्य निश्चिततया प्रतिपादयित्री प्रतीतिः एकपक्षावगाहिनी निर्णयः। परन्तु तर्के एकमेवपक्षमाश्रित्य कारणोपपत्त्या सम्भावनामात्रम् एव दृश्यते। यथा अयं पुरुषः सम्भविष्यति इत्यादि सम्भावनाप्रयुक्तम् ज्ञानम्। अत्र कोटिद्वयाभावात् तर्को न संशयसंगृहीतः। एकतरपक्षप्रतिपादनपरः अपि अवधारणात्मक-एवकाराभावात् सम्भावनमात्रप्रतिपादनात् न तर्को निर्णयान्तर्गत इति। अतः पूर्वस्मिन् प्रत्यये अश्वधावनादिक्रीडाया दृष्टान्ते यत् अयं पुरुष इति प्रत्ययः न स विशेषदर्शनजन्यः, अतो न निर्णयः। विशेषदर्शनाभावे सामान्यज्ञाने सत्यपि कोटिद्वयाभावात् पुरुषसम्भावनमात्रस्य द्योतनात् न संशयः। एवं संशयनिर्णयाभ्यां पृथक्प्रमेयत्वं तर्कस्य न्यायसूत्रभाष्य-न्यायमञ्जर्यादिष्वपि प्रपञ्चितम्।

तर्कः अनुमानमेवेति तृतीयः पक्षः अपि नितरां हेय एव। तथाहि अनुमानस्य वह्निव्याप्यधूमवान् अयमिति परामर्शाख्यात् विशेषप्रत्ययात् विशेषदर्शनाद्वा उत्पत्तिः। तर्के तु विशेषदर्शनं नास्ति इति विशेषदर्शनाभावाद् अयमपि पक्षः निरस्त एव। नन्वास्तां न तर्कः अनुमानम्, किन्तु तर्कः अनुमानविशेष एव भवतु। युक्त्यपेक्षम् अनुमानं तर्क इति मतविशेषः। तन्मतानुसारं युक्तिजन्यं ज्ञानमनुमानं तर्क इति पर्यवसितम्। नन्वत्र युक्तिर्हि प्रमाणोपपत्तिः। तथा सति तस्मात् कारणाद् उत्पन्नं ज्ञानं तर्क इति

मतविशेषाभिप्रेतार्थः। स चास्माकमपि इष्ट एव। वस्तुतस्तु मतविशेषवादिभिः नो मते नास्ति भेदः। भेदस्तु केवलं संज्ञायामेव। उभयत्र फलं तु समानमेव।

मतविशेषवादिभिः उच्यते यन्नास्माकं मते प्रमाणोपपत्तिर्युक्तिः येन उभयोर्मते केवलं संज्ञाभेदः स्यात्। किन्तु युक्तिर्हि प्रमाणोपपत्त्यपेक्षया भिन्नैव। तेन यदनुमानं युक्तिमपेक्षते तदेव अनुमानविशेष एव तर्क इति सिद्धम्।

अत्रोच्यते यत् प्रत्यक्षागमैकविषयत्वम् एव अनुमानस्य युक्त्यपेक्षत्वं चेत्तर्कः अपि प्रत्यक्षसिद्धे आगमसिद्धे वार्थे प्रवर्तते इति तर्कस्यापि युक्त्यपेक्षत्वं सिद्धमेव। तथाहि प्रत्यक्षेण भूतलविशेषणतया घटाभावे गृहीते सत्येव यद्यत्र घट इत्यादितर्कस्य प्रवत्तिः। अपि च, श्रुतिसिद्धे एव आत्मनि यद्ययमात्मा इत्यादितर्कस्य प्रवृत्तिर्दृश्यते नान्यथा। एवं हि तर्कः अनुमानस्यैव प्रभेदविशेषः। अनुमानप्रभेदस्य अनुमाने एवान्तर्गतत्वात् प्रमाणान्तरत्वविरहाच्च अनुमानप्रमाणेनैव संगृहीतस्तर्कः इति तर्कस्य पृथक् पाठः अयुक्तः।

अपि च, पूर्वपक्षिण आक्षिपन्ति, तर्कः अनुमानमिति प्रमाणेनापि निश्चितम्। तर्कस्य अनुमानत्वे प्रमाणम् अनुमानमेव। तथाहि अनुमानाकारः – ‘तर्कः अनुमानं लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वात् अनुमानवत्’ इति। अत्र अनुमाने पक्षः तर्कः, साध्यं अनुमानत्वम्, हेतुः लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वम्, दृष्टान्तः च अनुमानम्। एतेन अनुमानेन पक्षे तर्के अनुमानत्वं साध्यते लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वहेतुना। दृष्टान्ते अनुमानप्रमाणे यथा अनुमानत्वं वर्तते, तथा लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वम् अपि वर्त्तते।

तेन यत्र लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वम् तत्र अनुमानत्वमिति व्याप्तिग्रहः। अनया व्याप्त्या साध्ये तर्के लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वहेतुना अनुमानत्वं सिध्यति। लिङ्गं व्याप्यं हेतुः, लिङ्गी व्यापकं साध्यं, तयोः यो हेतुसाध्ययोः सम्बन्धः व्याप्तिः, तत्स्मृतिसापेक्षं भवति अनुमानं प्रमाणम्। एवं तर्के अपि लिङ्गम् आपाद्यं, लिङ्गि आपादकं, तयोः आपाद्यापादकयोः यो व्याप्तिः सम्बन्धः, तत्स्मृतिसापेक्षं भवति तर्कः। अतः तर्कः अनुमानमेवेति प्रमाणितमिति चेत्, अत्रोच्यते, पर्वतो वह्निमान् धूमात् इति अनुमाने पर्वते पक्षे लिङ्गस्य हेतोः दर्शनात् उपपन्नं तत्र अनुमानप्रमाणस्य लिङ्गलिङ्गिसम्बन्ध-स्मृत्यपेक्षत्वम्। अत्र धर्मी पक्षः, साधनधर्मो हेतुः उभयोरेव प्रत्यक्षेण प्रत्ययः। पक्षस्य पर्वतस्य, तथे तत्र विद्यमानस्य साधनधर्मस्य हेतोः धूमस्य प्रत्यक्षेण ग्रहणे पक्षधर्मताज्ञानम्, पक्षधर्मतायां सत्यामेव लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षया पर्वते पक्षे धूमस्य हेतोः दर्शनेन साध्यस्य वह्नेः अनुमानसिद्धिः। परन्तु तर्के तु न तथा। तर्के धर्मिदर्शनमात्रमेव केवलं भवति। तत्र साधनधर्मस्य लिङ्गस्य दर्शनं नोपपन्नम्। तथाहि उदाहरणतया वक्तुं शक्यते, यदि उत्पत्तिमान् आत्मा अभविष्यत् तर्हि संसारापवर्गौ न उत्पत्स्येताम् इति तर्के धर्मिणि आत्मनि साधनधर्मस्य लिङ्गस्य उत्पत्तेरभावात् लिङ्गलिङ्गिसम्बन्धस्मृतिरपि न सम्भवति। अतः तर्को नानुमानम्।

किञ्च, तर्कानुमानयोः वैलक्षण्यमन्यद् दर्शयितुं शक्यते। तथा हि धर्मिगत-धर्मोपलब्धिः अनुमाने दृश्यते। पर्वते धूमेन वह्न्यनुमाने, पक्षे धर्मिणि पर्वते एव साधनधर्मस्य लिङ्गस्य धूमस्य उपलब्धौ एव वह्न्यनुमानं प्रवर्तते। परन्तु तर्के तु न तथा।

तद्धर्मगतधर्मोपलब्धिं विनापि, अन्यत्र धर्मोपलब्धौ सत्यामपि तर्कः प्रवर्तत एव। यथा प्रागुक्तअश्वधावनादिक्रीडादृष्टान्तसहायेन वक्तुं शक्यते यत्, अयं स्थाणुर्वा पुरुषो वा इति संशये अश्वा बाह्यन्ते इति दृष्टान्तेन अश्ववाहनाधिकरणत्वं यद्यपि न पुरुषधर्मः किन्तु देशधर्मः, तथापि अन्यत्र उपलब्धं तं धर्ममादाय धर्मिणि पुरुषत्वम् अभ्युपगम्यते, स्थाणुत्वादिकं च व्यवच्छिद्यते। अतः अनुमानात् तर्कस्य भेदः स्फुटतर एवेति तर्कः अनुमानं भवितुं नार्हति। अत एषः अपि पक्षो हेयः।

अतः तर्कः पृथक्पदार्थ इति उपपन्न एवेति धिया मुक्तावल्यां विश्वनाथेनापि प्रतिपादितं – **"संशयनिर्णयातिरिक्तः सम्भावनात्मको ज्ञानविशेषस्तर्कः"**[39] इति।

## २.१०. अध्यायोपसंहारः

*दर्शनशास्त्रेषु तर्कस्य स्वरूपं प्रयोजनञ्च* इत्याख्ये द्वितीये अध्याये अस्माभिः तर्कस्वरूपं, तर्कलक्षणं, तर्कप्रयोजनं, तर्कभेदा, तर्कस्य संशयनिश्चयानुमानातिरिक्तत्वम् इत्येते विषयाः पर्यालोचिताः। तर्कस्वरूपलक्षणवचश्चर्चायां प्रथमतः प्राचीनन्यायमतं, अतिसमासेन नव्यन्यायनयः, वैशेषिकमतं चातः पर्यालोचितमिह। ननु कथमिह न विशदतया नव्यन्यायनयसन्निवेश इति चेदुच्यते, तृतीये अध्याये तत्त्वचिन्तामणिसम्मतस्य तर्कस्वरूपस्य पर्यालोचनमेवेह तथात्वे बीजम्। ततः **'अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः'** इति सौत्रतर्कलक्षणपर्यालोचनं विधाय नव्यानां **'व्याप्यारोपेण**

[39] भाषापरिच्छेदे, पञ्चाननभट्टाचार्य्यशास्त्रिसम्पादिते, पृ 539

**व्यापकारोपस्तर्क'** इति तर्कलक्षणं समासेन परीक्षितम्। भाष्यस्थलक्षणस्य कारणोपपत्तिरिति पदस्य प्रमाणसम्भावनेत्याद्यर्थकल्पने प्राचां लक्षणेन नव्यानां लक्षणस्य समानता इत्यपि प्रतिपादितः प्रबन्धे। प्रसङ्गात् न्यायकुसुमाञ्जलिपर्यालोचितस्य न्यायमञ्जरीधृतस्य च तर्कविचारस्य समासेनेह विमर्श उपस्थापितः। शास्त्रान्तरेषु जैन-बौद्ध-मीमांसादिषु सम्प्रदायेषु प्रतिपादितं तर्कस्वरूपं सामान्यतया पर्यालोच्य तर्कस्य सर्वप्रमाणानुग्राहकत्वमिह प्रपञ्चितम्। न्यायवैशेषिकसम्प्रदाये चतुर्णामेव प्रमाणानां सूरिभिर्ग्रहणादत्र प्रबन्धे न्यायवैशेषिकाभिमततर्कस्वरूपस्य च प्रतिपादनीयत्वात् तर्कस्यार्थापत्त्यादिप्रमाणानुग्राहकत्ववर्णनमिहासङ्गतमिति धिया नासङ्गतं शास्त्रे प्रयुञ्जीतेति न्यायस्मरणात् तिरस्कृतम्। एवं क्रमेण तर्कप्रयोजनं, तर्कभेदांश्च पर्यालोच्य अध्यायान्ततः तर्कस्य संशयानुमानान्तर्भावविचारः उपस्थापितः। तर्कपदार्थो संशये निश्चये अनुमाने वान्तर्भवन् नातिरिच्यत इत्याक्षिपतां पूर्वपक्षमतानामसारत्वं प्रदर्श्य न्यायमतानुसारं तर्कपदार्थस्य पृथक्पदार्थत्वोपपादने प्रयासः विहितः। पूर्वपक्षिणां प्रसिद्धं कोटित्रयमिह पर्यालोचितम्। तत्र तर्को न संशयसंगृहीतः, उभयकोटिकविमर्शात्मकानवधारण-प्रत्ययत्वाभावात्, विशेषदर्शनाभावे सामान्यज्ञाने सत्यपि कोटिद्वयाभावात् पुरुष-सम्भावनमात्रस्य द्योतनात् चेति प्रथमः पक्षः युक्त्या तिरस्कृतः। एवं निश्चयान्तर्गत एवासौ तर्क इति द्वितीयः पक्षः अपि निरस्तः, विशेषदर्शनाभावात् अवधारणात्मकत्वात् च। तृतीयतः, अनुमानस्यैव तर्क इति व्यपदेशः, न तर्को भिन्नोऽनुमानादिति मतमपि हेयमिति प्रदर्श्य तर्कस्य पृथक्पदार्थत्वमुपपन्नमेवेति प्रतिपादितमिहेति शिवम्।

# तृतीयः अध्यायः

# *तत्त्वचिन्तामणिस्थतर्कप्रकरणसमीक्षणम्*

न्यायनये तर्को हि अयथार्थानुभवान्तर्गतः इति सर्वेषामेव तर्कशास्त्राधीतीनां विदितचरम्। तथा हि तर्कसङ्ग्रहादिषु नव्यन्यायप्रकरणग्रन्थादिषु अयथार्थानुभवस्य विभागः कृतः – **"अयथार्थानुभवस्त्रिविधः संशय-विपर्यय-तर्कभेदात्"**[1] इति। तत्र आचार्येणान्नम्भट्टेन तर्कलक्षणं लिलक्षयिषुणोदितं – **"व्याप्यारोपेण व्यापकारोपस्तर्कः"**[2] इति। व्याप्यस्य आरोपः व्याप्यारोपः, तेन व्याप्यारोपेण। व्यापकस्य आरोपः व्यापकारोप इति विग्रहः। व्याप्यारोपेणेत्यत्र तृतीयायाः विषयत्वमर्थः। तत्र च प्रकृत्यर्थस्य निष्ठता-सम्बन्धेन, विषयत्वस्य च आरोपपदार्थे भ्रमे निरूपकतासम्बन्धेन अन्वयः। एवमेव व्यापकारोप इत्यत्रापि। व्याप्यारोपेणेत्यत्र तृतीयायाः जन्यत्वमर्थः। तस्य च व्यापकारोपपदार्थे आश्रयतासम्बन्धेनान्वयः, तत्र च प्रकृत्यर्थस्य निरूपितत्व-सम्बन्धेनान्वयः। तथा च व्याप्यनिष्ठविषयतानिरूपकभ्रमनिरूपितजन्यताश्रयव्यापक-निष्ठविषयतानिरूपकभ्रमः तर्कः इति फलितम्।

---

[1] तर्कसंग्रहे, नारायणचन्द्रगोस्वामिसम्पादिते, पृ.सं. 569

[2] तत्रैव

ननु तर्कस्य भ्रमत्वात् विपर्ययत्वाविशेषेऽपि पृथक्कीर्तनं कस्मादिति चेद्, अन्नम्भट्टेन उक्तं – **“यद्यपि तर्को विपर्ययेऽन्तर्भवति, तथापि प्रमाणानुग्राहकत्वाद् भेदेन कीर्तनम्”**[3] इति। प्रपञ्चितं पदकृत्ये अपि – **“यद्यपि तर्कस्य विपर्ययात्मकत्वेन पृथग्विभागोऽनुचितः, तथापि प्रमाणानुग्राहकत्वात्स उदित”** इति बोध्यम्। तर्कस्य प्रमाणानुग्राहकत्वं च प्राचीनार्वाचीनोभयन्यायसम्प्रदायसम्मतमेव। ननु किं नाम नव्यन्याये प्रमाणानुग्राहकत्वमिति चेत्, प्रमाणेनानुमितौ प्रमायां जननीयायां व्याप्तिनिश्चयविघटकव्यभिचारसंशयविघटनेन उपयोगित्वमित्यर्थः। तथा हि, लिङ्गसाध्ययोः साहचर्यदर्शनात्, लिङ्गे साध्यव्यभिचारज्ञानाभावात् व्याप्तिधीः सञ्जायत इति सिद्धान्तः।

न्यायवैशेषिकसम्मतप्रमाणेषु आनन्त्यं भजते अनुमानम्। अनुमितिकरणं चानुमानमिति सुप्रसिद्धम्। तत्र प्राचामर्वाचाञ्च नये करणस्वरूपद्वैविध्याद् अनुमितिकरणं द्विविधम्। तथा च, प्राचां मते फलायोगव्यवच्छिन्नं कारणं करणमिति करणलक्षणात् परामर्शः अनुमानम्। अर्वाचां मते व्यापारवत्कारणं करणमिति लक्षणाद् व्याप्तिज्ञानम् अनुमितिकरणमनुमानम्। एवमर्वाचां मते व्याप्तिज्ञानस्य साक्षादनुमितावुपयोगित्वं स्फुटमेव। तथा च, परामर्शघटकतयानुमितौ प्राचां मतेऽपि व्याप्तिज्ञानस्योपयोगित्वं वर्तते। एवमनुमितिप्रमायां व्याप्तिज्ञानस्य महदुपयोगित्वं वरीवर्ति। ननु तच्च व्याप्तिज्ञानं कथं जायते इति जिज्ञासायामुच्यते यद् हेतुसाध्ययोः सहचारदर्शनात्, हेतौ व्यभिचारज्ञानाभावाच्च व्याप्तिज्ञानं भवतीति न्यायराद्धान्तः। तथा च, धूमवह्न्योः

[3] तर्कसंग्रहे, नारायणचन्द्रगोस्वामिसम्पादिते, पृ.सं. 569

महानसादिषु सहचारदर्शनाद् व्यभिचारज्ञानाभावाच्च तयोर्व्याप्तिज्ञानं जायते। परं पर्वतो वह्निमान् धूमादित्यत्र यदि धूमो धूमोऽस्तु वह्नि मास्त्विति अथवा धूमो वह्निव्यभिचारीति व्यभिचारसंशयो भवति तदा व्यभिचारज्ञानाभावरूपकारणविरहात् व्याप्तिग्रहः कथमपि न जायेत। अस्य च व्यभिचारसंशयस्य निरासार्थं 'यदि धूमो वह्निव्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यात्' इति अथवा 'यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यादि'ति वा तर्कः प्रयुज्यते। अत्र तर्कशरीरे वह्न्यभावो भवति आपादकः, आपाद्यश्च धूमाभावः। तथा च, अस्यामवस्थायाम् आपाद्याभावेन अर्थात् धूमाभावाभावेन धूमेन आपादकाभावस्य अर्थात् वह्न्यभावाभावस्य वह्नेः पर्वते सिद्धिर्भवति।

'यदि धूमो वह्निव्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यात्' इति एतादृशे तर्के वह्निः धूमं प्रति कारणमिति धूमस्य वह्निजन्यत्वनिश्चयः कारणम्। तादृशनिश्चयं प्रति पुनः वह्निसत्त्वे धूमसत्त्वं, वह्न्यभावे धूमाभावः इति अन्वयव्यतिरेकसहचारज्ञानं कारणम्। अन्वयव्यतिरेकसहचारज्ञानाभावात् कार्यकारणभावनिश्चयो न भवति, तादृशकार्यकारण-भावनिश्चयं विना न तर्कोत्पत्तिः, तर्काभावात् न व्यभिचारसंशयनाशसम्भवः, व्यभिचारसंशये विद्यमाने सति न व्याप्तिग्रहोत्पत्तिः इति स्थितिः। तस्मात् तर्कस्य प्रमाणानुग्राहकत्वं सिद्धम् एव।

श्रीमता गङ्गेशोपाध्यायेनापि गदितं चिन्तामणौ – **"व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकं, ज्ञानं निश्चयः शङ्का च, सा च क्वचित् उपाधिसन्देहात्**

**क्वचिद्विशेषादर्शनसहितसाधारणधर्मदर्शनात्। तद्विरहश्च क्वचिद्विपक्षबाधकतर्कात्, क्वचित् स्वतः सिद्ध एव"**[4] इति।

चिन्तामणिग्रन्थस्य पङ्क्तिशः पर्यालोचनेन एतद्दृश्यते यत्, चिन्तामणिग्रन्थे तर्कलक्षणादिविषयकः विचारः कोऽपि नातिसुलभः। वस्तुतः तर्कलक्षणमकृत्वा एव ग्रन्थकारः तर्काङ्गीकारे अनवस्थादोषः कथं प्रसज्यते, कथञ्च तस्या अनवस्थायाः परिहारः शक्यः इति विचारः अवतारितः। ततश्च प्रसङ्गात् कुसुमाञ्जलिकाराणामुदयनाचार्याणां सिद्धान्तस्योल्लेखः, तथा तस्मिन्नेव सन्दर्भे खण्डनखण्डखाद्योक्तस्य मतस्य खण्डनं सुचारु कृतम्। बहूनां पूर्वपक्षाणां मतानि अपि 'अन्ये तु', 'यत्तु', 'अपरे तु' इत्यादिपदैः उल्लिख्य अनूद्य दूषितानि। अधस्तात् यथामति ते विषयाः पर्यालोच्यन्ते ये चिन्तामणौ सुलभाः –

1. तर्केऽनवस्थादोषप्रसङ्गः
2. अनवस्थापरिहारः
3. न्यायकुसुमाञ्जलिकारमते मणिकारस्य स्वारस्यम्
4. खण्डनखण्डखाद्यमतखण्डनम्
5. भूयोदर्शनस्य व्याप्तिग्राहकत्वप्रदर्शनम्
6. तर्कस्य स्वरूपसतः कारणत्वम्

[4] तत्वचिन्तामणौ, व्याप्तिग्रहोपायप्रकरणे, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 210

7. पूर्वपक्षमतनिरासः

## ३.१. तर्केऽनवस्थादोषप्रसङ्गः

एतावता धूमवह्न्योः व्याप्तिज्ञाने व्यभिचारशङ्कामाशङ्क्य तत्र तर्कमुत्थाप्य सा शङ्का निराकृता। तथा च, 'यदि वह्निः न स्यात् तर्हि धूमोऽपि न स्यात्' इति तर्कः व्यभिचारशङ्काविघटनद्वारा धूमवह्न्योः व्याप्तिग्रहोपयोगीति पूर्वं निरूपितम्। तत्र च तर्को नामापत्तिः। यस्यापत्तिः स आपाद्यः, येन चापत्तिः स आपादक इत्युच्यते। 'यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात्' इति तर्कः व्यभिचारसंशयनिरसनेन व्याप्तिग्रहोपयोगीति पूर्वमेव निगदितम्। तर्के दलद्वयमस्ति - आपाद्यदलम् आपादकदलं चेति। तर्कं प्रति च आपाद्यव्यतिरेकनिश्चयः, आपाद्यापादकयोर्व्याप्तिनिश्चयश्च कारणम्। एवं प्रकृते 'यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात्' इति तर्के धूमाभावः आपाद्यः, वह्न्यभावः आपादकः। पक्षे पर्वते आपाद्यरूपधूमाभावस्य व्यतिरेकस्य अभावस्य निश्चयः, अर्थात् धूमाभावाभावस्य नाम धूमस्य निश्चयः, तथा आपाद्यापादकयोः धूमाभाववह्न्यभावयोः व्याप्तिनिश्चयः 'यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात्' इति तर्कं जनयति। अथ 'धूमवान् पर्वतो वह्निमान् न वा' इति संशयस्य निरासाय प्रवृत्तस्य तर्कस्य कारणीभूतो य आपाद्यापादकयोर्व्याप्तिग्रहः, तस्मिन् पुनर्व्यभिचारशङ्का क्रियते चेत् तस्याः शङ्कायाः निरासाय तर्कान्तरमन्वेषणीयम्। तादृशतर्कान्तरं प्रति पुनर्व्यभिचार आशङ्क्यते चेत् तत्परिहाराय पुनस्तर्कान्तरमन्वेषणीयमित्येवं अनवस्था प्रसज्यते इति दोषः।

व्याप्तिग्रहं प्रति कारणीभूतं तर्कं प्रति पुनर्व्याप्तिग्रहस्य कारणत्वात् अयमनवस्थादोषः प्रसज्यते। एतदेव प्रपञ्चितं चिन्तामणिकारेण श्रीमद्गङ्गेशेन – **“तर्कस्य व्याप्तिग्रहमूलकत्वेन अनवस्थेति चेन्न, यावदाशङ्कं तर्कानुसरणात्”**[5] इति। व्याप्तिग्रहः मूलं कारणं यस्य तत् व्याप्तिग्रहमूलकमिति विग्रहात् ‘तर्कस्य व्याप्तिग्रहमूलकत्वेन’ इत्यस्याः गाङ्गेशगिरः तर्कं प्रति व्याप्तिग्रहस्य कारणत्वेन इत्यर्थः। तस्मादेव अनवस्था प्रसज्यते इति मणिकाराशयः।

### ३.२. अनवस्थापरिहारः

उपरि आपाद्यापादकयोः धूमाभाववह्न्यभावयोः व्याप्तिनिश्चयात् वह्निव्यभिचारी धूम इति व्यभिचारशङ्कानाशकस्य ‘यदि वह्निः न स्यात् तर्हि धूमोऽपि न स्यात्’ इति तर्कस्योत्पत्तेस्तत्तर्ककारणीभूते आपाद्यापादकव्याप्तिग्रहे पूर्वोक्तवत् पुनः व्यभिचारशङ्का इति तन्निरासाय पूर्ववत् तर्कान्तराश्रयः, तस्यापि व्याप्तेमूलकत्वेन तत्रापि शङ्का, तन्निरासाय च तर्कान्तरमित्येवमनवस्थेति दर्शितम्।तस्या अनवस्थायाः परिहारः कथं सम्भवतीति सोऽपि तस्यामेव पङ्क्तौ मणिकारेण प्रदर्शितः – **“यावदाशङ्कं तर्कानुसरणाद्”**[6] इति। तस्यायमाशयः, यादृशवह्निधूमव्याप्तिग्राहकतर्कात् पूर्वं तादृशतर्कविघटकस्य शङ्का-सामान्यस्य तर्कभिन्नादेव कारणादनुत्पादः तादृशशङ्कानुत्पादः तादृशतर्कप्रदर्शनेन

---

[5] तत्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 675

[6] तत्रैव

अनवस्था परिहर्तुं शक्यते इति मणिग्रन्थाशयः। तदेव विमृश्य निरूपितं चिन्तामणिकृता – **"यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः"**[7] इति। यत्र आपाद्यापादकव्याप्तिग्रहविघटकशङ्काया व्याघातेनैव अनुत्पादः, शङ्कानुत्पादात् तर्कस्य च सुस्थितिः, तत्र न तर्कान्तरस्यावश्यकता। तथात्वे पुनश्शङ्का, तच्छङ्काविघटनाय पुनस्तर्कान्तरमित्येवंरीत्या अनवस्थेति प्रसङ्ग एव नास्ति तर्कान्तराभावादिति मणिकृतामाशयः।

तथाहि 'पर्वतो वह्निमान् धूमादि'त्यत्र 'धूमोऽस्तु वह्निर्मास्त्वि'ति अथवा धूमो वह्निव्यभिचारीति व्यभिचारशङ्का क्रियते चेत्तस्याः शङ्कायाः परिहारार्थं 'यदि धूमो वह्निव्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यात्' इति अथवा 'यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यादि'ति वा तर्कः प्रयुज्यते। तस्मिंश्च तर्के 'धूमो वह्निजन्यो न वे'त्यादिशङ्कायां कृतायां "धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्तर्हि नोत्पन्नः स्यादि"ति मूलोक्ततर्को भवति उक्तशङ्कानिवर्तकः। अयं च तर्कः धूमवह्न्योः कार्यकारण-भावग्राहकतया "धूमो वह्निजन्यो न वे"त्यादशङ्काया निवारकः। अत्रापादकं वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यत्वम्। आपाद्यं तु अनुत्पन्नत्वम्। पूर्वोक्तवत् अत्रापि आपाद्यापादको व्याप्तिग्रहः एतादृशतर्कं जनयति। यद्यत्रापि यदि "धूमः वहन्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः अस्तु, किन्तु अनुत्पन्नस्तु मास्तु" इति व्यभिचाराशङ्का क्रियते तदात्रापि तत्परिहाराय पुनस्तर्कान्तरं प्रयोक्तव्यम्।

[7] तत्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 675

तत्र पुनः तत्कारणीभूतव्याप्तिग्रहे व्यभिचारशङ्का, तत्परिहाराय पुनस्तर्कान्तरमित्येवं रीत्या अनवस्था वक्तव्या। किन्तु प्रकृते तच्च न सम्भवति, स्वक्रियाव्याघातात्। अतः अत्र तर्कधाराया अनावश्यकत्वान्नानवस्थादोषप्रसक्तिः। तथाहि मणिकारेण न्यगादि - **"यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः"** इति। यत्र स्वक्रियाव्याघातवशाद् आपाद्यापादकयोः व्याप्तिग्रहविघटकशङ्काया उत्पत्तिर्न भवति तत्र तर्कान्तरस्यानावश्यकत्वात् तर्कान्तरे पुनश्शङ्का, तच्छङ्काविघटना पुनस्तर्कान्तरमित्येवं रीत्या तर्कधारानाश्रयणेन नानवस्थागन्धलेशः इति मणेराशयः।

**धूमोत्पत्तिविषयकशङ्कोत्थापनेन शङ्काप्रतिबन्धकस्वक्रियाव्याघातप्रदर्शनम्** - **ज**गतीदमखिलं वस्तु द्विविधमेव भवति जन्यमजन्यञ्च। तत्रापि जन्यं वस्तु द्विविधम्। वह्न्यसमवहितजन्यं वह्निसमवहितजन्यं च। ननु धूमश्चेद् वह्न्यसमवहितजन्यः न भवति तथा वह्निसमवहितजन्यो न च भवति तथापि अनुत्पन्नोपि न भवति तदा तिस्रः शङ्काः स्युः –

1. किमयं धूमः विना हेतुम् उत्पद्यते इत्येका शङ्का

2. क्वचित् कारणत्वेन अभिमतं वह्निं विनापि धूम उत्पद्यते इति द्वितीया शङ्का

3. हेतुं विना वा धूम उत्पद्यते इति तृतीया शङ्का।

एवं चेच्छङ्का क्रियते तर्हि स्वक्रियाविरोधः स्यात्। तथाहि यो वह्निं विना हेतुं विनैव वा धूमः उत्पद्यते इत्यङ्गीकरोति तेन च धूमार्थं वह्नौ प्रवृत्तिमता न भवितव्यम्। किन्तु दृश्यते च स्वस्यैव धूमार्थं वह्नौ प्रवृत्तिः। तस्मात् स्वक्रियाविरोधभिया अवश्यं धूमो

वह्न्यसमवहितजन्यवह्निसमवहितजन्यान्यतरो भवेदेवेत्यभ्युपेयम्। एवं च अत्र तर्ककारणीभूते आपाद्यापादकयोर्व्याप्तिग्रहे या व्यभिचाराशङ्का कृता सा च पुनस्तर्कान्तरं विनैव स्वक्रियाविरोधभियैव भवति दूरीभूतेति न पूर्वोक्तानवस्थादोषः। तथाहि गङ्गेशेन निरुक्तम् – "**धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्तर्हि नोत्पन्नस्स्यादित्यत्र किं धूमो अवह्नेरेव भविष्यति ? क्वचिद्वह्निं विनापि भविष्यति ? अहेतुक एव वोत्पत्स्यत इति शङ्का स्यात् सर्वत्र स्वक्रियाव्याघातः स्यात्। यदि हि गृहीतान्वयव्यतिरेकं हेतुं विना कार्योत्पत्तिं शङ्केत तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परप्रतिपत्त्यर्थं च शब्दस्य चोपादानं नियमतः कथं कुर्यात् तेन विनापि तत् सम्भवात्। तस्मात्तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम्**"[8] इति।

**'तस्मात्तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम्'** इति मणौ मणिकारेण उपादानमेवेत्येवकारेण तर्कान्तरस्य व्यवच्छेदः कृतः। उपादानादेव स्वक्रियाविरोधादेव शङ्कायां प्रतिबद्धायां सत्यां तत्परिहाराय तर्कान्तरस्य अपेक्षा नास्तीति तदर्थः। एवमनया रीत्या चिन्तामणौ तर्काङ्गीकारे प्रसक्तस्य अनवस्थादोषस्य परिहारो दृश्यते।

वस्तुतः तर्के प्रयुक्ते तत्कारणीभूते कृतायां व्याप्तिग्रहे तादृशमेवाशङ्कनीय यादृशशङ्कायां सति स्वक्रियाव्याघातो न भवति। यदि स्वक्रियाव्याघातो भवति तदा स्वक्रियाव्याघातेनैव प्रतिबद्धत्वात् शङ्कैव नोदेतीति। स्वयं धूमादिकार्यार्थं वह्नौ प्रवृत्तिं कृत्वा पुनः धूमं प्रति वह्निः न कारणमिति कथं कथयेदिति कोऽपि जनः। तस्माद्धि

---

[8] तत्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 576

तावच्छङ्का कार्या यावन्न स्वक्रियाविरोधोपस्थितिरिति स्थितिः। तथाहि गङ्गेशैरुक्तम् – "**तदिदमुक्तं तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति न हि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपादते, तत्कारणं तन्नेत्याशङ्क्यते चेतीति**।"[9] इति।

## ३.३. न्यायकुसुमाञ्जलिकारमते मणिकारस्य स्वारस्यम्

तर्काभ्युपगमे प्रसक्तम् अनवस्थादोषं निरस्य स्वोक्तविषये उदयनाचार्याणां न्यायकुसुमाञ्जलिकाराणां साम्मत्यमुद्धृतं गङ्गेशोपाध्यायेन – **"तदिदमुक्तं, तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति, न हि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपादत्ते, तत्कारणं तन्नेत्याशङ्क्यते चेति"** इति वचसा। इदं च चिन्तामणौ कस्यचन प्राचीनस्याचार्यस्य मतानुवादः। एतस्य चायमर्थः, तर्ककारणीभूते आपाद्यापादकयोर्व्याप्तिग्रहे तादृशी एवाशङ्का विधेया यादृशशङ्कायां कृतायां प्रवृत्तिव्याघातः स्वक्रियाव्याघातो वा न स्यात्। यदि स्वक्रियाव्याघातः स्यात्तर्हि स्वक्रियाव्याघातेनैव शङ्कायाः प्रतिबद्धत्वात् शङ्कैव नोदीयात्। वस्तुतः स्वयं धूमरूपकार्यार्थं कारणे वह्नौ प्रवृत्तः 'धूमं प्रति वह्निः न कारणमि'ति कथं कथयेत्?

अनवस्थादोषस्य तत्परिहारोपायस्य च प्रसङ्गः यथा मणौ पर्यालोचितः तथैवासौ उदयनाचार्याणां न्यायकुसुमाञ्जलौ अपि प्रपञ्चितः। तत्राप्येवमुक्तम् – **"तदेव ह्याशङ्क्यते**

---
[9] तत्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 595

**यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातादयो न भवन्तीति लोकमर्यादा। न हि हेतुफलभावो न भविष्यतीति शङ्कितुमपि शक्यते। तथा सति शङ्कैव न स्यात्, सर्वं मिथ्या भविष्यतीतिवत्"**[10] इति।

पूर्वं चिन्तामणिपर्यालोचनकाले किं धूमो अवह्नेरेव भविष्यति? किम् अहेतुक एवोत्पत्स्यते? इति शङ्काद्वयं प्रदर्शितम्। 'न हि हेतुफलभावो न भविष्यति' इत्यस्यानुवादः भवति तत्र अहेतुक एव वोत्पत्स्यते इत्यंशः। तदर्थश्चेत्थं विवृतः वीरराघवाचार्येण – **"न हि हेतुहेतुमद्भाव एव मा भूदिति शक्यशङ्क्यम् - तथा हि सति शङ्कैव न स्यात्। व्यभिचारशङ्का हि इच्छाद्वारा व्याप्तिज्ञानप्रतिबन्धाय। हेतुफलभावाभावे च सा व्यर्था। यदि जन्यजनकभाव एव न स्यात् शङ्कया किं जनिष्यते"**[11] इति।

यथा सर्वं मिथ्या भविष्यतीति वाक्यं सर्वान्तर्गतस्य स्वस्य मिथ्यात्वे सत्यत्वे च सर्वमिथ्यात्वबोधाक्षमम्। आद्यपक्षे स्वयमसत्त्वेनासमर्थत्वात्। द्वितीये तु किञ्चित्सत्यत्वेन सर्वमिथ्यात्वायोगात्। एवं यदि जन्यजनकभाव एव न स्यात् तर्हि शङ्कया किं जनिष्यते इति सा अभ्युपेया भवेत्। अतः अभ्युपगतायामपि शङ्कायां सा व्याप्तिग्रहं न प्रतिबध्नातीति सा व्यर्थैवेत्याशयः। एवं च उपरितनात् विवरणात् एतत् स्पष्टं यत् तत्त्वचिन्तामणौ उदयानाचार्याणां सिद्धान्तस्यानुवादः, तस्मिन् मणिकारस्य स्वारस्यं च वर्तत इति।

---

[10] न्यायकुसुमाञ्जलौ, तृतीयस्तबके, पृ 180

[11] न्यायकुसुमाञ्जलिविस्तरे, तृतीयस्तबके, पृ 181

## ३.४. खण्डनखण्डखाद्यमतखण्डनम्

पितुराज्ञया उदयनमतचिखण्डयिषया च महाकविः श्रीहर्षः स्वीयवैदुष्यविलासेन नैकान् न्यायसिद्धान्तान् निराकरोत्। तथैव तर्के अनवस्थादोषमाशङ्क्य तत्परिहारोपायश्च य उदयनायार्येण न्यायकुसुमाञ्जलिकारेण प्रदर्शितः, तमेवानूद्य दूषितवान् श्रीहर्षः स्वीये खण्डनखण्डखाद्याख्ये ग्रन्थे। प्रकृते मणिग्रन्थे उदयनाचार्यसिद्धान्ते स्वारस्यं प्रदर्शयता मणिकृता प्रसङ्गसङ्गत्या खण्डनखण्डखाद्याख्यकारमतम् अनूद्य दूषितं न्यायमतस्य पुनःप्रतिष्ठार्थम्।

एतस्य वादस्य बोधायोदयनाचार्याणां मतमादावेवाभ्युपेयम्। 'अनुमानमप्रमाणं व्यभिचारशङ्काग्रस्तत्वात्' इति अनुमानाप्रामाण्यवादिनां पूर्वपक्षिणामाशयो ह्ययुक्तः। व्यभिचारशङ्कया अनुमानमात्रस्यैवोच्छेदः सम्भव इति पूर्वपक्षाशयः। स च नोपपन्नः। व्यभिचारशङ्का हि विपक्षसत्त्वादर्शनादेव सम्भवति। अन्यथा निश्चितसाध्याभावाधिकरणे विपक्षे हेतोः दर्शनेन व्यभिचारनिश्चयः एव स्यात्, न शङ्का। तथा च कालान्तरदेशान्तराधिकरणानुमानं विना तत्र व्यभिचरेदिति शङ्कायोगाद् अनुमानं सिद्धम्।

एवं व्यभिचाराव्यभिचाररूपकोटिद्वयविषयकत्वाच्छङ्कायाः, अव्यभिचारस्य क्वचित् सिद्धत्वात् कदाचिदनुमानं न निषेध्यम्। एवं शङ्कावादिना अयं हेतुः असाधकः शङ्कितव्यभिचारत्वात् इत्यनुमानेन अहेतुत्वस्य स्थाप्यतयाप्यनुमानसिद्धिः। एवं च व्यभिचारशङ्कासत्त्वपक्षे सिद्धम् अनुमानं प्रमाणम्। शङ्काभावपक्षे च निसर्गत एवानुमानं सिद्ध्यति। अनुमानस्य प्रामाण्यसिद्धौ शङ्कानिवृत्तिः कथमिति चेत् अनुकूलस्तर्कस्तत्र

व्यभिचारशङ्कानिवर्तकः। उत्तरोत्तरतर्के व्यभिचारशङ्का च स्वक्रियाव्याघातेन निवर्त्यते। स्वकृताशङ्कायाः स्वक्रियया जायमानस्य व्याघातस्य ग्रहणमेव तदवसानभूमिः। एतत्सर्वं विविच्य संगृह्योक्तं उदयनाचार्येण –

**"शङ्का चेदनुमास्त्येव न चेच्छङ्का ततस्तराम्।**

**व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः।।"**[12] इति।

यदि शङ्का अस्ति पूर्वोक्तरीत्या अनुमानमस्त्येव। यदि शङ्का नास्ति तर्हि शङ्काभावः निसर्गत एवानुमानसाधकः। ननु शङ्कानिवृत्तिः कुत इति चेत् अनुकूलतर्कः एव शङ्काया अवधिः निवर्तकः। एवम् उत्तरोत्तरतर्के च शङ्का व्याघातावधिः, व्याघातः स्वक्रियाविरोधः प्रवृत्तिविरोधः कार्यकारणभावादिव्याघातो वा, स एव अवधिः निवर्तकः यस्याः शङ्काया इत्यर्थः। एवं च स्वक्रियाव्याघात एव अवसानभूमिः, तत्सत्त्वात् नानवस्थावसर इति न्यायसिद्धान्तः।

श्रीहर्षः महाकविः एतस्यैव न्यायमतस्य दूषणमुवाच। तथा हि श्रीहर्षमते, यदि स्वक्रियाव्याघातः एव शङ्काप्रतिबन्धकः तदा प्रतिबन्धकस्य शङ्काधिकरणावर्तमानरूपस्य शङ्कानुत्पादे अवस्थितिरेव न स्यात्। प्रतिबन्धकस्य प्रतिबध्यप्रतियोगिकतया प्रतिबन्धकसत्त्वे प्रतिबध्यभूतायाः तत्प्रतियोगिन्याः शङ्कायाः आवश्यकत्वात्। शङ्कासत्त्वे

[12] न्यायकुसुमाञ्जलौ, तृतीयस्तबके, पृ 174

कुतो व्याघातस्य शङ्काप्रतिबन्धकत्वम्। तस्मात् 'शङ्का चेदनुमास्ती'ति यथा कारिका प्रणीता उदयनाचार्येणन तथा तयैव रीत्या अक्षराणि किञ्चिदन्यथाकृत्य उक्तं श्रीहर्षेण –

**व्याघातो यदि शङ्कास्ति, न चेच्छङ्का ततस्तराम्।**

**व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः।।**[13] इति।

अस्यायमाशयः, यदि व्याघातोऽस्ति तर्हि शङ्कापि स्यादेव, व्याघातस्य शङ्काप्रतियोगिकत्वात्। अथ यदि व्याघातो नास्ति, तर्हि निसर्गतः शङ्कास्त्येव। तस्मात् उत्तरोत्तरतर्के आशङ्का व्याघातनिवर्त्या, तर्कः शङ्कानिवर्तकः इति कथं सिद्ध्यति? अयमाशयः शङ्काधिकरणावृत्तित्वविशिष्टस्य प्रतिबन्धकस्य व्याघातस्य वर्तमानत्वे शङ्काया अपि सत्त्वमावश्यकं, प्रतियोगिनिरूपकस्य वस्तुनः प्रतियोगिनं विना अवस्थितेः वक्तुमशक्यत्वात्, तथा च शङ्कायाः सर्वथैव सत्त्वसम्भवात् प्रतिबन्धकीभूतया शङ्कयैव तर्कानुत्पादेन कुतस्तर्कस्य शङ्कानिवर्तकत्वमिति जिज्ञासा।

एवं श्रीहर्षकृतस्य न्यायमतखण्डनस्य खण्डनं तत्वचिन्तामणिकृता कृतम् – **"अत एव व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम्। व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः।। इत्यपास्तम्। न हि व्याघातः शङ्काश्रितः, किन्तु स्वक्रियैव शङ्काप्रतिबन्धिकेति, न वा विशेषदर्शनात् क्वचिच्छङ्कानिवृत्तिरेवं स्यात्"**[14] इति। अस्यायमाशयः, शङ्काधिकरणावृत्तित्वाविशेषित एव व्याघातः शङ्काप्रतिबन्धकः, न तु शङ्काधि-

[13] खण्डनखण्डखाद्यम्, प्रथमः परिच्छेदः, कारिका 45

[14] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 721

करणावृत्तित्वविशिष्टः व्याघातः, येन पूर्वोक्तदोषः प्रसज्येत। तथा च शङ्काया प्रतियोगिकोट्यप्रविष्टतया तादृशज्ञानेनैव शङ्कानुत्पादसम्भवात्, सत्यां च विरोधिभूतशङ्कायां निवृत्तौ तर्कावतारो भविष्यत्येवेति श्रीहर्षमतमयुक्तम्।

शङ्काप्रतियोगिकविरोधस्यैव शङ्काप्रतिबन्धकत्वमित्यभ्युपेत्याप्याह न वा विशेषदर्शनादित्यादिना। शङ्काधिकरणावृत्तित्वविशिष्टस्य यदि शङ्काप्रतिबन्धकत्वं तदा बाधनिश्चयादेः शङ्काप्रतिबन्धकत्वं न स्यात्। प्रतियोगिभूतां शङ्कां विना स्थातुमशक्यत्वात्। अतो घटाभावस्य प्रतियोगिनं घट विनापि अवस्थितेः अनुभवसिद्धत्वात् यत्र कुत्रचित् प्रतियोगिनः सत्त्वमात्रमपेक्षितं न तु प्रतिबन्धकेन सहावस्थानमित्यवश्यं सर्वैरभ्युपेयम्। नोचेत् बाधस्य शङ्काप्रतिबन्धकत्वासिद्ध्यापत्तेः। तर्हि प्रकृतेऽपि तुल्यम्।

### ३.५. भूयोदर्शनस्य व्याप्तिग्राहकत्वप्रदर्शनम्

ननु तत्त्वचिन्तामणिमते तर्को हि व्याप्तिप्रतिबन्धकीभूतव्यभिचारशङ्कानिराकरणेन व्याप्तिं ग्राहयति। तथा च तर्केणैव व्याप्तिग्रहे सिद्धे भूयोदर्शनस्य व्याप्तिग्राहकतया स्वीकरणेनालमिति शङ्का सञ्जायते। न चेयमिष्टापत्तिरिति वाच्यम्, तथा सति भूयोदर्शनात् व्याप्तिग्रहो भवतीति प्राचीनसिद्धान्तव्याघातापत्तिर्दुर्वारा भावतीति शङ्का।

प्राचीनसिद्धान्तव्याघातदूरीकरणार्थं चिन्तामणिकारेण इदं समाधानमुक्तं यद् भूयोदर्शनेन तर्कावतारस्ततो व्याप्तिग्रहः इति भूयोदर्शनस्य व्याप्तिग्रहहेतुत्वं

नापलपनीयम्। वह्निधूमयोः भूयः सहचारनिश्चयं विना धूमे वह्न्यसमवहित-सामग्र्यजन्यत्वनिश्चयासंभवात्, अयमेव धूमो वह्निपूर्वकः एतदन्यधूमस्तु न, एवमेतद्द्वयमेव वह्निपूर्वकं न त्वन्य इत्यादिशङ्कासंभवात्, तत्परिहाराय भूयोदर्शनादरः नूनं कार्यः। अत्रेदमप्यवधेयं यत् भूयोदर्शनस्य तस्य साक्षाद्व्याप्तिग्रहे प्रयोजकत्वं तु नास्ति, अपि तु तर्कप्रयोजकत्वेनैव कदाचित्तस्य व्याप्तिग्रहप्रयोजकत्वम्। यदि भूयोदर्शनस्यापि साक्षाद्व्याप्तिग्रहप्रयोजकत्वे तज्जन्यसंस्कारस्य प्रमाणान्तरत्वापत्तिः। तथा चोक्तम् **"तदेव प्रमाणान्तरं यदसाधारण सहकारि समासाद्य मनोबहिर्गोचरां प्रमा जनयति यथेन्द्रियादि, संशयस्वप्नौ न प्रमे इति न निद्रादेः प्रमाणान्तरत्वम्।"**[15] यदसाधारणं सहकार्यासाद्य मनः यद्बाह्यार्थविशेष्यकयत्प्रकारिकां प्रत्यक्षप्रमितिं जनयति तत्सर्वं तदर्थविशेष्यकतत्प्रकारक-मानसान्यप्रमायाः करणं भवतीति तदर्थः। एवं च प्रकृते यदि भूयोदर्शनस्य संस्कारद्वारा व्याप्तिग्राहकत्वं तदा तत्संस्कारस्य प्रमाणान्तरात्वापत्तिः। किन्तु भूयोदर्शनस्य तर्कद्वारा व्याप्तिग्राहकत्वं चेत् तदा तर्कस्य अप्रमात्वात् भूयोदर्शनजन्यसंस्कारस्य प्रमाकरणत्वं न संभवतीति न तर्कस्य प्रमात्वशङ्कालेशः। तथाहि मणिकृदुक्तिः – **"न चैतादृशतर्कावतारो भूयोदर्शनं विनेति भूयोदर्शनादरः। न तु स स्वत एव प्रयोजकः। अत एव न तदाहित-संस्कारो मानान्तरम्, तर्कस्याप्रमात्वात्। तच्च प्रत्यक्षव्याप्तिज्ञाने हेतुः। तदभावेऽपि शब्दानुमानाभ्यां तद्ग्रहात्।"**[16] इति।

[15] तत्वचिन्तामणौ, परामर्शपूर्वपक्षः पृ 463

[16] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 722

## ३.६. तर्कस्य स्वरूपसतः कारणत्वम्

ननु व्याप्तिप्रतिबन्धकीभूतव्यभिचारशङ्कानिवृत्त्या तर्कस्य यद्व्याप्तिग्राहकत्वं स्थापितं तत् किं ज्ञायमानस्य तर्कस्य व्याप्तिग्राहकत्वम् अथवा स्वरूपसत एव तर्कस्य व्याप्तिग्राहकत्वम् इति शङ्का जायते।

यदि आद्यपक्षो नाम ज्ञायमानस्य तर्कस्य व्याप्तिग्राहकत्वमिति स्वीक्रियते तदा यत्र व्यभिचारिणि हेतौ व्यभिचारसंशयो वर्तते तत्रापि भ्रान्तपुरुषस्य व्यभिचार-संशयविरहज्ञानस्य तर्कज्ञानस्य च संभवात् कारणसद्भावात् व्याप्तिग्रहापत्तिः दुर्वारा भवति। अतः व्यभिचारिणि हेतौ व्याप्तिग्रहापत्तिनिराकरणाय अज्ञायमानस्य अर्थात् स्वरूपसतः तर्कस्य व्याप्तिग्रहप्रयोजकत्वं स्वीकार्यम्। तेन व्यभिचारिणि हेतौ भ्रान्तस्य पुरुषस्य तर्कज्ञानसम्भवेऽपि वस्तुतः तर्कस्य तत्रासत्त्वात् न क्षतिः।

यदि द्वितीयपक्षो नाम अज्ञायमानस्यैव तर्कस्य व्याप्तिग्राहकत्वमिति स्वीक्रियते तदापि दोषप्रसक्तिर्भवति। तथाहि पर्वतो वह्निमान् बाष्पात्, धूलीपटलात् इत्याद्यसद्धेतुषु धूमत्वं विपर्यस्यतो पुरुषस्य अथवा वह्निमान् जलादित्याद्यसद्धेतुस्थले भ्रान्त्या यदि वह्निः न स्यात् तर्हि जलमपि न स्यादिति तर्कयितुः पुरुषस्य वा स्वरूपसत एव तर्कस्य उपस्थितिः। तेन व्याप्तिग्रहोत्पत्तौ कारणस्य अबाधितत्वात् कार्यस्य व्याप्तिग्रहस्यापि अबाधितत्वापत्तिः। तथा सति कथं व्याप्तेः प्रमात्वाप्रमात्वविभागो भवति इति चेत् सत्तर्कात् व्याप्तिप्रमा, असत्तर्कात् व्याप्तिभ्रमः इति निर्णीयते। तस्मात् स्वरूपसतस्तर्कस्य प्रयोजकत्वाङ्गीकारेऽपि न क्षतिः। तथाहि मणिकारेण उक्तम् – **“ननु सहचारदर्शन-**

**व्यभिचारदर्शनवत् व्यभिचारशङ्काविरहानुकूलतर्कयोर्ज्ञानं व्यभिचारिसाधारणमिति न ततोऽपि व्याप्तिनिश्चय इति चेन्न। स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात्। सत्तर्कात् व्याप्तिप्रमा, तदाभासात् तदप्रमा, विशेषदर्शनसत्यत्वासत्यत्वाभ्यां पुरुषज्ञानमिव।"**[17] इति।

ननु तर्के सत्त्वं नाम कीदृशमिति पृच्छायामुच्यते यत् मणौ तर्के सत्त्वं कीदृशमिति निरुक्तम्। परं तत्तद्व्याख्या भिन्नभिन्नविधया तर्फे सत्त्वस्य निर्वचनं दृश्यते। यथा एकत्र **"यद्यपि तर्कस्य सत्त्वं मूलशैथिल्यादि दोषरहितत्वम् ... तथापि सत्तर्कात् सत्यव्याप्ति-ज्ञानात् तदाभासात् तदभावात्"** इति। अन्यत्र तु **"तथा च यथा तस्य बोध्यतदभाव-तद्विषयत्वे सत्यासत्यत्वे तथा तर्कस्यापीति"** इति। अत्र युक्तायुक्तविचारः तत्तद्व्याख्यारीत्या तर्कप्रकरणविवेचनसमये निरूपयिष्यते ।

## ३.७. पूर्वपक्षमतनिरासः

मणिकारेण स्वसिद्धान्तानुसारं तर्कं व्याख्याय तर्कविषये अन्येषां नैयायिकानां मतविमर्शः कृतः। तत्र मणिकारैः तर्कस्याङ्गीकारे प्रसक्तानवस्थादोषः अन्यैः कथं परिहृतः इत्यनूद्य तत्रत्याः अनुपपत्तयः उद्भाविताः।

---

17 तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 724

**<u>अपरे त्वित्येतेषां मतविमर्शः</u>** - चिन्तामणिग्रथितमतान्तरेषु एकस्य मतस्य तु केवलमनुवादमात्रं दृश्यते न तु दूषणम्। तच्च अपरे त्वित्यादिना मणिकृता प्रदर्शितम्। तन्मतमिदानीं निरूप्यते - तर्कस्य साक्षाद्व्याप्तिग्राहकत्वमेव। यद्यपि तर्कमूलभूतापि व्याप्तिः (आपाद्यापादकयोः) तर्कादेव भवति तदा अनवस्था स्यात् तथापि तदित्थं परिह्रियते। यत्र तर्के व्याप्त्यनुभवो मूलं तत्र तर्कान्तरापेक्षा यत्र तु व्याप्तिस्मरणं मूलं तत्र न तर्कान्तरापेक्षेति नानवस्था।

अत्र विषये मणिकृता उदाहणोपस्थापनेन विषयो विशदीकृतः। तथाहि यतः जातमात्रस्य स्तन्यपानादौ सुखसाधनतानुमितिः भवति ततः स्तन्यपानं मदिष्टसाधनम् सफलप्रवृत्तिजनकत्वात् इत्याद्यनुमानं प्रति हेतुः व्यात्यनुभवो न भवितुमर्हति। तदानीं व्याप्त्यनुभवाभावात्। तस्मात् तत्र व्याप्तिस्मरणमित्येवाभ्युपेयम्। तथा च तादृश-व्याप्तिस्मरणं प्रति तर्कस्यापेक्षा नास्तीति तादृशस्थले तर्कं विनापि व्याप्तिस्मरणमादाय अनुमितिरुपपद्यते। तस्मात् यत्र अनुमितिं प्रति व्याप्तिस्मरणं हेतुः तत्र तर्कान्तरापेक्षा नास्तीति नानवस्थेति सिद्धान्तः।

ननु पुनरत्रेयं शङ्का क्रियते यज्जातमात्रस्य व्याप्तिस्मरणं प्रति जन्मान्तरीय-व्याप्त्यनुभवः संस्कारद्वारा हेतुः, अनुभवं विना स्मरणानुपपत्तेः। एवं च तादृशव्याप्त्यनुभवं प्रत्यपि तर्को हेतुः, तादृशतर्कमूलीभूतव्याप्त्यनुभवेपि तर्कान्तरं हेतुरित्यनवस्था दुर्वारैव। तथापि तत्तज्जन्मनि स्तन्यपानादौ सुखसाधनतानुमितिजनकव्याप्तिस्मरणे तर्कस्याहेतुत्वात् कदाचितर्कविच्छेदेन नानवस्थेत्यभिप्रायः। तथाहि मणिकृतागादि – **“अपरे तु यत्र तर्के**

**व्याप्त्यनुभवो मूलं तत्र तर्कान्तरापेक्षा, यत्र तु व्याप्तिस्मरणं न तर्कान्तरापेक्षेति नानवस्था। अस्ति च जातमात्राणामिष्टानिष्टसाधनतानुमितिहेतुव्याप्तिस्मरणं तदानीं व्याप्त्यनुभावका-भावात्, तन्मूलानुभवमूला चाग्रेऽपि व्याप्तिस्मरणपरम्परेति।"**[18] इति।

अस्मिन् मते अनुपपत्तेः स्पष्टं दृश्यमानत्वात् मणिकृता दूषणं न कृतम्। मतस्यास्य दूषणं तु व्याख्यासूपलभ्यते। तदुक्तं **"अत्रेदमस्वरसबीजं नहि कदाचिदन्तरा विच्छेद एवानवस्थापरिहारः किन्तु आत्यन्तिकविच्छेद एवेति सकलसम्प्रदायसिद्धमिति।"** इति।

**<u>यत्तुकाराणां मतविमर्शः</u> -** इतः परं मणिकृता तत्त्वचिन्तामणौ यत्वित्यादिना अन्येषां नैयायिकानां मतमुपस्थिपतम्। तेषां नये अनादितः निश्चिताः कार्यकारणभावविरोधाः वह्न्यादौ तन्मूलाः तर्काः। अनादिसिद्धधूमकारणत्वनिश्चयो धूमकारणत्वाभावकोटिक-शङ्काप्रतिबन्धकतया 'धूमो यदि वह्निव्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यात्' इत्यादि-तर्कोत्थापकतया वह्निधूमव्याप्तिग्रहे प्रयोजकः। तथा च तादृशतर्के तर्कान्तरस्याप्रयोजक-तया नानवस्थेति भावः।

परमुक्तं मतमयुक्तम्। तथाहि कार्यकारणभावादौ अनादिसिद्धत्वज्ञानमवश्यं प्रमाणजन्यं वाच्यम्। प्रमाणप्रश्ने यदि तद् अनुमानप्रमाणजन्यं तदा तत्रापि व्यभिचार-शङ्कानिवृत्त्यर्थं तर्कान्तरस्यावश्यकतेति नानवस्थापरिहारः सम्भवति।

[18] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 731

न च न वयं ब्रूमः अत्रानुमानं प्रमाणमिति येन अनवस्था अपरिहार्या। किन्तु व्याप्तिग्रहान्यथानुपपत्तिरेव तर्कस्यानादिसिद्धकार्यकारणभावदिकत्वं प्रयोजयतीति अर्थापत्तिरत्र प्रमाणमिति वाच्यम्। न्यायसिद्धान्ते अर्थापतेरप्यनुमानत्वात् तत्रापि व्यभिचारशङ्कानिवृत्त्यर्थं यदि तर्कान्तरस्यापेक्षा स्यात्तदा स्यादेव अनवस्थेति। तथा चोक्तम् -

**अर्थापतिस्तु नैवेह प्रमाणमिष्यते।**

**व्यतिरेकव्यासिबुद्ध्या चरितार्था हि सा यतः।।**[19]

न्यायशास्त्रे अर्थापतिस्तु प्रमाणान्तरमिति नैवेष्यते। यतः सा अर्थापतिः इह व्यतिरेकबुद्ध्या चरितार्था। अर्थात् अर्थापत्तेः यत् कार्यं तत् अवश्याङ्गीकार्यव्यतिरेक-व्यास्त्यैव निर्वाह्यमिति अर्थापत्तिः अनुमाने एवान्तर्भवतीत्यर्थः। अधिकः विचारः अप्रकृतत्वात् नात्र क्रियते। तथाहि मणिकारवचनम् – **"अन्ये विपक्षबाधकतर्काद-नौपाधिकत्वग्रह एव तदधीनो व्याप्तिग्रह इति। तदपि न, तर्कस्याप्रमाणत्वात्। व्यभिचारादिशङ्कानिरासद्वारा प्रत्यक्षादिसहकारी स इति चेत्, न। अनवस्थाभयेन तर्कं विना व्याघातात्। यत्र शङ्काविरहस्तत्र व्याप्तिग्रहे तर्कस्य व्यभिचारात्।"**[20] इति।

अन्ये त्वित्येतेषां मतं श्रीहर्षेणाप्यनूद्य खण्डितम्। तस्मादिदं मतं श्रीहर्षादपि प्राचीनस्य कस्यचन नैयायिकस्येति वक्तुं शक्यते। यद्यपि एतन्मतानुवादे श्रीहर्षमणिकृतोः

[19] कारिकावली, कारिका 144

[20] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 733

नास्ति किञ्चिदपि वैलक्षण्यं तथापि खण्डने भेदो दृश्यते। मणिकृता तु उपर्युक्तरीत्या खण्डनं कृतम्। श्रीहर्षेण तु अद्वैतवासनया अन्यादृश्या रीत्या एतन्मतं दूषितम्।

तथा हि अनादिसिद्धकार्यकारणभावादिबुद्धेः प्रमितित्वं न सिद्ध्यति। न च तद्बुद्धेः अनादित्वादेव प्रमितित्वमिति वाच्यम्। तथा सति अनादिसिद्धः यः शरीरे अहमिति आत्मप्रत्ययः तस्यापि अनादित्वात् प्रमितित्वापत्तेः। किन्तु तस्य च प्रत्ययस्य अप्रमात्वमेव सिद्धान्तरीत्या। तस्मात् अनादित्वहेतोः तदुद्धेः न प्रमात्वमिति नायं परिहारः इति।

<u>**अन्ये त्वित्येतेषां मतविमर्शः**</u> - अस्मिन्नेव विषये मणिकारैः अन्ये त्वित्यादिना अन्येषां नैयायिकानां मतमनूद्य पर्यालोचितम्। तथा हि तर्काद् अनौपाधिकत्वग्रहो भवति। अनन्तरं तर्क-अनौपाधिकत्वग्रहाभ्यां मिलित्वा व्याप्तिग्रहः। अर्थात् हेतुः सोपाधिको वा न वेति उपाधिसंशये सति "यद्ययं हेतुः उपाधिमान् स्यात् तर्हि हेतुसत्त्वेपि साध्यं न स्यात् यथा धूमवान् वह्नेः इत्यत्र सोपाधिकस्य हेतोः अयोगोलके सत्त्वेऽपि धूमादर्शनवत्। यदि हेतुसत्त्वेपि साध्यं न स्यातर्हि हेतुः धूमः वह्निजन्यो न स्यात्" इत्यादितर्कः हेतौ अनौपाधिकत्वग्रहं सम्पादयति। हेतोरनापाधिकत्वे च व्याप्तिग्रहः सुलभ इत्येवं रीत्या तर्कस्य व्याप्तिग्रहजनकत्वमिति ।

परमेतन्मतमयुक्तम्। यदि तर्कः प्रमाणान्तरासहकारी सन् स्वतन्त्रतया व्याप्तिग्रहं प्रति हेतुश्चेत् तर्हि स्वसिद्धान्तव्याघातः। तर्कस्य अनौपाधिकत्वज्ञान सहकृतस्यैव व्याप्तिग्रहजनकताया एव सम्मतत्वात्। तर्को यदि व्याप्तिग्रहे अनौपाधिकत्वग्रहे च व्यभिचारोपाधिकत्वशङ्काविघटनद्वारा प्रत्यक्षादिसहकारी सन् जनक इति भवता

स्वीक्रियते तदा यादृशस्थले तर्कस्य असत्त्वेऽपि तदतिरिक्तकारणात् व्याघातात् शङ्कानुत्पादः तत्र व्याप्तिग्रहोत्पादस्य आवश्यकत्वेन तर्करूपकारणाभावेन कार्यभूत-व्याप्तिग्रहस्य जननात् तर्कस्य व्यभिचारितया व्याप्तिग्रहादौ प्रमाणसहकारित्वेनापि तस्य जनकत्वं न सम्भवति। तस्मात् मण्युक्तदिशा व्यभिचारादर्शनसहकृतसहचारदर्शनं व्याप्तिग्राहकं, तर्कः शङ्कानुत्पत्तौ प्रयोजक इत्येव अङ्गीकार्यम्।

<u>**मीमांसकैकदेशिनां मतविमर्शः**</u> - नैयायिकैकदेशिनां मतानि 'अपरे तु' इत्यनेन, 'यत्तु' इत्यनेन, 'अन्ये तु' इत्यनेन च उपस्थाप्य विचारितं मणिकृता। ततश्च मणिकारेण मीमांसकैकदेशिनां मतं विचारितम्। तथाहि तेषां नये तर्कः व्याप्तिग्रहं प्रति परम्परयापि न प्रयोजक इति। मीमांसकैकदेशिनामयमाशयः - साध्यसाधनयोः सामानाधिकरण्य-प्रत्यक्षमात्रेण व्याप्तिग्रहो जायते। तत्र व्यभिचारसंशस्य अप्रतिबन्धकतया तर्कस्य अनुसरणं निष्फलमेवेति।

परमेतन्मतं मणिकारेण सयुक्ति खण्डितम्। तथाहि एतन्मते हि सर्वत्र पक्षेतरत्वमुपाधिः स्यात्। पर्वतो वह्निमान् धूमात् इत्यत्र पक्षे साध्यस्य सन्दिग्धतया दृष्टान्तेषु च साध्यस्य निश्चिततया तदन्तर्भावेण च पक्षेतरत्वस्य पक्षान्तर्भावेण साध्यव्यापकत्वस्य सम्भवात्, साधनाव्यापकत्वस्य सम्भवात् तस्य उपाधित्वं दुर्वारम्। तथा सति वह्निमान् च धूमादित्यादिः सद्धेतुरपि सोपाधिकत्वात् दुष्येत्। न केवलं धूमादिसद्धेतूनां दुष्टताप्रसङ्गः सर्वत्र पक्षेतरत्वस्य पक्षं विहाय अन्यत्र साध्यवत्सु अवश्यं सद्भावात् उक्तरीत्या अपि तु तस्य सर्वत्रोपाधित्वापत्तौ अनुमानमात्रमुच्छिद्येत उपाधेः

व्यभिचारोन्नायकतया वा सत्प्रतिपक्षोन्नायकतया वा दूषकत्वात्। तर्कस्य व्याप्तिग्राहकत्व-वादिनां नैयायिकानां मते तु पक्षे साध्यस्य सन्दिग्धत्वात् यदि पक्षेपि साध्यं स्यात् तदा तत्र पक्षेतरत्वस्य अभावात् उपाधित्वं न घटेत। तस्मात् पक्षे साध्यस्य संशयपर्यन्तं पक्षेतरत्वस्य सन्दिग्धोपाधित्वमेव। तत्परिहारस्तु यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यादित्यनुकूलतर्केण पक्षे धूमसत्त्वेन वह्निसत्त्वानुमानात् यत्र साध्यं पक्षे तत्र उपाधेः अभावात् साध्यव्यापकत्वभङ्गात् पक्षेतरत्वस्य उपाधित्वं वारयितुं शक्यते। तथा च यदा अनुकूलतर्को नास्ति तदैव अस्य दूषकत्वम्। सम्मतश्चाय पन्थाः समेषां नैयायिकानाम्। तथा चोक्तं दिनकरभट्टेन **"अत एव अनुकूलतर्कविरहदशायां पक्षेतरत्वं सन्दिग्धोपाधिरिति ग्रन्थकृतामुक्तिः सङ्गच्छते"** इति। एतत्सर्वं विचार्य मणिकृतागादि – **"यत्तु योग्याना-मुपाधीनां योग्यानुपलब्ध्या अभावग्रहः, अयोग्यानान्तु साध्याव्यापकत्वसाधनव्यापकत्व-साधनादभावग्रह इत्यनौपाधिकत्वं मनसा सुग्रहमिति तत्तुच्छम्, अनुमानेन तत्साधने अनवस्थानात्, प्रमाणान्तरस्याभावात्।"**[21] इति।

एवं तत्त्वचिन्तामणौ तर्कप्रकरणे गङ्गेशोपाध्यायेन ये विहिताः विचारास्त इह प्रबन्धे यथामति प्रपञ्चिताः। ये विचाराश्चैते अत्र उपस्थापिताः, ते केवलं मूलमणिग्रन्थमात्र-मनुसृत्य निरूपिताः।

---

[21] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 733

## ३.८. अध्यायोपसंहारः

***तत्त्वचिन्तामणिस्थतर्कप्रकरणसमीक्षणम्*** इति तृतीये अध्याये प्रदर्शिताः तत्त्वचिन्तामणौ तर्कस्वरूपं कथमाधृतमिति। तथा हि तद्विचारावसरे तर्के अनवस्थादोषः तत्परिहारः च, उदयनाचार्यसंवादः श्रीहर्षमतखण्डनं च, अन्येषां पूर्वपक्षिणां मतनिरासः चेति विषया अपि यथामति पर्यालोचिताः। अथ अध्यायोपसंहृतौ तत्त्वचिन्तामणिमतस्य केचन विचारा उपस्थाप्यन्ते। एषां विचाराणां पारमार्थिकत्वं सुधियां गोचरम्। तथा हि,

### मूलविरोधदोषः

तर्कप्रकरणे मूलविरोधदोष आशङ्कयितुं शक्यः। तथा हि मणौ तर्कप्रकरणं प्रणीय गङ्गेशोपाध्यायेन तर्कस्य लक्षणमेव तावत् नोदीरितम्। तर्कलक्षणमविधायैव तत्रानवस्थादोषप्रसङ्गतत्परिहारादिकं पर्यालोचितमिति मणिग्रन्थस्यायं न्यूनतादोष एव। ननु तर्कद्वैविध्यं मणौ अनुल्लिखितमपि अन्यत्र आकरग्रन्थादिषु प्रदर्शितत्वात् तदेव मणिकृतामपि सम्मतमेवेतिवत् अत्र तर्कलक्षणानभिधाने अपि अन्येषां प्राचामाचार्याणां तर्कलक्षणमेव मणिकृदिष्टमिति न वाच्यम्, नापि च तर्कप्रकरणस्येह प्रकृतत्वात् अन्यत्र वक्तव्यस्यासम्भवात् अन्यत्र ग्रन्थे कुत्रचित् ग्रन्थकृता कृतं तर्कलक्षणमिति वाच्यम् इति दोषावसरः।

ननु प्रथमपक्षाश्रयणे मणिग्रन्थानन्तरभाविभिः ग्रन्थकर्तृभिः, तत्पश्चात्कालिकै-श्चाचार्यैः तथैव तर्कलक्षणस्य प्रणीतत्वात् मणिकृत्सम्मतं लक्षणं **‘व्याप्यारोपेण**

**व्यापकारोपस्तर्क'** इति ग्राह्यम्, इति चेन्न, तथात्वे अस्य ग्रन्थस्य मूलविरोधदोषापत्तिः। यतो हि न्यायदर्शनस्य आकरभूतेन अक्षपादसूत्रेण मणिग्रन्थविरोधः सम्भावयितुमपि शक्यते। न्यायसूत्रं तर्कविषयकं तावत् **'अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहः तर्क'** इति प्रसिद्धम्। तस्य सामान्यतो ज्ञाते वस्तुनि विशेषज्ञानाय क्रियमाण ऊह एव तर्क इत्यर्थः सामान्यः। मणिसम्मतं च तर्कस्वरूपं, प्रमाणेन अनुमितौ प्रमायां जननीयायां प्रतिबन्धकवशात् अनुमितौ प्रतिबद्धायां तत्प्रतिबन्धनिवर्तनाय य आरोपः, असावेव तर्कः इति सामान्यतो मूलविरोधः कल्पयितुं शक्यः।

ननु क्वैषा दोषसम्भावना? सूत्रस्थपदानामेतादृशे अर्थे आचार्यैरपि व्याख्यातत्वात्। तथा हि, सूत्रस्थं कारणमिति पदं व्याप्यार्थकम्। तस्योपपत्तिः आरोपः, तस्मात् यः आरोपो नाम व्यापकस्य तथा च व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्यारोपात् यो व्यापकारोपः स तर्कः इति। तेन समानार्थकमेव मणिकृतं तर्कस्वरूपम्। इत्थमेव निरूपितं वृत्तौ विश्वनाथेनापि।

तथापि मूलविरोधदोषान्न मुक्तिः। यतो हि, अविज्ञाततत्त्वे इत्यस्य पदस्य सामान्यतया ज्ञाते, विशेषतया अज्ञाते इत्येव अर्थः स्वारसिकः, भाष्यकारादिभिः तथैव व्याख्यातत्वात्। अत्र तु व्यापकाभाववत्तया निर्णीते इति तद्विरुद्धार्थः कल्पनीयः। अतः विरुद्धार्थस्य कल्पने मानाभावात् दोष एव। अपि च, उपपत्तिशब्दस्य युक्तिः, सम्भव इत्यादयः अर्थाः प्रसिद्धाः। किन्तु प्रकृते उपपत्तिपदस्य आरोपार्थकत्वस्वीकारे प्रसिद्धार्थत्यागरूपो दोष एव। अतः मणिसम्मतस्य लक्षणस्य निर्मूलत्वापत्तिः।

मूलविरोधदोषनिवारणं नूनं यथाकथञ्चित्प्रदर्शयितुं शक्यम्, वल्लभाचार्यैः न्यायलीलावत्यां कृतं तर्कलक्षणं मणिकृतामभिमतमिति कथनात्। तथा चोल्लिखितं वल्लभाचार्येण तर्कलक्षणम् – **"अथ कस्तर्कः? एकधर्माभ्युपगमे द्वितीयस्य नियतप्राप्ति-रूपः"**[22] इति। एकस्य धर्मस्य व्याप्यस्य अभ्युपगमे द्वितीयस्य व्यापकस्य नियतप्रसङ्गः तर्क इति तदर्थः वल्लभाभिप्रेतः। व्याप्यारोपात् व्यापकारोप इति तत्रस्थो भावः। तेन मणिसम्मतलक्षणस्य समूलत्वमेवेति वाच्यम्। तथापि मणिग्रन्थस्थतर्कलक्षणस्य न्यायसूत्रेण विरोधे ऋषिसम्मतेरभावात् मूलविरोध एव।

## प्रमाणानुग्राहकशब्दस्य अपव्याख्या

**"तर्कस्तु न प्रमाणसंगृहीतो नापि प्रमाणान्तरं, किन्तु प्रमाणानुग्राहकः"** इति न्यायभाष्यम्। प्रमाणेन अनुमितौ प्रमायां जननीयायां व्यभिचारसंशयं निवर्त्य सहकरोतीति प्रमाणानुग्राहकस्तर्क इति नव्यानां मणिकृत्प्रभृतीनां मतम्। ननु तथात्वे यत्र व्यभिचारसंशयो नास्ति तत्रानुग्राहकत्वं वर्तते वा, न वेत्यादिसंशयाः उत्पद्यन्ते। परन्तु भाष्यादिप्राचीनग्रन्थेषु केषुचित्तावत् प्रमाणानुग्राहकशब्दस्य एतादृशार्थः न प्रपञ्चितः। यत्र प्रमाणं प्रवर्तते तत्रैव विषयाणां युक्तायुक्तत्वं विवेचयति इति तर्कस्य

---

[22] न्यायलीलावती, पृ 514

प्रमाणानुग्राहकता इति केचित् प्राञ्चः । तथा चोक्तं वार्तिककृता - **“प्रमाणविषयविभागात्तु प्रमाणानुग्राहक इति । को विभागः युक्तायुक्तविचारः”** इति ।

एवंरीत्या पर्यालोचयामश्चेद् व्यभिचारसंशयो वा भवतु, नैव वा भवतु, युक्तायुक्तत्वविचारः कर्तुं शक्यते इति व्यभिचारसंशयनिवर्तकया न तर्कसिद्धिः । तथा च आत्मा नित्यः इति विषये वर्तमानमपि प्रमाणं यदि आत्मा उत्पत्तिधर्मकः तर्हि संसारापवर्गौ न स्यातामिति अनुत्पत्तिधर्मकेणात्र भवितव्यमिति तर्केणानुगृह्यते इति प्राचां व्याख्या । तथा च अनुत्पत्तिधर्मकेण भवितव्यमिति हि तर्काकारः उक्तः । नव्यानां नये तु, यदि आत्मा अभविष्यत् तर्हि संसारापवर्गौ न स्यातामित्येव फलति तर्काकारः । तथा चात्रापि विरोधः सम्भवतीति विरोधनिवारणं सुधिया विचार्यम् ।

**<u>तर्कस्य व्यभिचारसंशयनिवर्तकत्वासम्भवः</u>**

ननु तर्को व्यभिचारसंशयनिवारणेन प्रमाणमनुगृह्णातीति नव्यमतमप्ययुक्तम् । व्यभिचारसंशयस्य व्याप्तिग्रहप्रतिबन्धकत्वं चेत् युज्येत तन्निवृत्तये तर्कापेक्षा, किन्तु न तथा । यतो हि व्यभिचारसंशयस्य ग्राह्यसंशयपर्यवसन्नतया तस्य पक्षतारूपत्वात् अनुमितौ तस्य अनुकूलत्वमेव, न तु प्रतिबन्धकत्वम् । अतः व्यभिचारसंशयस्य व्याप्तिज्ञानाप्रतिबन्धे सिद्धे सति तन्निवर्तनाय तर्कस्य अपेक्षैव नास्तीति स्यात् ।

सम्मतश्चायमर्थः नैयायिकानां समेषाम्। तथा चोक्तं पण्डितशिरोमणिना रघुनाथशिरोमणिना **"ग्राह्यसंशयस्य तु न प्रतिबन्धकतेति भावः"**[23] इति। उक्तं च मथुरानाथेनापि **"न चैवं व्यभिचारसन्देहसत्त्वेऽपि व्याप्तिग्रहापत्तिरिति वाच्यम्। सन्देहात्मकव्याप्तिग्रहे इष्टापत्तेः"**[24] इति। उक्तं च दिनकरभट्टेनापि **"व्यभिचारसंशयस्य ग्राह्यसंशयपर्यवसन्नतया प्रत्यक्षे एव प्रतिबन्धकत्वं, न त्वनुमितौ, तत्र तस्यानुकूलत्वादिति"** इति। एवञ्च यदि व्यभिचारसंशय अभीष्ट एव, तर्हि कस्य निवर्तनाय तर्कः भवेत्। तथा च तस्य कथं व्यभिचारसंशयनिवर्तकत्वं सम्भवेत्।

अपि च, व्यभिचारनिवर्तकस्तर्कः इत्यस्य व्यभिचारनिवृत्त्यनुकूल इत्यर्थः। क्वचित् व्यभिचारज्ञानविरहः स्वतस्सिद्ध इति स्वयमभ्युपगतत्वात् कुत्रचिद् तर्कं विनापि व्याप्तिग्रहो भवतीत्यायातम्। तथा सति एकस्य कार्यस्य अनेककारणत्वाङ्गीकारे व्यतिरेकव्यभिचारापत्त्या तर्कस्य व्यभिचारनिवृत्तिजनकत्वं कथं सिद्ध्येत्। तत्परिहाराय पुनः कार्यतावच्छेदककोटौ कारणाव्यवहितोत्तरत्वादिकं निवेश्य दोषः परिहरणीयः। तथा च गौरवम्।

अपि च, व्यभिचारज्ञानविरहः व्याप्तिग्रहोपायः, स च क्वचित् तर्केण इत्युक्तत्वात् तर्केण व्यभिचारज्ञानं प्रतिबध्यमिति आयातम्। एवञ्च प्रतिबध्यतावच्छेदककोटौ संशयनिश्चयसाधारणज्ञानत्वस्य प्रवेशात् तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकः तर्क

[23] प्रामाण्यवाददीधितौ, पृ 9

[24] तत्वचिन्तामणिरहस्यम्, पृ 216

इति वक्तव्यम्। किन्तु यत्र प्रमात्मकव्यभिचारनिश्चय एव वर्तते तत्र तर्कसहस्रेणापि व्यभिचारज्ञानं न निवर्तते इति तर्के कारणे सत्यपि ज्ञानत्वावच्छिन्नप्रतियोगिताकाभावस्य कार्यस्य अनुदयात् व्यतिरेकव्यभिचार एव। तस्मात् व्यभिचारज्ञाननिवर्तकत्वस्य असम्भव एव तर्कस्य।

अपि च, उदयनाचार्येणापि व्याप्तिज्ञानं प्रति विपक्षेच्छाया एव प्रतिबन्धकत्वम् उक्तम्। न तु व्यभिचारसंशयस्य। संशयस्य प्रवृत्तिप्रतिबन्धकत्वं तु सिद्धम्। यथा व्याघ्रसंशयः अरण्ये प्रवृत्तिं प्रतिबध्नाति। किन्तु संशयस्य निश्चयप्रतिबन्धकत्वं तु नास्तीति तदाशयः। तर्केण तु अनिष्टापादनं क्रियते इति सुरापानेच्छा तत्र अनिष्टापादने यथा निवर्तते तथा विपक्षेच्छापि तर्केण निवर्तते इति। तथा चोकम् उदयनाचार्यैः **“तेन हि वर्तमानेन तदायत्तव्यभिचारकोटौ अनिष्टमुपनयता इच्छा विच्छिद्यते”** इति। इच्छा विच्छिद्यते इत्यत्र इच्छा नाम विपक्षेच्छेत्यर्थः। तस्मात उक्तैः प्रमाणैः व्यभिचार-संशयनिवर्तकत्वं न सम्भवत्येव तर्कस्येति शिवम्।

# चतुर्थः अध्यायः

## *तत्त्वचिन्तामणेस्तर्कप्रकरणे रघुनाथ-मथुरानाथकृतटीकयोः* समीक्षणम्

ग्रन्थमणौ तत्त्वचिन्तामणौ तर्कप्रकरणमतिसमासेनैव विमृष्टम्। अथ कालेन सैव गाङ्गेशगीः कृतिभिरनेकाभिर्विततततनुर्वक्तुर्वैखरीविन्यासेन विविधविप्रतिपन्नोपपत्तिनिचय-निराकरणविजृम्भणेनाधीतीनामनेकेषां शास्त्रानुशीलनपरिशीलनपराणामनल्पमुपकारम् उपदधाना वरीवर्त्तीति प्रथितं तदीयं गौरवम्। इदानीं प्रसिद्धासु तद्व्याख्यासु रघुनाथ-शिरोमणिकृतदीधितिं मथुरानाथकृतमाथुरीं चावलम्ब्य तत्त्वचिन्तामणेस्तर्कप्रकरणे लभ्यमानाः विचाराः समीक्ष्यन्ते। तत्रादौ कालेन प्राचीनत्वात् ज्येष्ठत्वाद्वा रघुनाथमतानां समीक्षणम्, रघुनाथान्तेवासिनो मथुरानाथमतानां तदनन्तरमिति स्थितिः।

### तत्त्वचिन्तामणेस्तर्कप्रकरणे रघुनाथकृतटीकायाः समीक्षणम्

गङ्गेशोपाध्यायप्रणीतस्य तत्त्वचिन्तामणेः प्रसिद्धासु साक्षाट्टीकासु आनन्यमयते पण्डितशिरोमणिरघुनाथशिरोमणिप्रणीता तत्त्वचिन्तामणिदीधितिटीका। सेयं विचारबहुला गम्भीरतत्त्वोपेतापि लघ्वी। शब्दसंक्षिप्तापि दीधितिरियमर्थभूयिष्ठेति विदां वादः। अतो

संक्षिप्तायामपि दीधितौ तर्कप्रकरणमाश्रित्य शिरोमणिना नैके विचारा दर्शिताः। अधस्तात् नामग्राहं ते विचाराः प्रथमं निर्दिश्यन्ते –

1. मण्युक्ततर्कस्य कार्यकारणभावग्राहकत्वोपपादनम्
2. व्याप्तिग्रहे कार्यकारणभावज्ञानस्यावश्यकत्वप्रदर्शनम्
3. तर्कशरीरस्थपदव्यावृत्तिप्रदर्शनम्
4. रघुनाथमतानुसारं मण्युक्तायाः प्रथमशङ्काया मण्युक्ततर्कप्रतिबन्धकत्व-निरूपणम्
5. रघुनाथमतानुसारं मण्युक्ताया द्वितीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्व-निरूपणम्
6. रघुनाथमतानुसारं मण्युक्तायास्तृतीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्व-निरूपणम्
7. मणिस्थतदुपादानपदार्थनिरूपणम्
8. मिश्रमतप्रदर्शनम्
9. धूमत्वावच्छिन्नधूमे वह्निजन्यत्वविचारः

### ४.१.१. मण्युक्ततर्कस्य कार्यकारणभावग्राहकत्वोपपादनम्

गङ्गेशमते तर्को हि व्याप्तिज्ञानसहायः। 'पर्वतो वह्निमान् धूमाद्' इत्यनुमितौ धूमो वह्निव्याप्य इति व्याप्तिज्ञाने 'धूमो वह्निव्यभिचारी' (धूमः अस्तु वह्निर्मास्तु) इत्युक्त-

व्याप्तिग्रहप्रतिबन्धकीभूतव्यभिचारशङ्कायां सत्यां न व्याप्तिज्ञानोत्पत्तिः। अस्यां चावस्थायां 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्यादिरूपस्तर्कः व्याप्तिज्ञान-प्रतिबन्धकीभूतव्यभिचारशङ्कानिवर्तकः। ननु व्याप्तिज्ञानप्रतिबन्धकीभूतव्यभिचारनिवर्तके 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्यादिरूपे तर्के धूमोऽस्तु वह्निर्मास्तु इति व्यभिचारशङ्कायां सत्यां गङ्गेशोपाध्यायेन तत्त्वचिन्तामणौ **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्तर्हि नोत्पन्नः स्याद्"** इति तर्कः प्रदर्शितः। ननु धूमो वह्निव्यभिचारी न वेति संशये 'धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादि'ति तर्कस्यैव वह्निधूमव्याप्तिग्रहोपयोगित्वात् मण्युक्तः **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्तर्हि नोत्पन्नः स्यादि"**ति तर्कः कथमपि न वह्निधूमव्याप्तिग्रहोपयोगीति तदुपपदानमर्थान्तरदोषदुष्टम् इति शङ्कायामुच्यते यद् 'धूमो वह्निव्याप्य' इत्याकारकव्याप्तिग्रहे धूमो वह्निव्यभिचारी वा न वेति संशयः प्रतिबन्धकः, तादृशसंशयरूपप्रतिबन्धकनिवर्तकः 'धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादि'त्याकारकस्तर्कः। तस्मिंश्च तर्के 'धूमो वह्निजन्यो न वे'त्यादिशङ्कायां कृतायां "वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहितजन्यः स्यात्तर्हि नोत्पन्नः स्यादि"ति मूलोक्ततर्को भवति उक्तशङ्कानिवर्तकः। अयं च तर्कः धूमवह्न्योः कार्यकारणभावग्राहक-तया 'धूमो वह्निजन्यो न वे'त्यादशङ्काया निवारकः। ननु कथं धूमवह्न्योः कार्यकारणनिश्चय इति प्रदर्शितं दीधितिकारेण मणिव्याख्यायां दीधितौ। तथाहि हुताशनरासभादिपदार्थ-समूहस्य धूमेन अन्वयव्यतिरेकाभ्यां ज्ञायते हुतानशनाद्यन्यतमं धूमकारणम् इति। सामान्य-तया हुताशनरासभाद्यन्यतमं धूमकारणमित्यवधारणादनन्तरं संशयो जायते - किम्

हुताशनादीनि सर्वाण्येव धूमं प्रति कारणानि इत्येकः पक्षः, हुताशनादीनि कानिचन एव कारणानीत्यपरः पक्षः, हुताशनादीनि कानिचन न कारणानीत्यन्यः कश्चन पक्षः। ततश्च यस्याभावे अपि अन्येभ्यः धूमोत्पत्तिर्दृश्यते तस्य धूमं प्रत्यहेतुत्वं सिद्धं भवति। किञ्च, यस्याभावे सत्स्वप्यन्येषु न धूमोत्पत्तिर्दृश्यते तस्यैव धूमं प्रति कारणत्वं सुनिश्चितं भवति। यथा वह्न्यभावे सत्स्वपि रासभादिषु न धूमोत्पत्तिर्दृश्यते इति वह्नेरेव धूमं प्रति कारणत्वम्। अत्र धूमवह्न्योरकारणत्वसन्देहे समापन्ने तन्निवृत्त्यर्थं तर्कशरीरमुक्तं गङ्गेशैः – **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादित्यत्र किं धूमः अवह्नेरेव भविष्यति, क्वचिद्वह्निं विनापि भविष्यति, अहेतुक एव वोत्पत्स्यते इति शङ्का स्यात्।"**[1] इति। अयमेव दीधितेराशयः। तथाहि दीधितौ उक्तम् – **"हुताशनरासभादिपदार्थ-सार्थस्यान्वयव्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमानः अवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य सन्दिग्धे – किमेतानि सर्वाण्येव कारणानि, किं वा कानिचित्तथा कानिचिच्च नेति।"**[2] इति।

### ४.१.२. व्याप्तिग्रहे कार्यकारणभावज्ञानस्यावश्यकत्वप्रदर्शनम्

व्याप्तिग्रहार्थम् अवश्यमेव कार्यकारणभाव आवश्यकः। अत्र कारणं हि व्याप्तिग्रहः कार्यकारणभावाधीन एव। कार्यं वै व्यभिचारिविरोधि। व्याप्तिरपि व्यभिचारिविरोधिनी।

---

[1] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 577

[2] तत्रैव

एवं कार्यतानिश्चयः 'धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादि'ति तर्कद्वारा व्यभिचारशङ्कां निराकरोति। अतः व्याप्तिः कार्यकारणभावाधीना। तथाहि – **"अनुसन्धेयश्चावश्यं कार्यकारणभावग्रहस्तदधीनत्वाद् व्याप्तिबुद्धेः। सामानाधिरण्येनान्वयव्यतिरकेग्रहात् जायमानस्य तथैव हेतुहेतुमद्भावं गृह्णतस्तैव वा व्याप्तिपरिच्छेदकत्वात्।"**[3] इति।

### ४.१.३. तर्कशरीरस्थपदव्यावृत्तिप्रदर्शनम्

तत्त्वचिन्तामणिकारैः **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्याद् नोत्पन्नः स्यादि"**ति यस्तर्क उक्तस्तस्य पदव्यावृत्तिः प्रदर्शिता दीधितिकारैः दीधितौ।

अत्र तर्कशरीरे वह्निसमवहिताजन्यत्वम् आपादकम्, तथा अनुत्पन्नत्वम् आपाद्यम् इति बोध्यम्। अत्र च तर्कशरीरे वह्न्यसमवहिताजन्यः इत्यत्र वह्निसमवहितजन्यत्वं वह्निजन्यत्वमेव वक्तव्यम्। किञ्च, तर्कशरीरे वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तम् आपाद्यकोटिप्रतियोगिविशेषणम्। तेन रघुनाथनये तर्काकारो भवति - **"<u>धूमो यदि वह्निजन्यत्वाभाववान् स्यात् वहन्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वाभाववान् स्यात्</u>"** इति। अत्र आपाद्यं भवति अनुत्पन्नत्वं नाम उत्पन्नत्वाभाव इति पूर्वमेवोक्तम्। तेन आपाद्यस्य उत्पन्नत्वाभावस्य प्रतियोगि उत्पन्नत्वम्, तस्य उत्पन्नत्वस्य विशेषणं भवति वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तम्। तच्च वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तं यदि आपाद्यस्य उत्पन्नत्वाभावस्य प्रतियोगिनि उत्पन्नत्वे विशेषणत्वेन न स्वीक्रियते तर्हि

[3] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 579

वह्निमद्देशोत्पन्नघटादौ व्यभिचारः। तथाहि **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्याद् नोत्पन्नः स्यादि"**ति तर्कशरीरे यत्र यत्र उत्पन्नत्वाभावः तत्र तत्र वह्निसमवहिताजन्यत्वं नाम वह्निजन्यत्वाभाव इति। तथा च, वह्निमद्देशोत्पन्नघटादौ वह्निजन्यत्वाभावस्य आपादकस्य सत्त्वे अपि तत्रापाद्यस्य उत्पन्नत्वाभावस्य विरह इति आपादकवति आपाद्याभावरूपो व्यभिचारः। उक्तव्यभिचारदोषवारणाय तर्कशरीरे आपाद्य-प्रतियोगिनि उत्पन्नत्वे वह्न्यसमवहिताजन्यत्वं विशेषणत्वेन देयमेव। तेन न तादृशघटादौ व्यभिचारः। तथाहि वह्निमद्देशोत्पन्नघटादौ यथा वह्निजन्यत्वाभावो वर्तते तथा केवलस्य उत्पन्नत्वाभावस्य असत्त्वे अपि वह्न्यसमवहिताजन्यत्वविशिष्ट उत्पन्नत्वाभावो वर्तते। अत आपादकवति आपाद्यसत्तेति न व्यभिचारः। तेन न क्षतिः। अत्र कारणं आपादकवति आपाद्याभावस्यैव व्यभिचारत्वम्। आपादकाभाववति आपाद्याभावस्तु न दोषाय इति बोध्यम्। तथाहि दीधितौ उक्तम् – **"वस्तुतो वह्न्यजन्यमपि वह्निसमवहितजन्यं वह्न्यसम-वहिताजन्यञ्च सम्भवतीति वह्निजन्यत्वपर्यवसितं वह्निसमवहितजन्यत्वं वाच्यम्। तथा च, घटादौ व्यभिचारवारणाय आपाद्यकोटिप्रतियोगिविशेषणार्थकं सत्यन्तम्।"**[4] इति।

इदानीमियं शङ्का जायते यद् **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्नि-समवहिताजन्यः स्याद् नोत्पन्नः स्यादि"**ति तर्कशरीरे उत्पन्नत्वाभावरूपस्य आपाद्यस्यैव वह्न्यसमवहिताजन्यत्वं विशेषणमस्तु, किमर्थमापाद्यस्य उत्पन्नत्वाभावस्य यत् प्रतियोगि उत्पन्नत्वं तद्विशेषणमिति शिरोमणिना स्वीकृतम्।

---

[4] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 584

उक्ताया आशङ्कायाः समाधानत्वेन इदं वक्तव्यं यद्, यदि वह्न्यसमवहिताजन्यत्वम् उत्पन्नत्वाभावस्य विशेषणत्वेन स्वीक्रियते तर्हि वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटादौ व्यभिचारो भवेत्। तथाहि स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वरूप-वह्न्यसमवहिताजन्यत्वविशेषणविशिष्टस्योत्पन्नत्वाभावस्य नित्यवस्तुनिष्ठस्य वह्निमद्देशोत्पन्न-घटादौ असत्त्वात् व्यभिचारः। किन्तु यदि वह्न्यसमवहिताजन्यत्वम् आपाद्यस्य उत्पन्नत्वाभावस्य प्रतियोगिन उत्पन्नत्वस्यैव विशेषणत्वेन स्वीक्रियते तदा तादृशविशेषण-विशिष्टोत्पन्नत्वस्य अभावस्यापि तादृशघटादौ सत्त्वान्न व्यभिचारापत्तिरिति बोध्यम्।

### ४.१.४. रघुनाथमतानुसारं मण्युक्तायाः प्रथमशङ्काया मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम्

पूर्वमेव निरूपितं यद् दीधितिकारस्य रघुनाथशिरोमणेर्नये वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तम् उत्पन्नत्वाभावस्यापाद्यस्य यत्प्रतियोगि उत्पन्नत्वं तद्विशेषणमिति। एवं च मण्युक्ततर्कशरीरे वह्न्यसमवहिताजन्यत्वविशिष्टौत्पन्नत्वाभाव इति तादृशविशेषण-विशिष्टोत्पन्नत्वाभाव एवापाद्यः इति रघुनाथनयः। आपाद्यशरीरे च विशेषणीभूतं वह्न्यसमवहिताजन्यत्वं नाम स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्व-रूपम्। तेन रघुनाथनये तर्कशरीरं भवति - **'धूमो यदि वह्निजन्यत्वाभाववान् स्यात् स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टो-त्पन्नत्वाभाववान् स्यात्।** पूर्वं हि निरूपितं यत् तर्कं प्रति आपाद्याभावनिश्चयः कारणमिति। तेन 'धूमो यदि वह्निजन्यत्वाभाववान् स्यात् स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहित-

प्राक्क्षणकान्यत्वरूपवहन्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वाभाववान् स्यात्' इति तर्कं प्रति स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्ट -तादृशपारिभाषिकोत्पन्नत्वाभावस्य आपाद्यस्य अभावः स्वसमानाधिकरणवह्निमदन्य-स्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्व-निश्चयः कारणम् इति रघुनाथाशयः। किञ्च, उक्ततर्ककारणीभूतं स्वसमानाधिकरणवह्नि-मदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्न -त्वनिश्चयं प्रति स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसम-वहिताजन्यत्वाभावज्ञानं प्रतिबन्धकम्। ननु स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहित-प्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वनिश्चयं प्रति स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वाभाव-ज्ञानस्य कथं प्रतिबन्धकत्वमिति शङ्कायामुच्यते विशेषणाभावविषयकज्ञानविधयात्र प्रतिबध्यप्रतिबन्धकभावो बोध्यः। तथाहि विशिष्टतादृशपारिभाषिकोत्पन्नत्वाभावस्य आपाद्यस्य अभावः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्य-समवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वनिश्चयः एकं विशिष्टं ज्ञानम्, तत्र स्वसमानाधिकरण-वह्निमदन्यस्वाव्यवहित-प्राक्क्षणकान्यत्वरूप-वह्न्यसमवहिताजन्यत्वस्य विशेषणस्य सत्त्वात्। एवञ्च, स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्व-रूप-वह्न्यसमवहिताजन्यत्वाभावज्ञानं विशेषणाभावज्ञानम्। अत्र विशिष्टज्ञानविषयीभूतं विशेषणज्ञानं विशेषणाभावविषयकज्ञानं प्रतिबध्नातीत्येवं प्रतिबध्यप्रतिबन्धकभावो बोध्यः। तथा च, तादृशं यत् प्रतिबन्धकीभूतं स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहित-

प्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वाभावज्ञानं तद् **'धूमः स्वसमानाधिकरणवह्नि-मदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वा'** इत्याकारकसंशयः। एवञ्च, प्रतिबन्धकीभूतायां स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूप-वह्न्यसमवहिताजन्यत्वाभाव-ज्ञानात्मकायां **'धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वा'** इति शङ्कायां सत्यां स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसम-वहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वनिश्चयः आपाद्याभावनिश्चय एव न भवति। तादृशनिश्चयाभावाच्च कारणाभावान्मूलोक्ततर्क एव नोत्पद्यते इति तर्कं प्रति परम्परया **'धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वा'** इत्याकारकः वह्न्यसमवहिताजन्यत्वसंशयः प्रतिबन्धकः। स च **'धूमः स्वसमानाधिकरणवह्निमदन्य-स्वाव्यवहितप्राक्क्षणकान्यो न वा'** इत्याकारको **'धूमः अवह्नेरेव भविष्यति'** इत्यनेन मणिकृद्भिरुक्तम्।

ननु **'धूमः अवह्नेरेव भविष्यति'** इति मण्युक्तेः कथं **'धूमः स्वसमानाधिकरण-वह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वा'** इत्याकारकसंशयलाभ इति जिज्ञासायामुच्यते यद् **'धूमः अवह्नेरेव भविष्यति'** इति प्रथमशङ्कायां धूमपदस्य धूमत्वावच्छिन्नार्थकत्वेन, अवह्निपदस्य च वह्निशून्यार्थकत्वेन, जन्यत्वस्य तदुत्तरपञ्चम्यर्थत्वेन धूमत्वावच्छेदेन स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणको न वेति शङ्कायां पर्यवसितम्।

### ४.१.५. रघुनाथमतानुसारं मण्युक्ताया द्वितीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम्

किञ्च, मण्युक्तः **"क्वचिद्वह्निं विनापि भविष्यती"**ति संशयः धूमत्वजात्याश्रय-यत्किञ्चिद्व्यक्तिवाचित्वेन धूमत्वसामानाधिकरण्येन स्वमानाधिकरणवह्निमदन्य-स्वाव्यवहितप्राक्क्षणको न वेति शङ्कायां पर्यवसितो भवति। तेन पूर्ववत् **"क्वचिद्वह्निं विनापि भविष्यती"**त्यतः पर्यवसितायाः धूमत्वजात्याश्रययत्किञ्चिद्व्यक्तिवाचित्वेन धूमत्व-सामानाधिकरण्येन स्वमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणको न वेति शङ्कायाः मण्युक्तं रघुनाथशिरोमणिसम्मतं **धूमो यदि वह्निजन्यत्वाभाववान् स्यात् स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवहन्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वाभाववान् स्यात् इति तर्कं प्रति प्रतिबन्धकत्वं** सुस्पष्टम्। एतत्सर्वं मनसि निधायैव दीधितिकृता उक्तम् – **"अत्र आद्या द्वयी शङ्का इष्टापत्तिपर्यवसायिनी।"**[5] इति। आक्षरिकाशयो हि अत्र नाम आपाद्यकोटिप्रतियोगिविशेषणतया सत्यन्तरार्थघटिते धूमो यदि वह्निजन्यत्वाभाववान् स्याद् वह्न्यसमवहिताजन्यत्वविशिष्टस्य जन्यत्वस्याभाववान् स्यादित्याद्याकारे तर्के इति बोध्यम्। तथा च, 'किं धूमः अवह्नेरेव भविष्यति', 'क्वचिद् वह्निं विनापि भविष्यति' इति शङ्के द्वे इष्टापत्तिपर्यवसायिनी। तत्र च प्रथमशङ्का धूमत्वावच्छेदेन, द्वितीयशङ्का च धूमत्वसामानाधिकरण्येन वह्न्यसमवहित-जन्यत्वावगाहिनीत्येव द्वयोर्विशेषो बोध्यः।

---

[5] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 693

### ४.१.६. रघुनाथमतानुसारं मण्युक्तायास्तृतीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम्

रघुनाथशिरोमणिनये **"धूमः अहेतुको न वे"**त्याकारकः संशयो हेतुजन्यत्व-सामान्याभावविषयकतया धूमधर्मिकविशिष्टोत्पन्नत्वरूपापाद्यस्य अभावनिश्चयं प्रति प्रतिबन्धकः। अत्र कारणं हि सामान्याभावज्ञानं विशिष्टबुद्धिं प्रति प्रतिबन्धकम्। एवं हि तर्कजनकीभूतो य आपाद्यव्यतिरेकनिश्चयस्तस्य विघटकत्वेन मूलोक्तायाः **"धूमः अहेतुक एव उत्पत्स्यत"** इति तृतीयशङ्कायाः तर्कविरोधित्वम्। अतो दीधितौ उक्तम् – **"तृतीया पुनरापादकाद्यप्रसिद्धिपर्यवसायिनी।"**[6] इति।

### ४.१.७. मणिस्थतदुपादानपदार्थनिरूपणम्

तत्त्वचिन्तामणिकारेण 'धूमो वह्निजन्यो न वे'ति शङ्कायां सत्यां तन्निराकरणार्थं 'धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यो स्यात् नोत्पन्नः स्यादि'ति तर्को दर्शितः। पुनश्च तत्र तस्य प्रतिबन्धकत्वेन तिस्रः शङ्का उपस्थापिताः। ताश्च शङ्काः स्वक्रियाव्याघाताद् नावतरन्तीति तेनैव स्वग्रन्थे उक्तम्। ननु तत्र शङ्कायां कृतायां कथं स्वक्रियाव्याघातो भवतीति विषये गङ्गेशोपाध्यायेन उक्तम् – **"यदि हि गृहीतान्वयव्यतिरेकं हेतुं विना कार्योत्पत्तिं शङ्केत, तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्यात् तेन विनापि तत्ससम्भवात्। तस्मात्तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम्। शङ्कायां न नियतोपादानं, नियतोपादाने च न शङ्का। तदिदमुक्तम्**

[6] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 693

**- तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति न हि सम्भवति स्वयं वह्न्यदिकं धूमादिकार्यार्थं नियमत उपादत्ते, तत्कारणं तन्नेत्याङ्कते चेति।”**[7] इति। मूलकारोक्तस्य तस्मात्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम् इत्यत्र तदुपादानम् इत्यस्यार्थनिरूपणे टीकाकृतां वैमत्यं सुलभम्। तत्र उपादनमिति पदमुभयथा निष्पद्यते। उपादीयते इत्युपादानम् इति भाववाच्ये निष्पद्यते। कृतिरिति तदर्थः। तथा च, उपादीयते अनेनेति व्युत्पत्त्या करणवाच्ये अपि उपादानम् इति शब्दो निष्पद्यते। अत्र रघुनाथ-शिरोमणिना करणवाच्यनिष्पन्नम् उपादानपदमेव गृहीतम्। करणवाच्यनिष्पन्नस्य उपादान-पदस्यार्थः कृतो दीधितिकृता - तदीयकार्यप्रयोजकताज्ञानपरम्, तादृशन्वयव्यतिरेकानु-विधानबोधपरं वा। तदीयेत्यत्र तत्पदेन वह्न्यादेर्ग्रहणं कार्यम्। तत्कार्यं च धूमादि। तेन तदीयकार्यप्रयोजकताज्ञानपरमित्यस्यार्थो हि वह्न्यादिविषयकं यद्धूमादिप्रयोजकताज्ञानं तत्परमिति। किञ्च, तादृशन्वयव्यतिरेकानुविधानबोधपरमित्यस्यार्थो हि वह्न्यादौ तत्तद्धूमादेर्यो नियतान्वयव्यतिरेकबोधस्तत्परमिति। रघुनाथनये उपादानपदस्य कृतिरूपार्थो न ग्राह्यः। अत्र कारणं कृतिः शङ्काप्रतिबन्धिका न भवति। तेन अत्र स्थले करणवाच्य-निष्पन्नम् उपादानपदं ग्राह्यं, न तु भाववाच्यनिष्पन्नं पदम् इति रघुनाथनयः। तथाहि दीधितिकृता उक्तम् – **“तदुपादानमिति करणव्युत्पत्त्या तदीयकार्यप्रयोजकताज्ञानपरम्, तादृशान्वयव्यतिरेकानुविधानबोधपरं वा। अग्रेतनमपि स्वक्रियापदं तत्परमेव। कृत्यादेः शङ्काप्रतिबन्धकत्वे मानाभावात्।”**[8] इति।

---

[7] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 594

[8] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 59

### ४.१.८. मिश्रमतप्रदर्शनम्

तत्त्वचिन्तामणिकारैर्गङ्गेशैरुक्तं यद् धूमादिकार्यार्थं वह्न्यादिकं नियमतः अर्थात् धूमादीष्टपदार्थकारणं वह्न्यादिकमिति निश्चित्य तन्निश्चयवशात् प्रयत्नस्य विषयीकरोति तथा वह्न्यादिकं धूमादिकारणं न वा इति शङ्कामपि विषयीकरोति इति न सम्भवं मिथो विरुद्धत्वात्। अत्र व्याख्याप्रसङ्गे दीधितौ मिश्रमतं निरूपितं रघुनाथशिरोमणिना। किञ्च, मिश्रमतमनूद्य शिरोमणिना 'प्राहु'रित्यनेन प्रकर्षत्वमपि तन्मतस्य सूचितम्। तथाहि मिश्राणां नये चार्वाकं प्रति व्याप्तिग्रहोपाये निरूपिते तत्र च शङ्कानिवर्तके तर्के दर्शिते चार्वाकाश्चेत्तत्रापि शङ्कामुद्भावयति तदा एवं व्याघाताः दर्शनीयाः यत्, मैवं शङ्किष्ठाः, यतो हि मृषैव भाषसे। वस्तुतः तवापि नैवं संशयो जायते। सति तादृशे संशये धूमादितत्तत्कार्यार्थं वह्न्यादितत्तत्कारणे तवैव प्रवृत्तिर्व्याहता स्यात्। धूमादिकार्यं प्रति वह्न्यादीनां कारणत्वेन निश्चयाभावे ते तन्मूलिका विशिष्टप्रवृत्तिरप्यसम्भाविनीति मिश्राशय इति रघुनाथमतम्। तथाहि तैः उक्तम् – **"मिश्रास्तु पंर प्रति व्याप्तिग्रहोपाये प्रदर्श्यमाने व्यभिचारशङ्कानिरासहेतुत्वेनोपदर्शिते तर्के मूलशैथिल्यादिशङ्कोद्भावकं तं प्रति व्याघातः अयमुपदर्श्यते, मैवं शङ्किष्ठाः, तथा सति तत्तत्कार्यार्थितया तत्र तत्र कारणे तवैव प्रवृत्तयो व्याहन्येरन्। यदाह, न हि सम्भवति स्वयं वह्न्यादिकमितीति प्राहुः।"**[9] इति।

[9] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 604

### ४.१.९. धूमत्वावच्छिन्नधूमे वह्निजन्यत्वविचारः

ननु धूमविशेषं प्रति वह्निः कारणं, न तु धूमत्वावच्छिन्नधूमं प्रति कारणम्। यथा विजातीयकारणाद्धि विजातीयवह्निर्जन्यते तथा विजातीयकारणाद्धि विजातीयधूमः अपि जायते। वह्निं विनापि कश्चन धूमो जायते इति धूमत्वावच्छिन्नधूमो वह्निजन्य इति संशयः सुलभ एव। एतादृशे च संशये सति धूमो यदि वह्निव्यभिचारी तदा वह्निजन्यो न स्यादिति तर्कः अपि अनुत्पन्नः स्यात्। एवं धूमत्वावच्छिन्नधूमे वह्निजन्यत्वनिश्चयाभावात्तर्के अनागते धूमे वह्निव्यभिचारशङ्कानिवृत्तिरसम्भाविनीति चार्वाकाभिप्रायः। रघुनाथशिरोमणिनापि विषयमिममुपस्थाप्य स निराकृतः। तथाहि बहवो हि धूमाः वह्निजन्या इति प्रत्यक्षेण निर्णये सति धूमत्वावच्छिन्नधूमा हि वह्निजन्या इति निश्चयो जायते। तेन सामान्यतया कार्यकारणभावनिश्चयो भवति। एवं हि सामान्यतया कार्यकारणभावकल्पनायां लाघवम्। अन्यथा गौरवम्। कल्पनागौरवे च मानाभावः। लाघवपक्षो हि लोकैराश्रियते। तथा च लाघवसहकृतान्वयव्यतिरेकौ हि प्रामाणिकौ। तस्माद् धूमत्वावच्छिन्नधूमं प्रति वह्नित्वावच्छिन्नवह्निर्हि कारणम्। अन्यथा धूमार्थं न वह्निमनुसरेत्। तथाहि दीधितौ उक्तम् – **"यद्यपि चैतावता धूमत्वावच्छिन्नं प्रति वह्नेर्जनकत्वं नायाति। तृणारणिमणिन्यायेन वैकल्पिककारणतायामपि तथात्वसम्भवात् तथापि विशेषाणां कार्यकारणभावग्रहस्तर्केण तद्विरोधिशङ्कायामपनीतायां जायमानः सामान्यव्यभिचारानिर्णयानुगतागुरुविशेषरूपान्तरा-नुपस्थितिलाघवप्रतिबन्धनादिवशात् सामान्यत एव तं परिच्छिनत्ति। प्रामाणिकौ च**

**तथैवान्वयव्यतिरेकौ। फलबलेन लाघवादिज्ञानशून्याया एव सामान्यव्यभिचारशङ्कायाः प्रतिबन्धकत्वं कल्प्यते।"**[10] इति।

एवमेतावता रघुनाथशिरोमणिग्रथितदीधितिस्थगूहितविचारा यथामति समीक्ष्य उपस्थापिताः। अथ मथुरानाथस्य माथुरी समीक्ष्यते।

## तत्त्वचिन्तामणेस्तर्कप्रकरणे मथुरानाथकृतटीकायाः समीक्षणम्

अस्याः माथुरीति प्रसिद्धायाः मथुरानाथप्रणीतायाः टीकायाः रचनाशैली सरला विस्तृतव्याख्यानोपेता च। मूलग्रन्थोक्तार्थे अनुपपत्तीरुद्भाव्य परिष्कारादिभिः अनुपपत्तीः परिहरन् टीकायां मथुरानाथः मणिकर्तुरभिप्रायं सम्यक्तया विशद्य प्रकाशयति। अर्वाचीन-कालीनत्वादस्याः टीकायाः अत्रान्येषामपि मतानां सङ्ग्रहो दरीदृश्यते। अस्या टीकायाः सम्यगवलोकनेन ये विचाराः उपलभ्यन्ते ते अधस्तात् क्रमेणोच्यन्ते। तथा हि –

1. चिन्तामणिग्रथिततर्कस्य वह्निधूमयोर्व्याप्तिग्रहोपयोगित्वप्रदर्शनम्
2. चिन्तामणिग्रथिततर्कस्य अन्योन्याभावघटिततया निरूपणम्
3. मण्युक्ततर्कशरीरस्थाभावपदेन अन्योन्याभावग्रहणप्रयोजननिरूपणम्
4. अव्याप्यवृत्तित्वस्वरूपनिरूपणम्
5. तर्कघटकदलानां सार्थक्यम्

[10] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 399-400

6. यज्ञपत्युपाध्यायमतोपस्थापनं तद्दूषणञ्च
7. रघुनाथशिरोमणेः मतानुवादः।
8. मण्युक्तशङ्कात्रयस्य तर्कप्रतिबन्धकत्वोपपादनम्
9. वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य शङ्कात्रयप्रतिबन्धकत्वनिरूपणम्
10. तर्कानुसरणस्य वैयर्थ्यशङ्का, तत्सार्थक्यप्रदर्शनं च
11. तर्कस्य सत्त्वासत्त्वपरिष्कारः

### ४.२.१. चिन्तामणिग्रथिततर्कस्य वह्निधूमयोर्व्याप्तिग्रहोपयोगित्वप्रदर्शनम्

**<u>आक्षेपप्रदर्शनम्</u> -** व्यभिचारशङ्कानिवर्तको भवति तर्कः इति प्रागेव प्रपञ्चितम्। तथा च व्याप्तौ सति व्यभिचारसंशये तस्य व्यभिचारसंशयस्य निरासाय कश्चन तर्कः प्रदर्शनीयो भवति। किन्तु वह्निमान् धूमादित्यत्र धूमोऽस्तु वह्निर्मास्तु इति व्यभिचारशङ्कायां सत्यां मणिकृता प्रदर्शितः तर्कः **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्तर्हि नोत्पन्नः स्यादि"**ति। अयं तर्कश्च न वह्निधूमव्याप्तिग्रहोपयोगी। किन्तु धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादिति तर्कस्यैव वह्निधूमव्याप्तिग्रहोपयोगित्वम्। इदानीं शङ्का जायते यत्किमर्थं तत्त्वचिन्तामणिकृता अयम् अनुपयुक्तः तर्कः प्रदर्शितः इति।

**<u>समाधानप्रदर्शनम्</u> -** उक्तायाः शङ्काया दूरीकरणार्थमुच्यते यद् 'धूमो वह्निव्याप्य' इत्याकारकव्याप्तिग्रहे 'धूमो वह्निव्यभिचारी वा न वे'ति संशयः प्रतिबन्धकः। तस्य च

व्याप्तिप्रतिबन्धकीभूतव्यभिचारसंशयस्य निरासो 'धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादि'त्यनेन तर्केण भवति। तथा च, 'धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादि'त्यस्य तर्कस्यैव तादृशव्यभिचारसंशयानुत्पादद्वारा वह्निधूमव्याप्ति-ग्राहकत्वम्। तादृशतर्कं प्रति वह्निजन्यत्वाभावाभाववह्निजन्यत्वरूपापाद्यव्यतिरेकनिश्चयः हेतुः। अत्र कारणं हि बाधनिश्चयः तर्कं प्रति हेतुर्भवति। तादृशञ्च वह्निजन्यत्वनिश्चयं प्रति स्वतन्त्रतया संशयसामग्रीसम्पादकतया वा 'धूमो वह्निजन्यो न वे'त्यादिसंशयः प्रतिबन्धकः। निरुक्तसंशयं प्रति तु **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्तर्हि नोत्पन्नः स्यादि"**ति मूलोक्ततर्कस्य वह्निजन्यत्वनिश्चयं सम्पाद्य प्रतिबन्धकत्वम्। तथा च निरुक्ततर्केण वह्निजन्यत्वनिश्चयः, तादृशनिश्चयात् 'धूमो वह्निजन्यो न वा' इत्याकारक-शङ्काया निरासः। तादृशशङ्कानुत्पादात् पूर्वोक्तवह्निजन्यत्वनिश्चयरूपापाद्यव्यतिरेकनिश्चयेन धूमो यदि वह्निव्यभिचारी स्यादित्यादितर्कोत्पादः तादृशतर्केण व्यभिचारशङ्कानिवृत्तिस्ततो निरङ्कुशेन वह्निधूमव्याप्तिग्रहस्योत्पत्तिरिति मूलोक्ततर्कस्य परम्परया वह्निधूमव्याप्तिग्रहोप-योगित्वं सिद्धमिति मथुरानाथनयः। तथा च, मथुरानाथेन निरुक्तम् – **"ननु नायं वह्निधूमव्याप्तिग्रहोपयोगी वह्निव्यभिचारित्वापादककतर्कस्यैव तथात्वात्। न चातथात्वेऽपि क्षतिविरह इति वाच्यम्। तादृशवह्निधूमव्याप्तिग्राहकतर्क एव अनवस्थाप्रदर्शनादिति चेत् न। तस्यापि परम्परया वह्निधूमव्याप्तिग्रहोपयोगित्वात्, तथाहि धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादिति वह्निधूमव्याप्तिग्राहकस्तर्कस्तत्र च वह्निजन्यत्वरूपापाद्य-व्यतिरेकनिश्चयः हेतुः बाधबुद्धेस्तार्किकबुद्धौ हेतुत्वात् तस्मिंश्चान्वयव्यतिरेकाभ्यां प्रत्यक्षतो**

**वह्निजन्यत्वनिर्णये वह्निजन्यत्वशङ्का विरोधिनी संशयसामग्रीसम्पादकत्वात् तच्छङ्काविरोधी चायं तर्क इति।”[11] इति।**

## ४.२.२. चिन्तामणिग्रथिततर्कस्य अन्योन्याभावघटिततया निरूपणम्

तत्त्वचिन्तामणौ **“धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादि”**ति तर्कः प्रदर्शितः। यद्यपि चिन्तामणिग्रथितः तर्कः अत्यन्ताभावघटितः तथापि मथुरानाथेन तु अन्योन्याभावत्वेन उक्तस्तर्को व्याख्यातः। तेन मथुरानाथमते मण्युक्तस्य तर्कस्याकारः - धूमो यदि वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहित-जन्यभिन्नत्ववान् स्यात् उत्पन्नत्वाभाववान् स्यात् इति। ताथाहि माथुर्यां मथुरानाथेनागादि – **“धूम इति धूमो यदि वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्यभिन्नत्ववान् स्यात् उत्पन्नत्वाभाववान् स्यादित्यर्थः, विशिष्टान्तं द्वितीयभिन्नत्वविशेषणम्।”**[12] इति।

## ४.२.३. मण्युक्ततर्कशरीरस्थाभावपदेन अन्योन्याभावग्रहणप्रयोजननिरूपणम्

ननु वह्न्यसमवहितजन्यत्वाभावविशिष्टवह्निसमवहितजन्यत्वाभावस्यैवापादकत्व-सम्भवे उभयत्र भेदपदोपादानं किमर्थमिति जिज्ञासायामुपच्यते यद् अत्यन्ताभावस्य अव्याप्यवृत्तित्वमिति कश्चन पक्षो वर्तते। एवम् अत्यन्ताभावस्याव्याप्यवृत्तित्वपक्षे

[11] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 219-220

[12] तत्रैव पृ 219

वह्निशून्यताकालीनवह्निमद्देशोत्पन्नघटादौ व्यभिचारापत्तिः भवति तादृशघटानधिकरण-देशावच्छेदेन वह्न्यसमवहितजन्यत्वाभावस्य तत्र सत्त्वेन आपादकस्य सत्त्वात्। तस्मात् प्रथमभेदपदोपादानम्। यद्यपि अत्यन्ताभावस्य अव्याप्यवृत्तित्वं तथापि भेदस्तु नाव्याप्यवृत्तिः। तेन वह्निशून्यताकालीनवह्निमद्देशोत्पन्नघटादौ वह्न्यसमवहितजन्यत्वाभावे सत्यपि वह्न्यसमवहितजन्यभेदस्तु न भवति। एवं प्रथमभेदपदोपादाने न व्यभिचारापत्तिः।

यदि तर्कशरीरे द्वितीयभेदपदोपादानं क्रियते तदा वह्न्यसमवहितजन्य-भिन्नेऽप्यालोकादौ वह्निसमवहितजन्यत्वाभावस्य आलोकानधिकरणावच्छेदेन सत्त्वेन मूल-शैथिल्यापत्तिः। तस्मात् भेदोपादानम्। तथाहि वामाचरणतर्कवागीशैः माथुर्याष्टीकायाम् उक्तम् – **“वह्न्यसमवहितजन्यो यो यः तत्तद्व्यक्तित्वावच्छिन्नभेदकूटविशिष्टस्य वह्नि-समवहितजन्यो यो यः तत्तद्व्यक्तित्वावच्छिन्नभेदकूटस्य आपादकत्वसम्भवेन पूर्वोक्तदोषाणां नावकाशः।”**[13] इति।

## ४.२.४. अव्याप्यवृत्तित्वस्वरूपनिरूपणम्

ननु किं नाम अव्याप्यवृत्तित्वम् इति जिज्ञासायामुच्यते यत् स्वात्यन्ताभावसामानाधिकरण्यम् अव्याप्यवृत्तित्वम् इति।[14] तादृशं च संयोगतदभावयोः सम्भवति। संयोगतदभावयोः अव्याप्यवृत्तित्वं तु सर्वनैयायिकसम्मतम्। किन्तु तद्विहाय

[13] तत्त्वचिन्तामणौ, वामाचरणभट्टाचार्यसम्पादिते, पृ 4

[14] तर्कसंग्रहदीपिकायां संयोगलक्षणम्

अन्येषामव्याप्यवृत्तित्वं तु युक्तिसाध्यम्। यथा शब्दाभावस्य, ज्ञानाभावस्य च। शब्दः ज्ञानञ्च अव्याप्यवृत्ती। तथा च विश्वनाथपञ्चाननेन निरुक्तम् - **"आकाशस्य विशेषगुणः शब्दः, स च अव्याप्यवृत्तिः, यदा किञ्चिदवच्छेदेन शब्द उत्पद्यते तदान्यावच्छेदेन तदभावस्यापि सत्त्वात्। एवं ज्ञानादिकमपि। ज्ञानादिकं यदात्मनि विभौ शरीरावच्छेदेनोत्पद्यते, तदा घटावच्छेदेन तदभावोऽस्त्येवेति।"**[15] तस्मात् तत्प्रतियोगिका-भावोऽपि संयोगाभाववत् अव्याप्यवृत्तिरिति स्वीकर्तुं शक्यते। एवञ्च, संयोगेन वृत्तिमत्पदार्थानां घटपटादीनामव्याप्यवृत्तित्वं युक्तिसाध्यम्। तथा च युक्तिः **"इह पर्वते नितम्बे हुताशनो न शिखरे इति प्रतीतेः संयोगेन द्रव्यस्यापि अव्याप्यवृत्तित्वात्, वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतो व्याप्यवृत्तित्वस्य अत्यन्तमसम्भावितत्वात्"**[16] इति। सम्बन्धि-सत्तायाः सम्बन्धाधीनत्वात् यदवच्छेदेन सम्बन्धो नास्ति, तदवच्छेदेन तत्सम्बन्धावच्छिन्न-तदभावस्य सत्त्वस्य आवश्यकत्वादिति तदाशयः। अतः संयोगेन वृत्तिमत्पदार्थप्रतियोगिका-भावोऽपि अव्याप्यवृत्तिरिति स्वीकर्तुं शक्यते। किञ्च, पञ्चलक्षण्या दीधितिग्रन्थे दृश्यते यद् वासुदेवसार्वभौमाः सामानाधिकरण्यस्यापि अव्याप्यवृत्तित्वं स्वीकुर्वन्ति। सा च युक्तिः सत्तायां द्रव्ये द्रव्यत्वसामानाधिकरण्यं, सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यम् इति प्रतीतिरेव। अनूदितं च तन्मतं रघुनाथशिरोमणिना **"व्यभिचारिणस्तु व्यभिचार-**

---

[15] न्यायसिद्धान्तमुक्तावल्याम्, पृ 97

[16] सिद्धान्तलक्षणदीधितौ, पृ 35

**निरूपकाधिकरण एव तादृशि तादृशाभाववत्त्वम्, सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतेः"**[17] इति।

**मथुरानाथमतसमीक्षणम्** - इदानीं प्रश्नो जायते यद् यदि जन्यत्वाभावस्यापि अव्याप्यवृत्तित्वं प्रतिपिपादयिषितं तदा जन्यत्वाभावप्रतियोगिनो जन्यत्वस्य अव्याप्यवृत्तित्वं निरूपणीयम्। तथा सति अव्याप्यवृत्तिप्रतियोगिकाभावोऽपि अव्याप्यवृत्तिः भवतीति नियमाद् वह्न्यसमवहितजन्यत्वाभावस्य अव्याप्यवृत्तित्वमिति निर्णेतुं शक्यते। ननु जन्यत्वस्य अव्याप्यवृत्तित्वे का युक्तिरिति शङ्काया यदि उच्यते यद् सत्तायां गुणेन द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिवत् वह्निशून्यताकालीनवह्निमद्देशोत्पन्नस्य घटस्य अनधिकरणदेशे घटे नास्ति वह्न्यसमवहितजन्यत्वमिति प्रतीतिः प्रमाणमिति तदा सर्वेषामपि पदार्थानां तादृशप्रतीतिबलादव्याप्यवृत्तित्वापत्तौ व्याप्यवृत्तिः कश्चन नावशिष्येत। अतः अत्र वयं ब्रूमो यद् अत्यन्ताभावघटकतर्कं विहाय अन्योन्याभावघटकतर्कानुसरणे बीजं किमिति विभावनीयं सुधीभिः।

### ४.२.५. तर्कघटकदलानां सार्थक्यम्

**अ. मण्युक्ततर्कशरीरस्य विशेषणदलसार्थक्यनिरूपणम्** - तत्त्वचिन्तामणौ **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादि"**ति तर्कः प्रदर्शितः। तत्र च तर्कशरीरे वह्न्यसमवहितजन्यभिन्नत्वरूपसत्यन्तार्थस्यानुपादाने केवल-

---

[17] पञ्चलक्षणदीधितौ, पृ 198

वह्निसमवहितजन्यभिन्नत्वस्य आपादकत्वे वह्निशून्यतादशायां वह्निमति देशे समुत्पन्ने घटविशेषे व्यभिचारः स्यात्। तत्र वह्निसमवहितजन्यभिन्नत्वरूपापादकस्य सत्त्वेन तत्रोत्पन्नत्वाभावरूपापाद्यस्य विरहेण व्यभिचारापत्तिः। तस्याश्च व्यभिचारापत्तेर्वारणाय तर्कशरीरे सत्यन्तदलमुपात्तम्। तदुपादाने तु तत्र न व्यभिचारः। तथाहि वह्न्यसमवहित-जन्यत्वस्यैव तादृशघटविशेषे सत्त्वेन वह्न्यसमवहितजन्यभिन्नत्वरूपस्य विशेषणस्याभावात् वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्यभिन्नत्वरूपस्य विशिष्टस्यापादकस्यापि विरहात्। अतः तादृशे घटविशेषे आपाद्याभावेऽपि (उत्पन्नत्वे सत्यपीत्यर्थः) न व्यभिचारः।

**<u>सत्यन्तदलस्य भेदस्योत भेदीयप्रतियोगिनो विशेषणमिति विचारः</u> -** ननु वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तदलं कस्य विशेषणम् इति शङ्का जायते। तत्र यदि द्वितीयदलस्य वह्निसमवहितजन्यभिन्नत्वस्य विशेषणं तदा विशेष्ये विशेषणवैशिष्ट्यं स्वरूपसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन वक्तव्यम्। यत्र वस्तुनि स्वरूपेण वह्न्यसमवहितजन्यभेदो वर्तते तत्रैव वह्निसमवहितजन्यभेदोऽपि स्वरूपेणेति सामानाधिकरण्यसम्बन्धेन विशेषणविशिष्टं विशेष्यमिति वक्तव्यम्। सामानाधिकरण्यस्य च स्वरूपसम्बन्धद्वयघटितत्वेन गौरवम्। तदपेक्षया यदि द्वितीयभेदप्रतियोगिनि वह्निसमवहितजन्ये वस्तुनि यदि विशेषणं चेत् तदा स्वरूपसम्बन्धेनैव वैशिष्ट्यं वक्तव्यं भवतीति लाघवमस्तीति तत्रैव विशेषणमस्तु इति।

यदि द्वितीयभेदप्रतियोगिनि वह्निसमवहितजन्ये विशेषणं वह्न्यसमवहित-जन्यभिन्नत्वं विशेषणम् इति स्वीक्रियते तदा यत्प्रयोजनमुद्दिश्य तद्विशेषणमुपात्तं तदेव न सिद्ध्येत्। तथा हि वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटविशेषे व्यभिचारवारणाय हि तदुपात्तम्। तत् यदि द्वितीयभेदप्रतियोगिनि विशेषणं स्यात्तदा तत्रैव व्यभिचारापत्तिः। वह्न्यसमवहितजन्यभिन्नत्वविशिष्टं यत् वह्निसमवहितजन्यं तद्भिन्नत्वस्य आपादकत्वे वह्न्यसमवहितजन्यनिरुक्तघटभिन्नं यत् वह्निनान्तरीयकं घटादिकं तद्भिन्नत्वरूपापादकस्य निरुक्तघटविशेषे सत्वेन तत्र उत्पन्नत्वाभावरूपापाद्यस्य विरहात् तत्र व्यभिचारः। अतो वह्न्यसमवहितजन्यभिन्नत्वं सामानाधिकरण्यसम्बन्धेन वह्निसमवहितजन्यभिन्नत्वस्यैव विशेषणम्। तथा सति सामानाधिकरण्यसम्बन्धेन वह्न्यसमवहितजन्यभिन्नत्वविशिष्टं यत् वह्निसमवहितजन्यभिन्नत्वं अजन्ये वस्तुनि आकाशादौ प्रसिद्धं तत्र उत्पन्नत्वाभावरूपस्य आपाद्यस्यापि सत्त्वात् न व्यभिचारः। तथाहि माथुरी – **"विशिष्टान्तं द्वितीयभिन्नत्वविशेषम्, तत्प्रतियोगिविशेषणत्वे तद्दोषतादवस्थ्यात्।"**[18] इति

**<u>वह्न्यसमवहितजन्यत्वस्वरूपविचारः</u>** - ननु वह्न्यसमवहितजन्यत्वं नाम किम्? यदि वह्न्यभाववद्देशोत्पत्तिकान्यत्वं तदा पूर्वोक्ते वह्निशून्यताकालीनवह्निमद्देशोत्पन्नघटे एव व्यभिचारः। यतः तस्य वह्निसमानाधिकरणत्वात्, वह्न्यभाववद्देशोत्पतिकत्वाभावात्, वह्न्यभाववद्देशोत्पत्तिकान्यत्वरूपस्य सत्यन्तार्थस्य विशेषणस्य, वह्निसमवहितजन्य-

[18] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 220

भिन्नत्वस्य विशेष्यस्य च सत्त्वात् तादृशघटे आपादकं वर्तते। किन्तु उत्पन्नत्वाभाव-रूपापाद्यस्य अभावात् व्यभिचारः। तस्मात् वह्न्यसमवहिताजन्यत्वं नाम वह्निं विना अनुत्पद्यमानत्वमिति वक्तव्यम्। तथा च वह्निं विना उत्पद्यमानत्वस्यैव तस्मिन् घटे सत्त्वेन तदन्यत्वरूपस्य वह्न्यसमवहिताजन्यत्वस्य विशेषणस्य अभावात् विशिष्टस्य आपादकस्य असत्त्वम्। तस्मान्न व्यभिचारः। स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकं यद्यत्तदन्यत्वमिति तस्य निष्कर्षः। स्वम् अन्यत्वप्रतियोगिपरम्। तथा च निरुक्तघट-विशेषस्यापि स्वपदेन ग्रहणं संभवति। तदव्यवहितपूर्वक्षणस्य तादृशघटसमानाधिकरण-वह्निमदन्यत्वादिति तादृशस्वात्मकघटादिभेदस्य स्वस्मिन् विरहेण विशेषणदलस्य तादृशघटादौ असत्त्वान्न व्यभिचारः। तथाहि माथुर्यामुक्तम् – **"वह्निं विनानुत्पद्यमानत्वं तदर्थः, स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकं यद्यत्तदन्यत्वमिति तु निष्कर्षः, स्वपदमन्यत्वप्रतियोगिपरम्, अन्यथा इदानीन्तनघटादेः सामग्रीविशेषणीयत्वात्**।"[19] इति।

**<u>आ. विशेष्यदलसार्थक्यम्</u> -** तर्कशरीरस्थस्य विशेष्यदलस्य सार्थक्यं निरूप्य इदानीं वह्निसमवहितजन्यभिन्नत्वरूपविशेष्यदलस्य सार्थक्यं प्रदर्श्यते। तथाहि यदि वह्निसमवहित-जन्यभिन्नत्वरूपविशेष्यदलं न निवेश्यते तदा स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहित-पूर्वक्षणकं यद्यत् स्वं ततदन्यत्वरूपस्य केवलवह्न्यसमवहिताजन्यत्वस्य आपादकत्वं स्यात्। तथा सति वह्निजन्यालोकादौ व्यभिचारो भवति। तथाहि वह्निजन्यालोकादौ

[19] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 222-223

स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकं यत्तादृशवह्निमद्देशोत्पन्नघटादिकं तदन्यत्वम् आपादकं वर्तते, किन्तु तत्रोत्पन्नत्वाभावरूपापाद्यं न वर्तते। विशेष्यदलोक्तौ तु न वह्निजन्यालोकादौ व्यभिचारः। यतो हि आलोकादौ वह्निसमवहितजन्यत्वस्यैव सत्त्वेन तद्भिन्नत्वविरहेण विशिष्टापादकस्याभाव आयाति।

**<u>वह्निसमवहितजन्यत्वस्वरूपनिरूपणम्</u>** - ननु वह्निसमवहितजन्यत्वं यदि वह्निकालीनसामग्रीजन्यत्वं तदा जन्यमात्रस्यैव सामग्रीक्षणे देशान्तरे यत्र कुत्रचित् वह्निसत्त्वेन वह्निकालीनसामग्रीजन्यतया धूमादावपि वह्निकालीनसामग्रीजन्यत्वनिश्चय-सम्भवात् तर्कवैफल्यं स्यात्। विशेष्याभावमात्रस्य धूमादौ निश्चयार्थमेव निरुक्ततर्कस्य आवश्यकत्वात्। न वह्निसमवहितजन्यत्वं वह्निकालीनसामग्रीजन्यत्वं, किन्तु स्वसमानाधिकरणवह्निमत्स्वाव्यवहितपूर्वक्षणकत्वम्। स्वं जन्यत्वेन अभिमतम्। तादृश-जन्यव्यक्तिरूपस्वसमानाधिकरणो यो वह्निः तद्वत् स्वाव्यवहितपूर्वक्षणं यस्य स्वस्य तादृशं स्वं वह्निसमवहितजन्यं तद्भिन्नत्वमेव विशेष्यदलपर्यवसितम्। तथा च, धूमो यदि स्वसमानाधिकरणवह्निमत्स्वाव्यवहितपूर्वक्षणकान्यत्ववान् स्यात् तदोत्पन्नत्वाभाववान् स्यादित्येव तर्कशरीरं सिद्धं भवति।

## ४.२.६. यज्ञपत्युपाध्यायमतोपस्थापनं तद्दूषणञ्च

ननु तर्केण धूमे आपाद्याभावेन आपादकाभावः साध्यते। तथा च, अत्र धूमः पक्षः, आपादकाभावः साध्यः, आपाद्याभावः हेतुः। एवं च 'धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यात्' इत्यादौ सर्वत्र तर्के पक्षतावच्छेदकधूमत्वादिविशिष्टे आपाद्याभावेन वह्निजन्यत्वाभावाभावेन वह्निजन्यत्वादिना वह्निव्यभिचारित्वाभावाद्यनुमितौ नियमतो वह्निव्यभिचारित्वाभावत्वाद्यवच्छिन्नस्यैव विधेयतया तदवच्छिन्नकोटिकसंशयं 'धूमो वह्निव्यभिचारी न वे'त्याकारकं प्रत्येव पूर्वोक्ततर्कादेः प्रतिबन्धकत्वमिति नियमः। किन्तु मण्युक्ततर्कशरीरे एतादृशनियमो न सङ्गच्छते। तथाहि उत्पन्नत्वाभावाभावेन आपाद्याभावेन उत्पन्नत्वेन वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्य-भिन्नत्वाभावरूपस्य आपादकाभावस्य अनुमितौ वह्निजन्यभिन्नत्वावच्छिन्नस्य विधेयत्वम् असम्भवमिति विशिष्टाभावत्वावच्छिन्नस्यैव तत्र विधेयतया 'धूमो वह्निजन्यभिन्नत्वाभाववान् न वे'त्याकारकशङ्काप्रतिबन्धकत्वमुक्ततर्कस्य न सम्भवति। निरुक्ततर्कस्तु वह्निजन्य-भिन्नत्वाभाववान् न वेत्याकारकशङ्काप्रतिबन्धार्थमेव आदरणीयः। अन्यथा पूर्वोक्तरीत्या, निरुक्ततर्केण वह्निजन्यत्वानिश्चये धूमो वह्निव्यभिचारी स्यादित्यादितर्कानुत्थितौ वह्निधूम-व्याप्तिग्रहासम्भवेन मूलोक्ततर्कस्य तादृशव्याप्तिग्रहोपयोगित्वमेव न स्याद् इति शङ्का जायते।

अस्याः शङ्कायाः निराकरणार्थमुच्यते यद् विशिष्टाभावो हि विशेष्याभावात् विशेषणाभावाच्च अनतिरिक्तः। तस्मात् वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहित-

जन्यभिन्नत्वाभावः विशेष्याभावात् अर्थात् वह्निसमवहितजन्यभिन्नत्वाभावाद् अनतिरिक्तः। एवं च आपाद्याभावेन आपादकाभावस्य सिद्धौ केवलं विशेष्याभावः सिद्ध्यति। विशिष्टाभावानतिरेकात्। तथा च विशेष्याभावस्य वह्निजन्यभिन्नत्वाभावस्य सिद्धौ धूमो वह्निजन्यो न वेत्याकारकं संशयं प्रति मूलोक्ततर्कस्य प्रतिबन्धकत्वमक्षतम्।

पुनराशङ्क्यते यद् आपाद्याभावेन आपादकाभावस्य विशिष्टाभावस्य अनुमानात् पूर्वं धूमो वह्न्यसमवहितजन्यभिन्न इत्याकारकनिश्चयसत्त्वस्य प्रमाणासिद्धत्वात् अनावश्यकत्वाच्च विशिष्टाभावत्वेनैव अनुमितौ सत्यां न वह्निजन्यो न वेति संशयप्रतिबन्धकत्वम् उक्ततर्कस्य संभवति। आपाद्याभावेन केवलवह्निजन्यत्वत्वेन अनुमित्यनुदयात्। तस्मात् का गतिरिति चेत्, अत्र यज्ञपत्युपाध्यायाः **"वह्न्यसमवहिताजन्य इति धूमविशेषणमिहाभिमतम् ... पक्षविशेषणग्रहपरिपन्थित्वादाशङ्क्य निराकृतमित्यवधेयम्।"**[20] इति कथयन्ति। यद्यपीयं पङ्क्तिः एतत्सन्दर्भे न लिखिता। प्रसङ्गान्तरे हि सा पङ्क्तिः रचिता। तथापि प्रकृतोपयोगितया मथुरानाथेन व्याख्यातमिति भाति। अन्यथा यज्ञपत्युपाध्यायविरचिते व्याख्याने तु कुत्रापि एतत्सन्दर्भे तथाविधलेखनं नोपलभ्यते। तर्कप्रकरणातिरिक्ते प्रकरणे अस्ति वेति तु अन्वेषणीयम्। तच्च मतमिह माथुर्या सम्प्रदायविद इत्यनेन अनूदितम्। तथा च, **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात् तर्हि नोत्पन्नः स्यादि"**ति तर्केण आपाद्याभावेन आपादकाभावस्य धूमे साधनात् धूमः पक्ष, आपाद्याभावः हेतुः आपादकाभावः साध्यः इति व्यवह्रियते इति पूर्वमेवाभिहितम्। तस्मात् अत्र

[20] तत्त्वचिन्तामणिप्रभायां, यज्ञपत्युपाध्यायविरचितायां, पृ 43

पक्षीभूतधूमः वह्न्यसमवहिताजन्य इत्यनेन विशेष्यते। एवञ्च वहन्यसमवहिताजन्यो धूमो यदि वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्यभिन्नत्ववान् स्यात्तर्हि उत्पन्नत्वा-भाववान् स्यात् इत्येवं तर्काकारः फलतीति यज्ञपतिमताशयः। तथा सति आपाद्याभावेन तादृशविशेषणविशिष्टे धूमे आपादकाभावानुमितेः पूर्वं पक्षतावच्छेदकविशेषण-विशिष्टधूमत्वावच्छिन्नं ज्ञानमावश्यकम्। अनुमितौ विशिष्टपक्षज्ञानस्य हेतुत्वात्। एवञ्च धूमे वह्न्यसमवहिताजन्यत्वनिश्चयस्य विपर्ययानुमानात् पूर्वं नियमतः सत्त्वे तस्यैव विशेषणाभावरूपवह्न्यसमवहितजन्यभिन्नत्वाभावसिद्धौ प्रतिबन्धकतया तात्पर्यात् विशेष्याभावात्मकवह्निजन्यभिन्नत्वाभावरूपवह्निजन्यत्वमात्रेण आपाद्याभावेन हेतुना अनुमितेः सम्भवात् निरुक्तमूलोक्ततर्केण वह्निजन्यत्वाभावकोटिकशङ्कायाः प्रतिबन्ध इति तेषां यज्ञपत्युपाध्यायप्रभृतीनामाशयः।

**<u>यज्ञपतिमतखण्डनम्</u>** - मथुरानाथेनेत्थं यज्ञपतिमतमनूद्य तत् खण्डितम्। तथाहि धूमे वह्न्यसमवहितजन्यभिन्नत्वस्य विशेषणत्वे आपाद्याभावेन विशिष्टाभावसिद्धौ विशेषणाभावस्य वह्न्यसमवहितजन्यभिन्नत्वाभावस्य निरुक्तविशेषणवत्तानिश्चयरूपात् बाधसहकाराद् असिद्धावपि विशेष्याभावस्य वह्निसमवहितजन्यभिन्नत्वाभावस्य वह्निसमवहितजन्यत्वस्य तादृशापाद्याभावेन अवश्यं सिद्धौ 'धूमो वह्निजन्यो न वे'त्याकारकसंशयप्रतिबन्धकत्वमुक्ततर्कस्य न सम्भवति। विशेष्याभावस्य वह्निजन्यत्वाति-रिक्तत्वात्। निरुक्ततर्कस्य वह्निजन्यत्वसंशयाप्रतिबन्धकत्वे च 'धूमो यदि वह्निव्यभिचारी

स्याद् वह्निजन्यो न स्यादि'त्यादिवह्निधूमव्याप्तिग्रहोपयोगितर्कोत्पाद एव न स्यात्, वह्निजन्यत्वसंशयस्य निरुक्ततर्ककारणवह्निजन्यत्वनिश्चयविघटकत्वात्।

**<u>यज्ञपतिमतस्वीकारे घटस्य वह्निजन्यत्वापत्तिप्रदर्शनम्</u>** - ननु वह्निसमवहित-जन्यत्वमेव वह्निजन्यत्वम्। तथा च वह्निसमवहितजन्यत्वसिद्धिमात्रेणैव वह्निजन्यत्वशङ्का-प्रतिबन्धकत्वमुक्ततर्कस्य सम्भवति इति वाच्यम्। स्वसमानाधिकरण-वह्निमत्स्वाव्यवहितपूर्वक्षणकरूपस्य वह्निसमवहितजन्यत्वस्य, वह्निजन्यत्वस्य च अत्यन्तं भेदात्। तथा च वह्निसमवहितजन्यत्वं यदि वह्निजन्यत्वस्वरूपं स्यात् तदा वह्निनान्तरीयकघटादेरपि वह्निजन्यत्वापतिः। तस्मात् वह्निसमवहितजन्यत्वं वह्निजन्यत्वाति-रिक्तमेव। अतो न दोषपरिहारः।

**<u>यज्ञपतिमतस्वीकारे मूलोक्ततर्कवैफल्यप्रदर्शनम्</u>** - ननु 'धूमो यदि वह्निव्यभिचारी स्यात्तदा वह्निसमवहितजन्यो न स्यादि'त्येवं तर्को वह्निधूमव्याप्तिग्रहोपयोगीति वक्तव्यम्। तादृशतर्के च वह्निसमवहितजन्यत्वनिश्चय आपाद्यव्यतिरेकनिश्चयविधया हेतुः तादृशनिश्चय-विघटकश्च धूमो वह्निसमवहितजन्यो न वेत्याकारकसंशयः। तत्प्रतिबन्धार्थमेव मूलोक्ततर्कानुसरणं वाच्यम्। उत्पन्नत्वरूपापाद्याभावेन यदि विशेषणाभावबाधनिश्चय-सहकाराद्विशेष्याभावस्य वह्निसमवहितसिद्धिः तदा निरुक्ततर्कस्यापि वह्निसमवहितजन्यो न वेति जन्यत्वमात्रस्य संशयप्रतिबन्धकत्वं संभवत्येवेति वाच्यम्। धूमे यदि मूलोक्ततर्कात्

पूर्वमेव यथोक्तवह्निसमवहितजन्यत्वनिश्चयो भवति तदा तादृशनिश्चयप्रतिबन्धकसंशय-निवृत्त्यर्थं मूलोक्ततर्कानुसरणं विफलमेव स्यात्।

**<u>यज्ञपतिमतस्वीकारे वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य संशयप्रतिबन्धकत्व-हानिप्रदर्शनम्</u> -** ननु धूमे तर्कात् पूर्वं वह्निसमवहितजन्यत्वनिश्चयो भवतीत्यत्र किं प्रमाणमिति वाच्यम्। धूमे तर्कात् पूर्व वह्निसमवहितजन्यत्वनिश्चयासत्त्वे वह्न्यन्वय-व्यतिरेकानुविधायित्वनिश्चयस्य सत्यन्तदलसंशयप्रतिबन्धकत्वं मूलकृदुक्तम् असङ्गच्छेत्। अतो यज्ञपत्युपाध्यायमतमयुक्तमिति मथुरानयः।

### ४.२.७.रघुनाथशिरोमणेः मतानुवादः

रघुनाथशिरोमणिना दीधितिव्याख्यायाम् उक्तं **“वस्तुतो वह्न्यजन्यमपि वह्निसमवहितजन्यं च वह्न्यसमवहिताजन्यं संभवतीति वह्निजन्यत्वपर्यवसितं वह्निसमवहित-जन्यत्वम् वाच्यम्। तथा च घटादौ व्यभिचारवारणाय आपाद्यकोटिप्रतियोगिविशेषणं सत्यन्तमिति।”**[21] इति। एतच्च मतं नव्यास्त्वित्यादिना अनूदितं मथुरानाथेन। तथाहि वह्निसमवहिताजन्यः इत्यत्र वह्निसमवहितजन्यत्वं वह्निजन्यत्वमेव वक्तव्यम्। सत्यन्तं चापाद्यकोटिप्रतियोगिविशेषणं वक्तव्यम्। तथा च रघुनाथमते मण्युक्ततर्कशरीरस्य आकारो

---

[21] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 584

भवति - "धूमो यदि वह्निजन्यत्वाभाववान् स्यात् वह्न्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वाभाववान् स्यात्" इति।

**<u>मण्युक्ततर्कशरीररस्थसत्यन्तदलसार्थक्यप्रदर्शनम्</u>** – आपाद्यप्रतियोग्युत्पन्नत्वे वह्न्यसमवहिताजन्यत्वस्याविशेषणत्वे वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटादौ व्यभिचारः। तादृशघटादौ वह्निजन्यत्वाभावस्य आपादकस्य सत्वेन तत्रापाद्यस्य उत्पन्नत्वाभावस्य विरहात्। तादृशोत्पन्नत्वे वहन्यसमवहिताजन्यत्वस्य विशेषणत्वे न तादृशघटादौ व्यभिचारः। वह्निजन्यत्वाभावस्य उत्पन्नत्वस्य अभावरूपापाद्यस्यापि तत्र सत्वात्।

ननूत्पन्नत्वाभावरूपापाद्यस्यैव आपादकस्य सत्त्वेऽपि वह्न्यसमवहिताजन्यत्वरूपविशेषणाभावेन तादृशविशेषणविशिष्टस्य विशेषणमस्तु। किमापाद्यप्रतियोग्युत्पन्नत्वे तस्य वह्न्यसमवहिताजन्यत्वरूपं विशेषणत्वेनेति चेदुच्यते यद् उत्पन्नत्वाभावविशेषणत्वे वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटादौ व्यभिचारः। स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वरूपवहन्यसमवहिताजन्यत्वेन विशेषणेन विशिष्टस्य उत्पन्नत्वाभावस्य नित्यवस्तुनिष्ठस्य तादृशघटादौ असत्वात् व्यभिचारः। अतः उत्पन्नत्वविशेषणमेव तादृशं वहन्यसमवहिताजन्यत्वं, तथा सति विशेषणाभावेन विशिष्टोत्पन्नत्वस्य अभावस्यापि तादृशघटादौ सत्त्वान्न व्यभिचारः। तथाहि माथुर्यामुक्तम् – **"अत्र घटादौ मूलशैथिल्य-**

**वारणायापाद्ये विशिष्टान्तं प्रतियोगिविशेषणम्, न त्वभावविशेषणं घटादौ मूलशैथिल्यतादवस्थ्यापत्तेः ।”**[22] इति ।

**<u>वह्न्यसमवहिताजन्यत्वस्वरूपनिरूपणम्</u>** – मथुरानाथमते दीधितिसम्मतं वह्न्यसमवहिताजन्यत्वं नाम स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वम् इति। न तु वह्निमद्भिन्नदेशोत्पत्तिकान्यत्वरूपं वह्न्यसमवहिताजन्यत्वं तु अत्र न ग्राह्यम्। वह्निमद्भिन्नदेशोत्पत्तिकान्यत्वरूपस्य वह्न्यसमवहिताजन्यत्वस्य अत्र ग्रहणे वह्निमति वह्नेः पूर्वमुत्पन्ने रासभादौ व्यभिचारापत्तिः स्यात्। तथा हि वह्निजन्यत्वाभावरूपापादकवति वह्नेः पूर्वमुत्पन्ने रासभादौ वह्निमद्भिन्नदेशोत्पत्तिकान्यत्वस्य सत्यन्तार्थस्य उत्पन्नत्वस्य च सत्त्वेन तादृशविशिष्टोत्पन्नत्वाभावरूपापाद्यविरहात् व्यभिचारः स्यात्। स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वस्य सत्यन्तार्थत्वे तु व्यभिचारो न भवति। निरुक्तसत्यन्तार्थस्य तादृशरासभादौ विरहेण तद्विशिष्टोत्पन्नत्वाभावस्य च सत्त्वात्। वह्न्युत्तरमुत्पन्ने रासभादौ स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वस्य उत्पन्नत्वस्य च सत्त्वेन सत्यन्तस्य निरुक्तार्थकत्वेपि तत्र व्यभिचारवारणं न संभवतीति पूर्वमुत्पन्ने रासभादौ व्यभिचारः प्रदर्शितः।

[22] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 224

**<u>मण्युक्ततर्कशरीरस्थविशेष्यदलसार्थक्यनिरूपणम्</u>** - यदि उत्पन्नत्वरूपविशेष्यदलं विहाय स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वाभावमात्रस्य आपाद्यत्वं स्वीक्रियते तदा नित्यगगनादौ व्यभिचारापत्तिः स्यात्। तथाहि वह्निजन्यत्वाभावरूपापादक-वति तत्र स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवहन्यसमवहिता-जन्यत्वस्य एवं सत्त्वेन तदभावस्य तत्र विरहाद् उत्पन्नत्वरूपविशेष्यदलप्रवेशे तु न व्यभिचारः। उत्पन्नत्वरूपविशेष्यदलस्य तत्र विरहेण तादृशगगनादौ विशिष्टोत्पन्नत्वाभाव-रूपापाद्यस्य तत्र सत्त्वात्। नन्वेवमपि वह्निजन्त्वाभावरूपापादकवति वह्निनान्तरीयके घटादौ व्यभिचारः। यथोक्तवहन्यसमवहिताजन्यत्वस्य उत्पन्नत्वस्य च सत्त्वेन तादृशविशिष्टो-त्पन्नत्वाभावरूपापाद्यविरहात्। तस्मात् पारिभाषिकमुत्पन्नत्वमत्र आपाद्यघटकत्वेन विवक्षणीयम् इति मथुरानाथव्याख्या। तथा हि उत्पन्नत्वं नाम वह्न्यसमवहित-वह्नितत्संयोगेतरयावत्कारणाधिकरणक्षणकत्वम्। स्वसमानाधिकरणवह्निमदन्यक्षणवृत्तीनि वहितत्संयोगेतरयावत्त्वविशिष्टकारणानि यस्य स्वस्य एवं भूतं यत्स्वं तत्त्वमेव उत्पन्नत्वमित्यर्थः। वहन्यसमवहिताजन्यत्वविशिष्टस्य तादृशोत्पन्नत्वस्य अभावश्चापाद्यम्। तथा च, न वह्निनान्तरीयकघटे व्यभिचारः। तादृशघटे स्वसमानाधिकरणवह्निमदन्य-स्वाव्यवहितप्रावक्षणकान्यत्वरूपवहन्यसमवहिताजन्यत्वस्य सत्त्वेऽपि तद्विशिष्टस्य स्वसमानाधिकरणवह्निमदन्यवह्नितत्संयोगेतरयावत्कारणाधिकरणक्षणकत्वरूपधूमनिष्ठस्य उत्पन्नत्वस्य विरहेण आपाद्यस्य तादृशनान्तरीयके विद्यमानत्वमिति न व्यभिचारः। वह्न्यसमवहितत्वं यदि तादृशयावत्कारणाधिकरणक्षणकत्वविशेषणं न स्यात् तदा निरुक्तवह्निनान्तरीयके व्यभियारः स्यात्। तत्र वह्निसंयोगेतरयावत्कारणाधिकरणक्षणकत्व-

मात्ररूपोत्पन्नत्वस्य सत्त्वेन तदभावरूपस्य आपाद्यस्य तत्रासत्त्वात्। तथाहि माथुर्यामुक्तम् – **"अजन्ये मूलशैथिल्यवारणाय विशेष्यम्। न च वह्न्यजन्ये वह्निसमवधाननियतोत्पत्तिके घटादिविशेषे मूलशैथिल्यमिति वाच्यम्, उत्पन्नत्वं हि वह्न्यसमवहितवह्नितत्संयोगेतर-यावत्कारणाधिकरणक्षणकत्वं, नान्तरीयके उक्तमूलशैथिल्यवारणाय वह्न्यसमवहितेति क्षणविशेषणं स्वसमानाधिकरणवह्निमदन्यत्वं तदर्थः।"**[23] इति।

### ४.२.८. मण्युक्तशङ्कात्रयस्य तर्कप्रतिबन्धकत्वोपपादनम्

तत्त्वचिन्तामणौ गङ्गेशोपाध्यायेन **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात् नोत्पन्नः स्यादि"**त्येवं तर्कः प्रदर्शितः। तस्य तर्कस्य तत्प्रतिबन्धकत्वेन तिस्रः शङ्काः मूलकृता उपस्थापिताः –

1. किं धूमोऽवह्नेरेव भविष्यति?
2. क्वचिद्वह्निं विनापि भविष्यति?
3. अहेतुक एव वोत्पत्स्यते?" इति।

इत्थं शङ्कात्रयमुत्थाप्य क्रियाव्याघातादेकापि शङ्का न स्वीकार्येति समाधानमुक्तं गङ्गेशोपाध्यायेन। तथाहि चिन्तामणौ उक्तम् – **"किं धूमोऽवह्नेरेव भविष्यति, क्वचिद् वह्निं विनापि भविष्यति, अहेतुक एवोत्पत्स्यत इति शङ्का स्यात्, सर्वत्र स्वक्रियाव्याघातः**

[23] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 225

**स्यात्।**[24] इति। तदनन्तरं तेन दर्शितं यत्र क्रियाव्याघातसम्भावना वर्तते तत्र यदि शङ्का क्रियते कथं क्रियाव्याघातो भवति। तथाहि मणिकृता उक्तम् - **"यदि गृहीतान्वयव्यतिरेकं हेतुं विना कार्योत्पत्तिं शङ्केत तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परप्रतिप्रत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्यात् तेन विनापि तत्सम्भवात्। तस्मात् तत्तदुपादानमेवशङ्काप्रतिबन्धकम्। शङ्कायां न नियतोपादानम्, नियतोपादाने च न शङ्का"**[25] इति।

मथुरानाथेन तिसृणां शङ्कानां कथं मण्युक्ततर्कप्रतिबन्धकत्वमिति स्वीयटीकायां सुस्पष्टं विवृतम्। स्वीयमतमस्मिन् विषये समासेन निरूप्य तत्र चादौ तेन यज्ञपत्युपाध्याय-मतानुसारं शङ्कानां प्रतिबन्धकत्वं निरूपितम्। अथ रघुनाथशिरोमणिमतानुसारं प्रतिबन्धकत्वं विचारितम्। मथुरानाथनये भविष्यति न विद्यते वह्निः यत्र क्षणे तस्मादेव क्षणात् इति अवह्नेरेवेत्यस्य विग्रहवाक्यम्। तथा अवह्नेरेव इति प्रथमशङ्का तु धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणको वा न वेत्याकारिका पर्यवसिता। धूमो च द्वितीयापि शका प्रथमशङ्कातुल्याकारिकैव। किन्तु प्रथमा तु धूमत्वावच्छेदेन द्वितीया तु धूमत्वसामानाधिकरण्येनेति भेदः। अतो न पुनरुक्तिः। तृतीयायाः शङ्कायाः आकारस्तु धूमो निर्हेतुको न वेतीति मथुरानाथनयः। तथाहि मथुरानाथेन उक्तम् – **"अवह्नेरेवेति न विद्यते वह्निर्यत्रेति व्युत्पत्त्या स्वसमानाधिकरणवह्निमद्भिन्नत्वात् क्षणादेवेत्यर्थः, अव्यवहितोत्तरत्वं**

---

[24] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 578

[25] तत्रैव पृ 594

**पञ्चम्यर्थः, क्वचिद्वह्निं विनापीति किं धूमः क्वदिचव्यवहितपूर्वं स्वसमानाधिकरणवह्निं विनापि भविष्यतीत्यर्थः, अहेतुक इति किं धूमो निर्हेतुक एवोत्पत्स्यते इत्यर्थः ।**[26] इति ।

<u>**यज्ञपत्युपाध्यायमतानुसारं शङ्कात्रयप्रतिबन्धकत्वनिरूपणम्**</u> - मथुरानाथेन स्वीयटीकायां यज्ञपत्युपाध्यायमतानुसारं शङ्कात्रयस्य कथं तर्कप्रतिबन्धकत्वमिति विचारितम्। यज्ञपतिमतं टीकायां मथुरानाथेन सम्प्रदायमतत्वेन उपस्थापितम्। तथाहि यज्ञपत्युपाध्यायमते वह्न्यसमवहिताजन्यत्वमिति दलं पक्षविशेषणमिति पूर्वं तन्मतानुवादे निरूपितत्वात् तन्मते आद्यशङ्काद्वयस्य पक्षविशेषणाभावविषयकतया तर्कजनक-परामर्शविघटकत्वेन तर्कविरोधित्वम्। तथा च, आद्यशङ्काद्वयी च स्वसमानाधिकरण-वह्निमदन्यत्वाभावविषयणी, सा तु संशयसामग्रीसम्पादकतया स्वसमानाधिकरण-वह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपेण पक्षतावच्छेदकेन विशिष्टे धूमे आपाद्य-व्याप्यापादकवत्तानिश्चयरूपस्य परामर्शस्य प्रतिबन्धिका, तादृशपरामर्शस्य पक्षता-वच्छेदकविशिष्टपक्षनिश्चयरूपत्वात्। सुतरां तादृशपरामर्शानुत्पादेन तर्क एव कारणाभावान्नोत्पद्यते इति। तथाहि माथुरी – **"आद्यशङ्काद्वयस्य सम्प्रदायमते निरुक्तवह्न्य-समवहिताजन्यत्वरूपपक्षविशेषणाभावविषयकतया तर्कजनकपरामर्शविघटकत्वेन तर्क-विरोधित्वात् पक्षतावच्छेदकांशे अनाहार्यपरामर्शस्यैव तर्कजनकत्वात्।"**[27] इति।

---

[26] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 227

[27] तत्रैव

**<u>रघुनाथमतानुसारं शङ्कात्रयस्य तर्कप्रतिबन्धकत्वनिरूपणम्</u>** - रघुनाथशिरोमणिमते तु वह्न्यसमवहिताजन्यत्वम् आपाद्यप्रतियोगिनः उत्पन्नत्वस्य विशेषणमिति तन्मतानुवादे निरूपितम्। एवं च तन्मते तादृशविशेषणविशिष्टपारिभाषिकोत्पन्नत्वाभाव आपाद्यः इति फलति। तर्कं प्रति आपाद्यव्यतिरेकनिश्चयः कारणमिति तथा तर्ककारणीभूतनिश्चयस्तु इति आरम्भ निरूपितम्। तथा च तन्मते स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षण-कान्यत्वरूपवहन्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वनिश्चयः। तादृशनिश्चयं प्रति यथोक्तवह्न्यसमवहिताजन्यत्वाभावज्ञानं विशेषणाभावविषयकज्ञानविधया प्रतिबन्धकम्। तादृशं च ज्ञानं धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वेत्याकारकसंशयः। निरुक्तशंकायां सत्यां यथोक्तापाद्यव्यतिरेकनिश्चय एव न भवति। तादृशनिश्चयाभावे च कारणाभावान्मूलोक्ततर्कोत्पादो न सम्भवतीति तर्कं प्रति परम्परया निरुक्तवह्न्यसमवहिताजन्यत्वसंशयः प्रतिबन्धकः।

दीधितिकारमतानुसारं ‘**धूमः अहेतुको न वे**’त्याकारकशङ्का हेतुजन्यत्वसामान्या-भावविषयकतया धूमधर्मिकविशिष्टोत्पन्नत्वरूपापाद्यव्यतिरेकनिश्चये प्रतिबन्धिका। सामान्याभावज्ञानस्य विशेषवत्ताबुद्धौ प्रतिबन्धकत्वादिति तर्कजनकापाद्यव्यतिरेकनिश्चय-विघटकतया मूलोक्ततृतीयशङ्कायाः तर्कविरोधित्वम्। तथाहि माथुर्यामुक्तम् – **“नव्यमते तु निरुक्तवह्न्यसमवहिताजन्यत्वरूपापाद्यप्रतियोगिविशेषणाभावविषयकतया तर्कजनकापाद्य-व्यतिरेकनिर्णयविघटकत्वेन तर्कविरोधित्वात्।”**[28] इति।

[28] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 227

**<u>प्रथमद्वितीयशङ्क्योरभेदशङ्कातत्परिहारप्रदर्शनम्</u> -** प्रथमद्वितीयशङ्क्योः प्रथमा धूमत्वावच्छेदेन द्वितीया तु सामानाधिकरण्येन इति तयोः भेदः प्रदर्शितः। किन्तु धूमत्वसामानाधिकरण्येन धर्मितावच्छेदकसामानाधिकरण्येन तदभावनिश्चयो धर्मितावच्छेदकसामानाधिकरण्येन न प्रतिबध्नाति, सामानाधिकरण्येन बाधनिश्चयस्य सामानाधिकरण्येन तत्प्रकारकबुद्धिः विशिष्टबुद्धिं प्रत्यप्रतिबन्धकत्वात्। तथा चोक्तं माथुर्याम् - **"न चाद्ययोः शङ्क्योरभेद इति वाच्यम्। प्रथमा धूमत्वावच्छेदेन द्वितीया धूमत्वसामानाधिकरण्येनेति भेदात्।"**[29] इति।

ननु पर्वतत्वाधिकरणे यत्किञ्चित्पर्वते वह्न्यभावावगाहिनिश्चयः वह्निमत्ताबुद्धिं न प्रतिबध्नाति। एवञ्च अन्येषु पर्वतेषु अपि द्वितीयाया वह्न्यसमवहिताजन्यत्वशङ्काया धूमत्वसामानाधिकरण्येन धूमधर्मिकतया धूमत्वसामानाधिकरण्येन धूमधर्मिकवह्न्यसमवहिताजन्यत्वबुद्धिं मा प्रतिबध्नातु इति द्वितीयशङ्काया कथं तर्कविरोधित्वमिति चेद् अत्रोच्यते यद् बाधनिश्चयस्य सामानाधिकरण्येन विशिष्टबुद्धिप्रतिबन्धकत्वाभावत्वेऽपि धर्मितावच्छदकीभूतधूमत्वादिसामानाधिकरण्येन तदभावसंशयः तत्प्रकारकबुद्धिं प्रतिबध्नात्येव। सामानाधिकरण्येन तदभावसंशयस्य सामानाधिकरण्येन तादृशसंशयसामग्री सम्पादकत्वात्, सामानाधिकरण्येन तत्प्रकारकनिश्चयोत्पादासम्भवात् धूमत्वसामानाधिकरण्येन द्वितीयसंशयोऽपि धूमत्वसामानाधिकरण्येन वह्न्यसमवहिताजन्यत्वनिश्चयं प्रति प्रतिबन्धको भवत्येव। तथाहि उक्तं माथुर्याम् – **"न चैवं धूमत्व-**

[29] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 228

**सामानाधिकरण्येन वह्न्यसमवहिताजन्यत्वसत्त्वेऽपि धूमत्वसामानाधिकरण्येन वह्न्यसमवहिताजन्यत्वनिश्चये बाधकाभावात् द्वितीयसंशयस्य कुतस्तर्कविरोधित्वमिति वाच्यं, विशेष्यतावच्छेदकसामानाधिकरण्येन बाधनिश्चयस्य विशेष्यतावच्छेदक-सामानाधिकरण्येन विशिष्टबुद्ध्यप्रतिबन्धकत्वे अपि विशेष्यतावच्छेदकसामानाधिकरण्येन बाधसंशयस्य संशयसामग्रीसम्पादकतया विशेष्यतावच्छेदकसामानाधिकरण्येन विशिष्टनिश्चयं प्रत्यपि प्रतिबन्धकत्वात्।"**[30] इति।

### ४.२.९. वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य शङ्कात्रयप्रतिबन्धकत्वनिरूपणम्

मणिकारेण उक्तमेव यत् उक्ताः तिस्रः शङ्का न करणीयाः तथा सति सर्वत्र स्वक्रियाव्याघातः स्यादिति। अत्र मथुरानाथनये मूलस्थ क्रियाशब्दः न भावार्थकः, अपि तु, करणार्थक एव वाच्यः। यदि क्रियाशब्दः भावार्थको गृह्यते तर्हि तस्य शङ्काप्रतिबन्धकत्वं न सम्भवति। तथा च क्रियते प्रवर्तते अनेनेति व्युत्पत्त्या क्रियाशब्दस्य ज्ञानपरत्वम्। तेन अत्र क्रिया नाम वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानम्। तेन प्रयुक्तो अनुत्पादः व्याघात-शब्दस्यार्थः। तर्कपूर्वकालीनं तथा तदेव च यद्वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानं प्रथम-द्वितीयतृतीयशङ्कानां प्रतिबन्धकम्। अन्वयव्यतिरेकाभ्यां प्रत्यक्षतो वह्निजन्यत्वनिश्चये एवैतत्तर्कस्य सहकारितया वह्न्यवयव्यतिरेकानुविधायित्वज्ञानस्य अवश्यं पूर्वं सत्त्वात्। तथा च मूलोक्ततर्केण वह्निजन्यत्वनिश्चयो भवति, तादृशनिश्चये च वह्न्यन्वय-

[30] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 228

व्यतिरेकानुविधायित्वज्ञानं कारणम्, अतः तर्कात् पूर्वं तादृशज्ञानस्य सत्वमावश्यकम्। तथाहि माथुरीव्याख्यायाम् आह – **"स्वक्रियाव्याघात इति, स्वं तर्कप्रयोक्ता पुरुषः, तस्य या क्रिया वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानं, क्रियते प्रवर्तते अनेनेति व्युत्पत्तेः, तेन व्याघातः तत्प्रयुक्तः अनुत्पाद इत्यर्थः, अन्वयव्यतिरेकाभ्यां प्रत्यक्षतो वह्निजन्यत्वनिश्चय एव एतत्तर्कस्य सहकारितया वह्न्यन्वयव्यतिरकानुविधायित्वज्ञानस्य अवश्यं पूर्वं सत्त्वादिति भावः।"**[31] इति।

ननु कार्यमात्रं प्रति यदि अहेतुकत्वादिशङ्का तदा वह्नौ धूमसाधनतानिश्चया-सम्भवात्, भोजने च तृप्तिसाधनतानिश्चयासम्भवात् शब्देऽपि परप्रतिपत्तिसाधनता-निश्चयासम्भवात्, इष्टसाधनताज्ञानाभावेन वह्न्यादौ प्रवृत्तिरेव न स्यात्। नहि धूमादौ वह्न्याद्यसमवहितोत्पत्तिकत्वस्य अहेतुकत्वस्य वा ग्रहस्य सामग्र्यां सत्यां वह्न्यादौ धूमादिरूपेष्टसाधनतानिश्चयः सम्भवति। तथा च यदि वह्न्यन्वयव्यतिरेकानुविधायित्व-ज्ञानसत्त्वेऽपि यदि वह्न्यसमवहिताजन्यत्वादिसंशयः स्यात् तदा तादृशसंशयस्यैव वह्न्यादौ धूमसाधनतानिश्चयप्रतिबन्धकतया निरुक्तनिश्चयानुत्पत्तौ धूमार्थं वह्न्यादौ प्रयत्न एव न सम्भवतीति भावः।

प्रवृत्त्यर्थकत्वे प्रवृत्तेः प्रतिबन्धकत्वं मूलोक्तस्य उपादानशब्दस्य शङ्काप्रतिबन्धकत्वं न सम्भवतीति मथुरानाथेन उपादत्ते प्रवर्तते अनेनेति व्युत्पत्या उपादानपदं वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानपरमिति व्याख्यातम्। ननु वह्न्यन्वयव्यतिरेकानु-

---

[31] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 228

विधायित्वस्य स्वसमानाधिकरवह्निमत्स्वाव्यवहितप्राक्क्षणकत्वे सति स्वसमानाधिकरण-वह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वस्वरूपतया तन्निश्चयस्य धूमः स्वसमानाधिकरण-वह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वेत्याकारकवह्न्यसमवहिताजन्यत्वसंशयात्मक-स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वाभावबुद्धौ तदभावप्रकारकनिश्चय-विधया प्रतिबन्धकत्वं निर्विवादमेव। धूमत्वावच्छेदेन तादृशप्राक्क्षणकान्यत्वाभावबुद्धौ धूमत्वसामनाधिकरण्येन यथोक्तवह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य प्रतिबन्धकतायाः सर्वानुभवसिद्धत्वात्।

एवमपि धूमो अहेतुको न वेत्याकारकतृतीयशङ्कां प्रति कथमुक्तवह्न्यन्वय-व्यतिरेकानुविधायित्वनिश्चयस्य प्रतिबन्धकत्वम्? निरुक्तसंशयात्मकाहेतुकत्वबुद्धौ तादृशाहेतुकत्वाद्यभावनिश्चयस्यैव तदभावप्रकारकनिश्चयविधया प्रतिबन्धकतया निरुक्त-वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य निरुक्तहेतुकत्वसंशयीयकोट्यभावानवगाहित्वात्।

## ४.२.१०. तर्कानुसरणस्य वैयर्थ्यशङ्का, तत्सार्थक्यप्रदर्शनं च

वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्काप्रतिबन्धकत्वे तर्कवैफल्यशङ्का जायते। तथाहि वह्न्यन्वयव्यतिरेकानुविधायित्ववान् धूम इति निश्चयविशिष्टनिश्चयस्य धूमधर्मिक-वह्निजन्यत्वाभावबुद्धौ प्रतिबन्धकत्वं सुप्रसिद्धम्। तथा च, धूमो वह्निजन्यो न वेत्याकारकसंशयं प्रत्यपि वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानस्यैव प्रतिबन्धकत्वसम्भवे तर्कानुसरणं विफलं स्यात्। अत्र कारणं हि वह्निजन्यत्वसंशयनिवृत्त्यर्थमेव तर्कानुसरणस्य

आवश्यकत्वं भवति, तच्च पूर्वमेव निरूपितं भवतीति कथं पुनस्तर्कोत्थापनम्। तेन तर्कवैफल्यापत्तिर्दुर्वारा भवति।

**<u>वैयर्थ्यशङ्कानिरासप्रदर्शनम्</u>** – वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्कानिरास-कत्वेऽपि न तर्कवैफल्यं शङ्कनीयम्। तथाहि वह्न्यन्वयव्यतिरेकानुविधायित्वमात्रस्य तु नान्तरीयकवह्निके घटादौ वर्तमानतया तत्र तु वह्निजन्यत्वासत्त्वेन वह्न्यन्वय-व्यतिरेकानुविधायित्वस्य वह्निजन्यत्वव्यभिचारित्वम्। वह्निजन्यत्वाभावव्यावृत्ति-प्रयोजकतायास्तत्र वक्तुमशक्यत्वात्। अन्यथासिद्धत्वानिरूपकत्वविशिष्टस्य वह्न्यन्वयव्यतिरेकानुविधायित्वस्य तादृशघटादौ अवर्तमानस्य आलोकादिनिष्ठस्य वह्निजन्यतावच्छेदकतया वह्निजन्यत्वाभावव्यावर्तकत्वसम्भवेपि अनन्यथासिद्धत्वविशिष्टस्य वह्न्यन्वयव्यतिरेकानुविधायित्वस्य वह्निजन्यत्वस्वरूपतया तन्निश्चयस्य तर्कोत्तरकालीनत्वेन तस्य तर्कपूर्वकालीनशङ्काप्रतिबन्धकत्वासम्भवात्, स्वस्य स्वावच्छेदकत्वासम्भवाच्च न तर्कवैफल्यम्।

### ४.२.११. तर्कस्य सत्त्वासत्त्वपरिष्कारः

तर्कस्य व्यभिचारसंशयनिवृत्तिद्वारा व्याप्तिग्रहप्रयोजकत्वं सुस्पष्टम्। तत्र आशङ्क्यते यत् व्यभिचारशङ्काविरहः तर्कश्च स्वरूपसतावेव व्याप्तिग्रहं प्रति प्रयोजको वा उत ज्ञातसतौ इति। अत्र समाधानरूपेण उच्यते यथा व्यभिचारनिश्चयाभावसहचारदर्शनं न

व्याप्तिग्राहकम्, अन्यथा यत्र व्यभिचारसंशयो वर्तते तत्र व्याप्तिग्रहापत्तेः तत्रापि व्यभिचारनिश्चयाभावसहचारदर्शनयोः सत्त्वात्, तथा व्यभिचारसंशयाभावतर्कयोः ज्ञानं न व्याप्तिग्राहकं शङ्कासत्त्वदशायामपि व्यभिचारशङ्काविरहानुकूलतर्कयोः ज्ञानसम्भवात् तत्र व्याप्तिग्रहापत्तेः। तस्मात् स्वरूपसतोरेव तयोः व्याप्तिग्राहकत्वम्। ननु स्वरूपसतोरेव तयोः व्याप्तिग्राहकत्वेपि कदाचिद् भ्रान्तस्य व्यभिचारिण्यपि व्यभिचारविरहानुकूलतकेयाः सत्त्वात् कथं प्रमा-भ्रमविभागः स्यात्। व्यभिचारिण्यपि कारणसमवधानात् व्याप्तिग्रहोत्पत्तौ कुत्र व्याप्तिग्रहस्य प्रमात्वं भ्रमत्वञ्चेति विभागो स्यादिति।

उक्ताशङ्कायाः समाधानरूपेण मूलकारेण उक्तम् - **"सत्तर्कात् व्याप्तिप्रमा, तदाभासात्तदप्रमा विशेषदर्शनसत्यत्वासत्यत्वाभ्यां पुरुषज्ञानमिव।"** इति।

अत्र मथुरानाथेन तर्कस्य सत्त्वं नाम किमिति विचारितम्। तथा हि तर्कस्य सत्त्वं नाम व्यभिचारादिदोषरहितत्वम्। तर्कस्य असत्त्वं नाम व्यभिचारादिदोषविशिष्टत्वम्। तादृशसत्त्वं प्रामाण्यप्रयोजकम्, असत्त्वमप्रामाण्यप्रयोजकमिति बोध्यम्।

## ४.३. अध्यायोपसंहारः

***तत्त्वचिन्तामणेस्तर्कप्रकरणे रघुनाथ-मथुरानाथकृतटीकयोः समीक्षणम्*** इत्याख्ये चतुर्थाध्याये तत्त्वचिन्तामणेः साक्षाट्टीकयोः रघुनाथकृतदीधिति-मथुरानाथकृतमाथुर्योः मतसमीक्षणं विहितम्। तत्रादौ रघुनाथकृतदीधितिमतं समीक्षितम्। तथा च, दीधितिमाश्रित्य अत्राध्याये मण्युक्ततर्कस्य कार्यकारणभावग्राहकत्वोपपादनम्, व्याप्तिग्रहे

कार्यकारणभावज्ञानस्यावश्यकत्वप्रदर्शनम्, तर्कशरीरस्थपदव्यावृत्तिप्रदर्शनम्, रघुनाथमतानुसारं मण्युक्तायाः प्रथमशङ्काया मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम्, रघुनाथमतानुसारं मण्युक्ताया द्वितीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम्, रघुनाथमतानुसारं मण्युक्तायास्तृतीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम्, मणिस्थतदुपादानपदार्थनिरूपणम्, मिश्रमतप्रदर्शनम्, धूमत्वावच्छिन्नधूमे वह्निजन्यत्वविचारः इत्येते च विषयाश्चर्चिताः।

ततश्च माथुरीमाश्रित्यैव अस्मिन्नध्याये मूलोक्ततर्कस्य वह्निधूमव्याप्तिग्रहोपयोगित्वप्रदर्शनम्, मण्युक्ततर्कशरीरस्थाभावपदेन अन्योन्याभावग्रहणप्रयोजननिरूपणम्, अव्याप्यवृत्तित्वस्वरूपनिरूपणम्, तर्कघटकदलानां सार्थक्यम्, यज्ञपत्युपाध्यायमतोपस्थापनं तद्दूषणञ्च, रघुनाथशिरोमणेः मतानुवादः, मण्युक्तशङ्कात्रयस्य तर्कप्रतिबन्धकत्वोपपादनम्, वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य शङ्कात्रयप्रतिबन्धकत्वनिरूपणम्, तर्कानुसरणस्य वैयर्थ्यशङ्का तथा तत्सार्थक्यप्रदर्शनं, तर्कस्य सत्त्वासत्त्वपरिष्कारश्चेति विषयाः समीक्षिताः।

यद्यपि रघुनाथस्तथा मथुरानाथः साक्षाच्चिन्तामणिं व्याख्यातवन्तौ तथापि अनयोर्वैलक्षण्यं सुलभमेव। तथाहि रघुनाथेन चिन्तामण्युक्ततर्कः कार्यकारणभावग्राहकः सन् धूमो वह्निजन्यो न वेति शङ्कां निराकरोतीति प्रतिपिपादयिषुणा धूमवह्न्योः कार्यकारणभावं कथं वर्तते इत्यन्वयव्यतिरेकाभ्यां प्रदर्शितम्। परं मथुरानाथेन केवलं धूमो वह्निजन्यो न वेति शङ्काविघटकः कार्यकारणभावग्राहकस्तर्क इत्येवं व्याख्यातम्। अनयोर्यद्यपि रघुनाथेन सोदाहरणं मण्युक्ततर्कोत्थापनहेतुर्वर्णितस्तथापि प्रतिपादनशैली

अस्य क्लिष्टेति भाति। तदपेक्षया मथुरानाथशैली अत्र सुलभा। एवमन्येषु विषयेषु दीधितिटीका माथुरीतः अधिकविचारबहुला इति भाति। दीधितौ नैके विचाराः समासेन उपस्थापिताः। तत्र माथुर्यां स्वीयव्याख्यानतः यज्ञपत्युपाध्याय-रघुनाथयोर्मतानुवाद आधिक्येन दृग्गोचरीभवति। तत्र मथुरानाथेन यज्ञपतिमतमनूद्य खण्डितम्। किन्तु रघुनाथमतं यद्यपि अनूदितं मथुरानाथेन तथापि न कुत्रचिदपि खण्डितम्। इत्यनेन एतत्स्पष्टं यद्रघुनाथमते मथुरानाथस्य स्वारस्यं वर्तते इति मे मतिः।

यद्यपि रघुनाथमते स्वारस्यं कुत्रचिद् वर्तते मथुरानाथस्य परं न सर्वत्र। अतो हि मथुरानाथेन मण्युक्ततर्कशरीरस्थाभावपदम् अत्यन्ताभावत्वेन न व्याख्यातम्। किन्तु मथुरानाथेन अभावपदं तत्रस्थम् अन्योन्याभावत्वेन एव गृहीतम् इति मथुरानाथमते विशेषः। मथुरानाथमतसमीक्षणावसरे अस्मिन्नध्याये दर्शितं च किमर्थं मथुरानाथेन अत्यन्ताभावं परित्यज्य अन्योन्याभाव आश्रितः। अत्यन्ताभावस्य अव्याप्यवृत्तित्वाद् अन्योन्याभावस्य च व्याप्यवृत्तित्वाद्धि अन्योन्याभाव आश्रितो मथुरानाथेन।

किञ्च, रघुनाथेन वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तदलम् उत्पन्नत्वाभावीय-प्रतियोगिनि विशेषणम्। किन्तु मथुरानाथनये वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तदलम् वह्निसमवहिताजन्यत्वरूपविशेष्यप्रतियोगिनि विशेषणम् इत्युभयोर्मतभेद इति शिवम्।

# पञ्चमः अध्यायः

## तत्त्वचिन्तामणिदीधितेस्तर्कप्रकरणे भवानन्द-जगदीश-गदाधरकृतटीकानां समीक्षणम्

मणिग्रन्थस्थतर्कप्रकरणस्य स्वल्पाक्षरग्रथितदुर्बोधविरुद्धपूर्वपक्षखण्डनपूर्वकस्व-सिद्धान्तान् सविशदं प्रकाशयितुं रघुनाथशिरोमणिश्चिन्तामणिदीधितिं प्रणिनायेति विदितमेव विदुषाम्। परं मणिग्रन्थस्य जटिलतत्त्वजातोपनिबद्धत्वात्तत्तत्त्वानां सुकुमार-मतीनां समक्षं सरलतया समुपस्थापनार्थं प्रकाशः, जागदीशी गादाधरी च विनिर्मिता आचार्यभवानन्द-सिद्धान्तवागीशेन, आचार्यजगदीश-तर्कालङ्कारेण, आचार्यगदाधर-भट्टाचार्य्येण च। इत्थं दुर्बोध्यः दुरूहग्रन्थग्रन्थिसमन्वितोऽपि मणिग्रन्थस्थतर्कविमर्श एतद्व्याख्यानत्रितयसहायेनानायासग्राह्यः अधीतीनामिति मतिर्मतिमताम्। अथ क्रमशः तत्त्वचिन्तामणिदीधितेस्तर्कप्रकरणे प्रसिद्धानां टीकानां समीक्षणं यथामति उपस्थाप्यते।

### तत्त्वचिन्तामणिदीधितेस्तर्कप्रकरणे भवानन्दकृतटीकायाः समीक्षणम्

तत्त्वचिन्तामणिदीधितेः भवानन्दसिद्धान्तकृता प्रसिद्धा टीका हि प्रकाशः। टीकेयं दीधित्याकूतिं परिष्कर्तुं रचिता भवानन्देन। टीकेयं क्वचित्प्रसङ्गोल्लेखेन क्वचिच्च दीधितिपङ्क्तिस्थकतिपयपदार्थपरिष्कारेण दीधितिपङ्क्तिव्याख्यानपरेति अतिलघ्वी। अत्र

सविशेषतया दीधितिपङ्क्तिव्याख्यानवेलायां टीकाकृता भवानन्देन केचन एव विषया निरूपिताः। ते हि विषयाः –

1. हुताशनेत्यादिदीधितिपङ्क्तिप्रणयनप्रयोजननिरूपणम्
2. दीधितिस्थस्य रासभाहेतुत्वप्रदर्शनस्य प्रयोजननिरूपणम्
3. दीधितिस्थस्य एतेषामन्यतमं कारणं धूमस्येत्यवधारणम् इति भागस्य प्रयोजननिरूपणम्
4. दीधितिकृत-रासभादेरहेतुत्वनिश्चयोपदर्शनप्रयोजननिरूपणम्
5. मण्युक्ततर्कस्य कार्यकारणभावग्राहकतया प्रकृतोपयोगित्वप्रदर्शनम्
6. दीधित्युत्थापितचिन्ताबीजनिरूपणम्

### ५.१.१. हुताशनेत्यादिदीधितिपङ्क्तिप्रणयनप्रयोजननिरूपणम्

'वह्निमान् धूमाद्' इत्यनुमितौ धूमो वह्निव्याप्य इति व्याप्तिज्ञाने धूमो वह्निव्यभिचारी (धूमः अस्तु वह्निर्मास्तु) इत्युक्तव्याप्तिग्रहप्रतिबन्धकीभूतव्यभिचारशङ्कायां सत्यां न व्याप्तिज्ञानोत्पत्तिः। अस्यां चावस्थायां 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्यादिरूपस्तर्कः व्याप्तिज्ञानप्रतिबन्धकीभूतव्यभिचारं निवर्तयतीति 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्यादिरूपस्तर्को व्याप्तिप्रयोजकतर्कः। ननु तादृशे प्रकृतव्याप्तिग्राहकतर्कनिरूपणावसरे गङ्गेशैर्यत् कार्यकारणभावग्राहकस्य **'धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात् नोत्पन्नः स्याद्'** इति तर्कस्य

व्युत्पादनं कृतं तद्धि अर्थान्तरदोषदुष्टं, प्रकृततर्कानुपयोगित्वात् इति शङ्का जायते। अस्या एवार्थान्तरदोषशङ्कायाः परिहारार्थं **'धूमो यदि वह्न्यसमवहिताजन्यत्वे सती'**त्यादितर्कस्य प्रकृततर्कोपपादकत्वं दर्शयितुमाह दीधितिकारः 'हुताशनरासभादिपदार्थसार्थस्यान्वय-व्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमान' इत्यादीति भवानन्दनयः। तथाहि तैरुक्तम् – **"व्याप्तिग्रहतर्कप्रस्तावे कार्यकारणभावग्राहकतर्कप्रदर्शनस्यार्थान्तरत्वं परिहरन्नेव तत्तर्कोपपादकं तर्कं दर्शयति – हुताशनेत्यादिना।"**[1] इति। भवानन्दनये अर्थान्तरदोष-परिहारार्थं हुताशनेत्यादिदीधितिपङ्क्तिरिति बोध्यम्।

ननु **'धूमो यदि वह्न्यसमवहिताजन्यत्वे सती'**त्यादितर्कस्य कथं 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'ति प्रकृततर्कोपपादकत्वमिति चेत्तदित्थं बोध्यम् – 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्यापत्तौ वह्निजन्यत्वरूपापाद्य-व्यतिरेकनिश्चयो हेतुरापत्तौ बाधनिश्चयस्य हेतुत्वात्। प्रात्यक्षिके तस्मिन् वह्निजन्यत्वसंशयो विरोधी, प्रत्यक्षे ग्राह्यसंशयस्य प्रतिबन्धकत्वात्, संशयसामग्रीसम्पादकत्वाद्वा। तत्संशय-निवर्त्तकश्चायं प्रकृतस्तर्क इति परम्परया कार्यकारणभावग्राहकस्तर्कः प्रकृतं व्याप्तिग्राहकं तर्कमुपपादयतीति।

### ५.१.२. दीधितिस्थस्य रासभाहेतुत्वप्रदर्शनस्य प्रयोजननिरूपणम्

---

[1] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 579

'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्यादितर्कस्य उपपादकः कार्यकारणभावग्राहकस्तर्को हि धूमो यदीत्यादीति सूचयितुं दीधितिकृता धूमवह्न्योः कार्यकारणभावप्रदर्शनपरकं वाक्यमुक्तम् – **"हुताशनरासभादिपदार्थसार्थस्यान्वय-व्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमान"** इत्यादि। ननु धूमवह्न्योः अन्वय-व्यतिरेकाभ्यां कार्यकारणभावं प्रदर्शयति दीधितिकारः। तत्र धूमं प्रति वह्नेरेव कारणत्वं प्रसिद्धं वास्तविकञ्च, न तु रासभस्येति रासभस्याहेतुत्वमेव धूमं प्रति प्रसिद्धम्। धूमवह्न्योः कार्यकारणभावप्रदर्शनावसरे धूमरासभयोरहेतुत्वप्रदर्शनं प्रकृतानुपयोगीति शङ्का। शङ्कायामस्यामुच्यते यद्यथा धूमं प्रति वह्निः कारणं तथा रासभः अपि भवत्विति शङ्कायाः समूलनिरासार्थं हि रासभस्याहेतुत्वप्रदर्शनम्। वस्तुतः यदि धूमवह्न्योरेव कारणत्वं सुप्रसिद्धं तथा अन्यत्र धूमकारणत्वशङ्कैव नास्ति तदा धूमवह्न्योः कार्यकारणग्राहक-तर्कावतरणमसम्भवमिति विचिन्त्य रासभस्याहेतुत्वप्रदर्शनं दीधितिकृतो युक्तमेव। तथाहि उक्तम् – **"यद्यपि वह्नेः कारणताग्रहे तदन्वयव्यतिरेकग्रहस्यैव तन्त्रत्वेन रासभघटितस्य अन्वयव्यतिरेकानुविधानप्रदर्शनमग्रे तस्याहेतुत्वप्रदर्शनञ्च प्रकृतानुपयोगि, तथापि उक्तदिशा वह्नाविव रासभे अपि कारणताग्रहः कुतो न स्यादिति निरुक्ततर्कावतारस्य अकारणे असम्भवमाविष्कर्तुं तथोक्तमिति।"**[2] इति।

[2] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 579

## ५.१.३. दीधितिस्थस्य एतेषामन्यतमं कारणं धूमस्येत्यवधारणम् इति भागस्य प्रयोजन-निरूपणम्

तत्त्वचिन्तामणिकारेण धूमो वह्निजन्यो न वेति शङ्कायां सत्यां तन्निराकरणार्थं **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात् नोत्पन्नः स्यादि"**ति तर्को दर्शितः। पुनश्च तत्र तस्य प्रतिबन्धकत्वेन तिस्रः शङ्का उपस्थापिताः। तास्तिस्रः शङ्का हि –

क. धूमः अवह्नेरेव भविष्यति

ख. क्वचिद् वह्निं विनापि भविष्यति

ग. अहेतुक एव उत्पत्स्यते इति।

तत्र भवानन्दनये दीधितिकृद्भिरपि इमाः शङ्काः निराकृताः। तत्र 'धूमः अवह्नेरेव भविष्यति' इति मण्युक्तायाः शङ्कायाः निराकरणार्थं वह्नियुक्तकाणस्तोमान्वयप्रदर्शनं कृतं दीधितिकृद्भिः। किञ्च, 'अहेतुक एव उत्पत्स्यते' इति मूलोक्तायाः शङ्कायाः व्युदासायैव दीधितिकृद्भिस्तत्र अवश्यमेतेषाम् अन्यतमं कारणं धूमस्येत्यवधार्य इत्यंशः गृहीत इति भवानन्दनयः। तथाहि तैः उक्तम् – **"वस्तुतस्तु अवह्नेरेव भविष्यतीति शङ्काव्युदासार्थं वह्नियुक्तकारणस्तोमान्वये धूमान्वयप्रदर्शनम्। अहेतुक एव वोत्पत्स्यत इति शङ्कानिराकरणायावश्यमेतेषामन्यतं कारणं धूमस्येत्यवधारणं दर्शितम्।"**[3] इति।

[3] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 580

## ५.१.४. दीधितिकृत-रासभादेरहेतुत्वनिश्चयोपदर्शनप्रयोजननिरूपणम्

'वह्निमान् धूमाद्' इत्यनुमितौ धूमो वह्निव्याप्य इति व्याप्तिज्ञाने धूमो वह्निव्यभिचारी (धूमः अस्तु वह्निर्मास्तु) इत्युक्तव्याप्तिग्रहप्रतिबन्धकीभूतव्यभिचारशङ्कायां सत्यां न व्याप्तिज्ञानोत्पत्तिः। अस्यां चावस्थायां 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्यादिरूपस्तर्कः व्याप्तिज्ञानप्रतिबन्धकीभूतव्यभिचारनिवर्तकः। ननु व्याप्तिज्ञान-प्रतिबन्धकीभूतव्यभिचारनिवर्तके 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्यादिरूपे तर्के 'धूमो वह्निजन्यो न वे'ति व्यभिचारशङ्कायां सत्यां गङ्गेशोपाध्यायेन तत्त्वचिन्तामणौ धूमवह्न्योः कार्यकारणभावग्राहकः **"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्तर्हि नोत्पन्नः स्यादि"**ति तर्कः प्रदर्शितः। ननु कथमस्य तर्कस्य धूमवह्न्योः कार्यकारणभावग्राहकत्वमिति दर्शयितुं दीधितिकारैरादौ धूमवह्न्यो-रन्वयव्यतिरेकाभ्यां कार्यकारणभावः प्रतिपादितः – **"हुताशनरासभादिपदार्थ-सार्थस्यान्वयव्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमानः अवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य सन्दिग्धे किमेतानि सर्वाण्येव कारणानि, किं वा कानिचित्तथा कानिचिच्च नेति।"**[4] इत्यनेन। हुताशनरासभादिपदार्थसमूहस्य धूमेनान्वयव्यतिरेकाभ्यां सामान्यतया हुतानशनाद्यन्यतमस्य धूमकारणत्वे निश्चिते किम् धूमं प्रति हुताशनादीनि सर्वाण्येव कारणानि अथवा कानिचन कारणानि अथवा कानिचन कारणानि नेति शङ्कास्तिस्रः सम्भवन्ति। तत्र च यस्याभावेऽपि अन्येभ्यो धूमोत्पत्तिस्तस्य धूमं प्रत्यहेतुत्वं निश्चितम्।

[4] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 577

यथा रासभाभावेऽपि वह्न्यादिभ्यो धूमोत्पत्ते रासभस्य धूमं प्रत्यहेतुत्वं स्थितं भवति। एवञ्च, यस्याभावे अन्येषां सत्त्वेऽपि न धूमोत्पत्तिस्य धूमं प्रति हेतुत्वं प्रतिष्ठितं भवति। यथा वह्नेरभावे रासभादीनां सत्त्वेऽपि न धूमोत्पत्तिरिति धूमं प्रति वह्नेर्हेतुत्वम्। तथाहि दीधितिगीः – **"तत्र च यस्य व्यतिरेकेऽपि इतरेभ्यस्तथाविधेभ्यो धूमोत्पत्तिमुपलभते, तस्याहेतुत्वमवधारयति, यथा रासभादेः। यस्य व्यतिरेके तादृशापरसकलान्वयेऽपि धूमानुत्पत्तिं पश्यति तस्य कारणत्वमेव निश्चिनुते। यथा वह्नेः।"**[5] इति।

अत्र भवानन्दमतं हि यद् दीधितिकृता रघुनाथशिरोमणिना रासभाद्यहेतुत्व-निश्चयदर्शनं मण्युक्तायाः 'क्वचिद् वह्निं विनापि भविष्यती'ति शङ्कायाः निराकरणार्थम्। तथाहि मण्युक्तायाः 'क्वचिद् वह्निं विनापि भविष्यती'ति शङ्कायास्तात्पर्यं तावत् तृणारणिमणिन्यायेन धूमः क्वचिद् यथा वह्नेर्भवति तथा क्वचिद् वह्निं विनापि कारणान्तराद् भवतीति। एवंभूतायाः तात्पर्यपूर्णायाः 'क्वचिद् वह्निं विनापि भविष्यती'ति मण्युक्तायाः शङ्कायाः निरासार्थं हि अन्वयव्यतिरेकाभ्यां धूमं प्रति रासभादीनामहेतुत्वनिश्चयः प्रदर्शितो दीधितिकृतेति भवानन्दनयः। तथाहि भवानन्दैः प्रकाशटीकायाम् उक्तम् – **"अयं धूमः तृणारणिमणिन्यायेन क्वचिद् वह्नेर्भविष्यति, क्वचिद् वह्निं विनापि कारणान्तररासभादे-र्भविष्यतीत्याकारिका या क्वचिद् वह्निं विनापीति शङ्का, तन्निराकरणाय सारभादेरहेतुत्व-निश्चयोपदर्शनम्।"**[6] इति।

---

[5] तत्त्वचिन्तामणौ, कालीपदतर्कार्चार्यसम्पादिते, पृ 580

[6] तत्रैव

### ५.१.५. मण्युक्ततर्कस्य कार्यकारणभावग्राहकतया प्रकृतोपयोगित्वप्रदर्शनम्

धूमो वह्निव्याप्य इति व्याप्तिज्ञाने प्रतिबन्धकं व्यभिचारि ज्ञानं धूमो वह्निव्यभिचारीति संशयज्ञानम्। व्याप्तिज्ञानप्रतिबन्धकीभूते धूमो वह्निव्यभिचारीति संशये जाते न धूमो वह्निव्याप्य इति व्याप्तिज्ञानमुत्पद्यते। स च व्याप्तिज्ञानप्रतिबन्धकीभूतः संशयस्तर्केण वार्यते। स चासौ तर्कः धूमवह्न्योः कार्यकारणभावमूलक इति पूर्वं सविशदं निरूपितम्। किमर्थं व्याप्तिप्रतिबन्धकशङ्कानिराकरणार्थं कार्यकारणभावमूलकस्तर्को दर्शित इति दीधितिकृता निरूपितम् – **"अनुसन्धेयश्चावश्यं कार्यकारणभावग्रहः तदधीनत्वाद् व्याप्तिबुद्धेः। सामानाधिकरण्येनान्वयव्यतिरेकग्रहाज्जायमानस्य तथैव हेतुहेतुमद्भावं गृह्णतस्तस्यैव वा व्याप्तिपरिच्छेदकत्वात्।"**[7] इति। दीधितेरस्या व्याख्यायां भवानन्देन धूमवह्न्योः कीदृशस्य कार्यकारणभावग्रहस्य तयोर्व्याप्तिग्रहत्वमिति सुस्पष्टतया विशदीकृतम्। तथाहि तन्नये सामानाधिकरण्यसम्बन्धेन कार्यकारणभावग्रहस्यैव व्याप्तिग्रहत्वं बोध्यम्। तथा च, यत्र यदा कार्यं तत्र तदव्यवहितप्राक्क्षणे कारणम्, यत्र यदा कारणाभावस्तत्र तदग्रिमक्षणे कार्याभाव इत्येवं सामानाधिरण्येनान्वयव्यतिरेकग्रहात् कार्यकारणभावग्रहः स्वीकार्यः, न तु यदा कार्यं तदव्यवहितप्राक्क्षणे कारणम्, यदा कारणाभावस्तदग्रिमक्षणे कार्याभाव इत्येवंरूपग्रहाद्। तथाभूतकालमात्रघटितान्वयव्यतिरेकग्रहग्राह्यस्य कालिकप्रत्यासत्त्यवच्छिन्नकार्यत्वस्य व्याप्तिविरोधिव्यभिचाराव्यावर्तकत्वात्। तथाहि उक्तं भवानन्दतर्कवागीशैः – **"अवश्याभ्युपेयस्य**

---

[7] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 581

**सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावग्रहस्यैव व्याप्तिग्रहत्वं दर्शयति – सामानाधिकरण्येनेति। एतेन व्याप्तिग्रहकारणीभूतस्य सहचारज्ञानस्य व्यभिचार-ज्ञानाभावस्य च सत्त्वमादर्शितम्। तथैव सामानाधिरण्येनैव। गृह्णतः विषयीकुर्वतः। तस्यैव कार्यकारणभावग्रहस्यैव। व्याप्तिपरिच्छेदकत्वाद् व्याप्तिविषयकत्वात्।"**[8] इति।

### ५.१.६. दीधित्युत्थापितचिन्ताबीजनिरूपणम्

दीधितिकारेण केषाञ्चित् नयानुसारमन्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्काप्रतिबन्धकत्वेन तर्कघटकत्वं निर्णीय तथा तत्खण्डनं विधाय तत्रास्वारस्यमपि सूचितम्। तथाहि दीधिताकारैरुक्तम् – **"यत्त्वन्वयव्यतिरेकानुविधायित्वज्ञानमेव विशेष-दर्शनतया शङ्काप्रतिबन्धकं तदेव तर्कघटकं तदिदमुक्तं यदि गृहीतान्वयव्यतिरेकं हेतुमितीति। तन्न। यादृच्छिकस्य तदनुविधानस्य व्यभिचारित्वान्नियतस्य चोक्ताभेद-सम्पादकत्वादिति वदन्ति। तच्चिन्त्यम्।"**[9] इति। तत्रायमाशयः, धूमो वह्निसमवहिता-न्वयव्यतिरेकानुविधायित्वज्ञानमेव व्यावर्तकधर्मदर्शनविधया वह्न्यसमवहितजन्यत्वशङ्का-प्रतिबन्धकमिति तदेव उक्ततर्कस्य घटकं सम्पादकम्। अत्र मूलस्य चिन्तामणेरपि स्वारस्यं – यदि गृहीतान्वयव्यतिरेकं हेतुमित्यादिना बोध्यम्। परमेतन्न युक्तम्। तथाहि धूमविशेषो वह्निसमवहितान्वयव्यतिरेकानुविधायीति निर्णये सत्यपि धूमत्वावच्छिन्नो वह्न्यसमवहित-

[8] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 581

[9] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 403-404

जन्यो न वेति संशयसम्पादनेन तत्प्रतिबन्धकत्वस्य व्यभिचारः। न च धूमत्वावच्छेदेन वह्निसमवहितान्वयव्यतिरेकानुविधायित्वग्रह एव उक्तसंशये विरोधी इति वाच्यम्। तथा च, संशयस्य सामग्रीसत्त्वाद् धूमत्वावच्छेदेन वह्निसमवहितान्वयव्यतिरेकानुविधायित्वमेव निश्चेतुमशक्यं कुतस्तत्प्रतिबन्धकमिति बोध्यम्। एवं यत्तुकाराणां मतमुपस्थाप्य दीधितिकृता तन्निराकृतम्। परमन्ततस्तत्रास्वारस्यं सूचितं 'तच्चिन्त्यम्' इत्यनेन। किञ्च चिन्ताबीजमत्रेति भवानन्दसिद्धान्तवागीशैर्निरूपितम्। तन्नये चिन्ताबीजं हि कार्यकारण-भावग्राहकवैयर्थ्यापत्तिः। तथाहि उक्तम् – **"तच्चिन्त्यमिति – चिन्ताबीजं तु वह्न्यसमव-हिताजन्यत्वस्य धुमत्वावच्छेदेन निर्णये धूमो यदि वह्निव्यभिचारी स्याद् वह्न्यसमवहिताजन्यत्वे सति जन्यो न स्यादिति तर्केणैव व्यभिचारशङ्कानिराकरणे कार्यकारणभावग्राहकस्यैव वैयर्थ्यम्।"**[10] इति।

एवमेतावता भवानन्दसिद्धान्तवागीशग्रथितप्रकाशस्थनिगूहितविचारा यथामति समीक्ष्य उपस्थापिताः। अथ जगदीशतर्कालङ्कारस्य जागदीशी समीक्ष्यते।

## <u>तत्त्वचिन्तामणिदीधितेस्तर्कप्रकरणे जगदीशकृतटीकायाः समीक्षणम्</u>

जगदीशतर्कालङ्कारेणापि तत्त्वचिन्तामणेर्दीधितिपङ्क्तिः व्याख्याता। इयमपि टीका प्राधान्यतया दीधितिपङ्क्तिप्रयोजननिरूपणपरा। तत्र क्वचित् क्वचिदेव कतिपयस्थलेष्वेव दीधितिपङ्क्तिमतिरिच्याधिकतया स्वीयं मतमुपस्थापितं तर्कालङ्कारेणेत्येतेषामपि टीका

[10] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 601

लघुशरीरैव। तथा च, तर्कालङ्कारप्रणीतटीकायामस्यामुपस्थापिताः दीधित्याश्रिता विचारा अधस्ताद् निर्दिश्यन्ते –

1. हुताशनेत्यादेदीधितिप्रणयनप्रयोजननिरूपणम्
2. तर्कलक्षणनिरूपणम्
3. तर्कभेदनिरूपणम्
4. तर्कस्य कारणविचारो फलविचारश्च
5. दीधितिकृतस्य मिश्रमतानुवादस्य प्रकर्षत्वविचारः
6. धूमत्वावच्छिन्नं प्रति वह्नेः कारणत्वविचारः

## ५.२.१. हुताशनेत्यादेदीधितिप्रणयनप्रयोजननिरूपणम्

किमर्थं हुताशनेत्यादिपङ्क्तिः आरभ्यते दीधितिकृद्भिस्तदादावुपवर्ण्यते जगदीश-तर्कालङ्कारेण। वह्नौ धूमकारणत्वमस्ति न वेति अर्थात् वह्निः धूमनिरूपितकारणत्ववान् न वेति कारणत्वसंशयः, न तु वह्निजन्यो न वा धूम इति संशयः। वह्निः धूमनिरूपित-कारणत्ववान् न वेति कारणत्वसंशयनिराकरणार्थं तर्कस्यावश्यकता नास्ति। वस्तुतः संशयं प्रति साधारणधर्मज्ञानं कारणम्। कारिकावल्यां विश्वनाथन्यायपञ्चाननेन उक्तम् – **"साधारणादिधर्म्मस्य ज्ञानं संशयकारणम्"**[11] इति। यथा उच्चैस्त्वम् इति साधारणधर्मः स्थाणुर्वा पुरुषो वेति संशये कारणम्। अत्र धूमकारणं वह्निर्न वेत्यत्र संशय एव न

[11] भाषापरिच्छेदे, पञ्चाननशास्त्रिभट्टाचार्य्यसम्पादिते, पृ 524

सम्भवति, साधारणधर्मज्ञानाभावात्। तथाहि यतो धूमो जन्यः अतः किञ्चन कारणं तस्य अस्त्येवेति तु निश्चितम्, तच्च कारणं किम् इत्यत्र निश्चितिर्नास्ति। तत्र यद्यपि धूमकारणं कुत्रचित्पदार्थे निश्चितं तथापि धूमकारणत्वसमानाधिकरणधर्मज्ञानाभावात् धूमकारण-विषये संशय एव नोदेति। यथा तेजस्वी पर्वत इति ज्ञाने जाते वह्न्यभाववान् पर्वत इति ज्ञानं नैव जायते तथैव लोके कश्चन पदार्थः धूमकारणरूपेण यदि निश्चितो वर्तते तदा तादृशधूमकारणत्वसमानाधिकरणधर्मेण रूपेण वह्निकारणत्ववान् कः अपि अस्ति इति यदि निश्चयो भवति तर्हि वह्निः धूमकारणत्वावान् न वा इति संशय एव नास्ति।

धूमकारणत्वम् वह्नौ वर्तते तथा इन्धनादावपि वर्तते तर्कं विनैव, यतः इन्धनाद् विना वह्निरूपाद् एकस्मादेव कारणाद् न धूम उत्पद्यते। अत इन्धनमपि धूमकारणत्ववत् भवति। साधारणधर्मो धूमकारणत्वं, तदिन्धने वर्तते वह्नावपि वर्तते।सामान्यधर्मज्ञानस्य उभयत्र सत्त्वाद् वह्नौ धूमकारणत्वमस्ति न वेति संशयः सम्भवति।

**विशेषः** – इन्धने धूमकारणत्वस्वीकारे तर्कस्यावश्यकता नास्ति, किन्तु वह्नौ धूमकारणत्वनिर्णये तर्कस्यावश्यकता वर्तते। यतः इन्धनं धूमकारणमित्यत्र संशय एव नास्ति। अतस्तत्र तर्कस्योपयोगित्वं नास्ति।

**खण्डनम्** – येन हेतुना इन्धनस्य धूमकारणत्वं तर्कं विनैव निश्चितं भवति तेनैव हेतुना वह्नेरपि धूमकारणत्वं निश्चितं भवतु, तत्र तर्कस्य किमर्थम् आवश्यकता।

सामान्यतया धूमकारणत्वनिर्णयः अर्थात् यतो हि धूमः जन्यः अतः किञ्चन कारणमस्ति तस्य तत्कारणं किम् इन्धनं वह्निर्वा इत्यत्र निश्चयः नास्ति। एवं सामान्यतया

कारणत्वनिर्णये जाते साधारणधर्मज्ञानसम्पादनेन संशयप्रकाशनार्थं दीधितौ उक्तं हुताशनेत्यादि। यतो हि साधारणधर्मज्ञाने जाते हि संशयो जायते। संशये च जाते तन्निराकरणार्थमेव तर्कस्योपयोगिता प्रकाशिता भवति, नान्यथा।

**<u>दीधितिपङ्क्तौ आक्षेपसमाधाने</u>** – अन्यतमं कारणं धूमस्य इति यदि अवधारयति तर्हि संशय एव नास्ति, तन्निरासाय च तर्कस्यापि आवश्यकता नास्ति। अतः सन्दिग्धे इत्युक्तं दीधितिकृता। यत्र यत्र रासभाद्यन्यतमत्वं तत् तत्र धूमकारणत्वम् इत्यन्यतमत्वेन धूमकारणत्वम् निश्चितम्। यथा पुरुषत्वव्याप्यकरचरणादिमान् अयमिति ज्ञाने सति पुरुषः अयमिति ज्ञानं भवति न तु स्थाणुः इति ज्ञानं यतः पुरुषत्वव्याप्यकरचरणादिमान् अयमिति ज्ञानं स्थाणुः अयमिति ज्ञानं प्रति प्रतिबन्धकम्, व्यावर्तकज्ञानम्। अन्यतमत्वधर्मः व्यावर्तकधर्मः। अन्यतम इति ज्ञानं भवति चेत्तद्व्यावर्तकधर्मज्ञानम्। अन्यतमत्वधर्मः व्यावर्तकधर्मः। अन्यतमत्वव्याप्यधूमकारणत्ववान् अयम् इति ज्ञानं व्यावर्तक-धर्मवत्ताज्ञानम्। व्यावर्तकधर्मवत्ताज्ञाने सति धूमकारणत्ववान् वह्निः न वा इति संशय एव नोत्पद्यते। वस्तुतः अन्यतमत्वव्याप्यधूमकारणत्ववान् अयम् इति व्यावर्तकधर्मवत्ताज्ञानं हि प्रतिबन्धकम्। तेन न संशयोत्पत्तिः। यदि संशय एव नोत्पद्यते तर्हि तन्निराकरणार्थं तर्केणालम्। अत्रोच्यते – सन्दिग्धे इति दीधितौ। सन्देहस्तु भवत्येव। न स कारणत्ववान् न वा इत्याकारकः। किन्तु किमेतानि सर्वाण्येव इत्यादिरूपाणि। संशयस्य तात्पर्यम् – धूमकारणत्वस्य व्यापकं भवति रासभादि सर्वम्। अन्यतमवृत्तिधूमकारणत्वम् अन्यतमत्वावच्छेद्यं न वा इति संशयः, न तु वह्निः धूमकारणत्ववान् न वा इत्याकारकः।

वस्तुतः पूर्वम् अन्यतमत्वसामानाधिकरण्येन धूमकारणत्वं निश्चितम्, न तु अवच्छेद्यावच्छेदकेन इति बोध्यम्। अन्यथा संशय एव प्रतिबध्यः स्यात्। तेन संशयो भवत्येव। तस्य निराकरणाय च तर्कस्यावश्यकता।

संशयः परस्परविरुद्धनानाधर्मावगाहि ज्ञानम्। पर्वतो वह्निमान् न वा इति। तथा अन्यतमत्वावच्छिन्नं धूमकारणत्वं न वेति अत्र अन्यतमत्वावच्छिन्नः धूमकारणत्वं भवति इति एका कोटिः, अन्यतमत्वावच्छिन्नं धूमकारणत्वाभाववत् इति अपरा कोटिः। अत्र द्वितीयकोटिः असम्भवा। पुनश्च साधारणधर्मवत्ताज्ञानं संशयं प्रति कारणम्। किन्तु साधारणधर्मवत्ताज्ञानमेव न कुत्रापि न सम्भवतीति संशय एव न भवति। अतस्तन्निराकरणाय तर्कः निष्फलः।

उक्तदोषवारणाय अर्थात् अन्यतमत्वावच्छिन्नं धूमकारणत्वाभाववत् इति कोटिः अप्रसिद्धा इत्युक्तदोषवारणाय दीधितौ उक्तम् अहेतुत्वम् इत्यादि। वस्तुतः अन्यतमत्वावच्छिन्नं धूमकारणत्वाभाववान् रासभादिरेव। अतः उभयकोटिकः संशयः सुलभ इति तन्निराकरणाय तर्कः सफलः।

धूमकारणत्वं वह्नौ वर्तते इति निर्णयं तर्कः न जनयति। केवलं धूमकारणत्व-सन्देहस्य दूरीकरणं करोति तर्कः। ननु तर्कं विना प्रत्यक्षेण एव धूमकारणत्वं वह्नौ सिद्ध्यतु। अत्रोच्यते न इदं युक्तम्। अन्वयव्यतिरेकत एव कारणत्वं सिद्ध्यति। तथा च वह्निसत्त्वे धूमः, वह्न्यभावे धूमाभाव इति अन्वयव्यतिरेकाभ्यां धूमं प्रति वह्निः कारणमिति

सिद्ध्यति। तथा सिद्ध्यर्थं कश्चन कालविलम्बो भवति। तस्मात् झटिति प्रत्यक्षेण धूमकारणत्वं वह्नौ न सिद्ध्यति।

### ५.२.२. तर्कलक्षणनिरूपणम्

न हि मणिग्रन्थे मणिकारेण, न च मणेः साक्षाट्टीकाग्रन्थेषु न वा पारम्परिक-टीकाग्रन्थेषु कुत्रापि नव्यन्यायग्रन्थेषु तर्कलक्षणं निरूपितम्। केवलं जगदीश-तर्कालङ्कारेणैव दीधितिव्याख्यानावसरे निर्दुष्टं तर्कलक्षणं लक्षितमित्ययं तर्कालङ्काराणां विशेषः। तथाहि तन्मतानुसारं तर्कत्वम् आपादयामीति प्रतीतिसाक्षिको जातिविशेषः। तथाहि जागदीशी गीः – **"आपत्तित्वं पुनरत्रेदमापादयामीति प्रतीतिसाक्षिको जाति-विशेषः।"**[12] इति। अत्रेदं बोध्यं यद् ऊहत्व-तर्कत्वे घटत्व-कलसत्वयोरिव मानसत्व-व्याप्या एकैव जातिः। न तावद् ऊहत्व-तर्कत्वे घटत्व-पृथिवीत्वयोरिव भिन्ने भिन्ने जाती।

अत्रेयं शङ्का जायते यच्चाक्षुषत्वादिना साङ्कर्यवशाद्धि ऊहत्वं तर्कत्वं च न जातिविशेषः। साङ्कर्यं तु जातिबाधकत्वेन ग्रन्थेषु परिगणितम् –

**व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।**

**रूपहानिरसम्बन्धः जातिबाधकसंग्रहः।।**[13] इति।

---

[12] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 396

[13] भाषापरिच्छेदे, पञ्चाननशास्त्रिभट्टाचार्य्यसम्पादिते, पृ 54

शङ्काया अस्याः समाधानत्वेनोच्यते यद् ऊहत्वस्य बहिरिन्द्रियनिरपेक्षमनोजन्यतावच्छेदकत्वाच्चाक्षुषादिना साङ्कर्यदोषगन्धोऽपि असम्भवः।

## ५.२.३. तर्कभेदविचारः

जगदीशतर्कालङ्कारमते तर्को हि पञ्चविध आत्माश्रयान्योन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थकप्रसङ्गभेदाद्। तथाहि जागदीश्याम् – **"स चायं तर्कः पञ्चविधः। आत्माश्रयान्योन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थकप्रसङ्गभेदादित्याचार्याः।"**[14] इति। इदं मतमुदयनाचार्याणाम्। अधस्तात् पञ्चविधानां तर्काणां स्वरूपं निरूप्यते –

**आत्माश्रयः** – आत्माश्रयलक्षणविषये उक्तम् – **स्वापेक्षापादककप्रसङ्ग आत्माश्रयः।** इति। कस्यचन पदार्थस्य उत्पत्तौ, ज्ञप्तौ स्थितौ वा ज्ञाने वा अव्यवहिततया स्वापेक्षायां तत्प्रयोज्यानिष्टापत्तिरात्माश्रयः। तथाहि जगदीशतर्कालङ्कारैरुक्तम् – **"तत्र स्वापेक्षापादाककप्रसङ्ग आत्माश्रयः। अपेक्षा च ज्ञप्तौ उत्पत्तौ स्थितौ च ग्राह्या। तत्राद्या यथा एतद्धटज्ञानं यद्येतत्दघटज्ञानजन्यं स्यादेतद्धटज्ञानभिन्नं स्यादिति। द्वितीया तु घटः अयं यद्येतद्धटजन्यः स्यादेतद्धटभिन्नः स्यादिति। तृतीया च अयं घटो यद्येतद्धटवृत्तिः स्यात्तथात्वेनोपलभ्येतेति।"**[15] इति।

---

14 तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 397

15 तत्रैव

**<u>अन्योन्याश्रयः</u> –** स्वापेक्षापेक्षित्वनिबन्धनः प्रसङ्गः अन्योन्याश्रयः। कस्यचन पदार्थस्य पदार्थान्तरमपेक्ष्य पुनः स्वापेक्षायां यानिष्टापत्तिः सः अन्योन्याश्रयः। तथाहि जागदीश्यामुक्तम् – **"स्वापेक्षापेक्षित्वनिबन्धनः प्रसङ्गः अन्योन्याश्रयः। यथायं घटो यद्येतद्घटजन्यजन्यः स्यादेतद्घटभिन्नः स्यादित्युत्पत्तौ। एवं ज्ञप्तौ स्थितौ च स्वयमुदा-हार्यम्।"**[16] इति।

**<u>चक्रकः</u> –** द्वौ पदार्थौ ततः अधिकान् वा पदार्थान् अपेक्ष्य पुनः स्वापेक्षायां तत्प्रयोज्यानिष्टापत्तिर्या स चक्रकः। तथाहि जागदीश्यामुक्तम् – **"स्वापेक्षणीयापेक्षित-सापेक्षत्वनिबन्धनः प्रसङ्गः चक्रकः। अपेक्षा साक्षात्परम्परासाधारणी ग्राह्या।"**[17] इति।

**<u>अनवस्था</u> –** यादृश्या आपत्तेर्नास्ति कुत्रापि विश्राम एतादृशी धारावाहिनी आपत्तिर्ह्यनवस्था। अनन्तापत्तिमूलिका अनिष्टापत्तिरनवस्थेति बोध्यम्। परं कुत्रचित्तादृशी आपत्तिरपि प्रमाणसिद्धा चेन्नानवस्थारूपस्तर्कः। सा त्विष्टापत्तिरिति बोध्यम्। तथाहि जगदीशतर्कालङ्कारैरगादि – **"अनवस्था पुनरप्रामाणिकानन्तप्रवाहमूलप्रसङ्गः। यथा घटत्वं यदि यावद्घटहेतुवृत्ति स्याद् घटाजन्यवृत्ति न स्यादिति।"**[18] इति।

**<u>प्रमाणबाधितार्थकप्रसङ्गः</u> –** उक्तेभ्यश्चतुर्विधेभ्यस्तर्केभ्यो भिन्नस्तर्को ह्यप्रमाण-बाधितार्थकप्रसङ्गः पञ्चमस्तर्कः। पञ्चमश्चायं तर्कः द्विविधः व्याप्तिग्राहक-विषयपरिशोधकभेदात्। तत्राद्यो हि धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादिति।

---

[16] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 397

[17] तत्रैव

[18] तत्रैव

द्वितीयश्च पर्वतो यदि निर्वह्निः स्यादन्निर्धूमः स्यादिति। तथाहि तर्कालङ्कारेण जागदीश्यामुक्तम् – **“उक्तचतुष्कान्यप्रसङ्गः प्रमाणबाधितार्थकः प्रसङ्गः। सोऽपि द्विविधः व्याप्तिग्राहको विषयपरिशोधकश्च। तत्राद्यो यथा धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यात्, द्वितीयस्तु पर्वतो यदि निर्वह्निः स्यान्निर्धूमस्यादित्यादिः, विषयस्य वह्न्यादिः शङ्कानिवृत्तिद्वारा निश्चायकत्वेन परिशोधकत्वादित्यलं विस्तरेण।”**[19] इति।

## ५.२.४. तर्कस्य कारणविचारो फलविचारश्च

तर्कं प्रति पक्षे आपाद्यभाववत्तानिश्चयः आपादकवत्त्वांशे आहार्यरूप आपाद्य-व्याप्यापादकवत्तानिश्चयेति द्वयं कारणम्। प्रतिबध्नाति चासौ पक्षे आपादकवत्ताबोधम्। प्रतिबन्धकता चास्य यत्र शुद्धस्यापादकता तत्र तद्धर्मावच्छिन्नवत्ताबुद्धौ तद्धर्मावच्छिन्नापादकताकापत्तित्वेन यत्र विशिष्टस्यापादकता तत्र विशेष्यवत्ताबुद्धौ विशेषणवत्तानिश्चयसहकृतविशिष्टापादकताकापत्तित्वेनेति। तथाहि जागदीश्यामुक्तम् – **“फलं च तर्कस्यापादकवत्ताबोधप्रतिबन्धः, प्रतिबन्धकता च शुद्धस्यापादकतास्थले तद्धर्मावच्छिन्नवत्ताबुद्धौ तद्धर्मावच्छिन्नापादकताकापत्तित्वेन विशिष्टस्यापादकतास्थले तु विशेष्यवत्ताबुद्धौ विशेषणवत्तानिश्चयसहकृतविशिष्टापादकताकापत्तित्वेन विशेषण-वत्ताबुद्धौ तु विशेष्यवत्तानिश्चयसहकृतविशिष्टापादकताकापत्तित्वेनापीति नव्याः। स्वारसिकापादकवत्ताशङ्कायास्तर्ककारणीभूतेनापादकाभावव्याप्यापाद्याभाववत्तानिश्चयेन**

[19] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 397

**आपादकव्यापकतया गृहीतस्यापाद्यस्याभाववत्तारूपनिश्चयेन आहार्यापादकवत्ताज्ञान-सम्पादकेन तद्बाधनिश्चयेनैव वा प्रतिबन्धादाहार्यापादकवत्ताज्ञानसम्पादकेन तद्बाध-निश्चयेनैव वा प्रतिबन्धादाहार्यापादकवत्ताशङ्कायाः प्रतिबन्ध एव तर्कस्य फलम्, भवति ह्यनिष्टप्रदर्शनेनापादकवत्ताबोधेच्छाया विच्छेद इति कारणाभावादाहार्यशङ्काया अनुत्पाद इति तु मिश्रादिसम्मतः प्राचीनः पन्थाः ।**[20] इति ।

### ५.२.५. दीधितिकृतस्य मिश्रमतानुवादस्य प्रकर्षत्वविचारः

तत्त्वचिन्तामणिकारैर्गङ्गेशैरुक्तं यद् धूमादिकार्यार्थं वह्न्यादिकं नियमतः अर्थात् धूमादीष्टपदार्थकारणं वह्न्यादिकमिति निश्चित्य तन्निश्चयवशात् प्रयत्नस्य विषयीकरोति तथा वह्न्यादिकं धूमादिकारणं न वा इति शङ्कामपि विषयीकरोति इति न सम्भवं मिथो विरुद्धत्वात्। अत्र व्याख्याप्रसङ्गे दीधितौ मिश्रमतं निरूपितं रघुनाथशिरोमणिना। किञ्च, मिश्रमतमनूद्य शिरोमणिना प्राहुरित्यनेन प्रकर्षत्वमपि तन्मतस्य सूचितम्। ननु किमर्थं शिरोमणिना मिश्राणां मतस्य प्राकर्ष्यमुद्धोषीति जगदीशैः सयुक्ति निरूपितम्। तथाहि मिश्राणां नये चार्वाकं प्रति व्याप्तिग्रहोपाये निरूपिते तत्र च शङ्कानिवर्तके तर्के दर्शिते चार्वाकाश्चेत्तत्रापि शङ्कामुद्भावयति तदा एवं व्याघाताः दर्शनीयाः यत् मैवं शङ्किष्ठाः, यतो हि मृषैव भाषसे। वस्तुतः तवापि नैवं संशयो जायते। सति तादृशे संशये धूमादितत्तत्कार्यार्थं वह्न्यादितत्तत्कारणे तवैव प्रवृत्तिर्व्याहता स्यात्। धूमादिकार्यं प्रति

[20] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 396-397

वह्न्यादीनां कारणत्वेन निश्चयाभावे ते तन्मूलिका विशिष्टप्रवृत्तिरप्यसम्भाविनीति मिश्राशय इति रघुनाथमतम्। तथा चेदं मतं श्रेय इति रघुनाथनयः। जगदीशनये इष्टसाधनतानिश्चयः प्रवृत्तिहेतुरिति स्वीकृत्यैव मिश्रा मणिग्रन्थं व्याचख्युः। तेन च उपादानशब्दस्य अक्षरार्थस्तैः स्वीकृत इत्ययमेव मिश्रमते प्रकर्षहेतुरिति जगदीशनयः। तथा च, चार्वाका यदेष्टसाधनतासंशयस्य प्रवृत्तिहेतुत्वं स्वीकुर्वन्ति तदा तेषां धूमार्थं वह्निविषयकप्रवृत्तौ न व्याघातः। किञ्च, वह्निर्धूमकारणं न वेति संशये अपि चार्वाकाणां प्रवृत्तिर्भवेदिति विचार्यैव अस्वारस्याद् आहुरित्यपि प्रयुक्तं शिरोमणिनेति जागदीशतर्कालङ्काराणां मतम्। तथाहि जागदीश्यामुक्तम् – **"प्राहुरिति। उपादानपदस्य यथाश्रुतार्थरक्षैवात्र प्रकर्षः। इदं चेष्टसाधनतानिश्चयस्य प्रवृत्तिकारणत्वमभ्युपेत्य। वस्तुतश्चार्वाकेण संशयसाधारणज्ञानस्य प्रवर्तकत्वस्वीकारात्तत्र प्रवृत्तिरव्याहतेत्याद्यस्वरसः आहुरित्युक्त्वा सूचितः।"**[21] इति।

### ५.२.६. धूमत्वावच्छिन्नं प्रति वह्नेः कारणत्वविचारः

जगदीशतर्कालङ्कारनये सामान्यतः संयोगसम्बन्धेन धूमहेतुर्वह्निव्यभिचारीति पर्वतादिनिरूपितसंयोगसम्बन्धेन धूमो वह्न्यनुमाने हेतुः। पर्वतादिनिरूपितसंयोग-सम्बन्धेन धूमः पर्वतादिष्वेव वर्तते। तत्र च वह्निरपि वर्तते इति विशिष्टसंयोगसम्बन्धेन नाम पर्वतानुयोगिकसंयोगसम्बन्धेन धूमत्वावच्छिन्नधूमहेतुर्न वह्निव्यभिचारीति तर्कालङ्काराशयः। तथाहि व्यधिकरणधर्मावच्छिन्नाभावग्रन्थे जगदीशतर्कालङ्कारेणोक्तम् –

[21] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 407

**“संयोगमात्रेण धूमहेतोः प्रभावमण्डलादौ वह्नेर्व्यभिचारितया पर्वतादिनिरूपितसंयोगेनैव तस्य हेतुत्वात्।”** इति।

प्राचीनैः, गङ्गेशोपाध्यायेन तथा नव्यैरपि अनेकैः धूमत्वावच्छिन्नधूम एव वह्न्यनुमाने हेतुत्वेनोल्लिखितः। जगदीशनये पर्वतादिनिरूपितसंयोगसम्बन्धेनैव धूमत्वावच्छिन्नधूमो वह्न्यनुमाने हेतुरिति। सामान्यतः संयोगसम्बन्धेन तु धूमत्वावच्छिन्न-धूमो वह्निव्यभिचारी। किन्तु नव्यैः कैश्चिद् बहुत्रैव सामान्यतः संयोगसम्बन्धेन धूमत्वावच्छिन्नधूमस्य हेतुताङ्गीकृता। परमन्ततश्च विशिष्टसंयोगसम्बन्धेनैव हेतुता तैरप्युररीकृता। रघुनाथनये तु धूमत्वावच्छिन्नो धूमो न वह्न्यनुमापकः, यो हि धूमः मूलदेशादविच्छिन्नः स्वोत्पत्तिस्थानसंयुक्तस्तादृशेन विशिष्टधूमेन वह्न्यनुमानं भवति। प्रप्रथमं महानसादिषु तादृशविशिष्टधूमे हि वह्निव्याप्तिः प्रत्यक्षा भवति। अतस्तादृश-विशिष्टधूमो हि वह्न्यनुमाने हेतुः।

धूमत्वावच्छिन्नधूमस्य वह्न्यनुमाने हेतुतायामियं युक्तिर्बोध्या यद् धूमहेतुक-वह्न्यनुमानं हि कार्यहेतुककारणानुमानम्। धूमत्वावच्छिन्नधूमं प्रति वह्नित्वावच्छिन्नो वह्निर्हेतुः। इत्थं कार्यकारणभावग्रहमूलको व्याप्तिनिश्चयाद्धि धूमहेतुकवह्न्यनुमानं जायते। अतो धूमत्वावच्छिन्नो धूमो हि वह्नित्वावच्छिन्नवह्न्यनुमाने हेतुर्बोध्यः। अत्रेदं वक्तव्यं यद् धूमत्वावच्छिन्नधूमो यत्सम्बन्धेन वह्निकार्यं तत्सम्बन्धेन कार्यतावच्छेदकसम्बन्धेन धूमत्वावच्छिन्नधूमस्य वह्निं प्रति हेतुत्वमिति न वक्तव्यम्। पर्वतादिनिरूपितसंयोग-सम्बन्धेन धूमत्वावच्छिन्नधूमो न वह्निकार्यमिति नैयायिकानां सुधियां मतम्। इत्थं

तर्कदीधित्याश्रितायां जगदीशतर्कालङ्काररचितायां टीकायां तर्कालङ्कारेण धूमवह्न्योः कार्यकारणभावसम्बन्धविषये मतान्तराणि निरूपितानि। तथाहि जागदीशीटीकायाम् आटीकितम् – **“केचित्तु धूमसामान्ये वह्नित्वेन हेतुतायां कार्यकारणयोः कालिकी प्रत्यासत्तिर्विशेषसामग्र्यपेक्षाणाञ्च नातिप्रसङ्ग इति प्राहुः। यत्तु समवायेन धूमत्वावच्छिन्नं प्रति स्वजन्यरूपवदवच्छेद्यसंयोगसम्बन्धेन वह्निः कारणं धूमसमवायिमात्रे वह्निजन्यरूप-विशेषवत्परमाण्ववच्छेद्यसंयोगस्य सत्त्वाद् धूमद्व्यणुकसमवायिन्यपि स्वजन्यरूपविशेषवत् परमाण्वन्तरावच्छेद्यसंयोगसम्बन्धेन वह्नेः सम्भवादिति। तच्चिन्त्यम्। इदं त्ववधातव्यम्। अस्तु यथा तथा वह्निधूमयोः कार्यकारणभावग्रहः, न चासौ संयोगेन वह्निधूमयोर्व्याप्ति-ग्रहार्थमुपयुज्यत इति।**[22] इति।

एवमेतावता जगदीशतर्कालङ्कारग्रथितजागदीशीस्थनिगूहितविचारा यथामति समीक्ष्य उपस्थापिताः। अथ गदाधरभट्टाचार्यस्य गादाधरी समीक्ष्यते।

## तत्त्वचिन्तामणिदीधितेः तर्कप्रकरणे गदाधरकृतटीकायाः समीक्षणम्

तत्त्वचिन्तामणिदीधितेः गदाधरभट्टाचार्य्यकृता प्रसिद्धा टीका हि विवृतिः। परं सम्प्रदाये अस्या गादाधरीति संज्ञा समधिकप्रचलिता। टीकेयं दीधित्याकूतिं परिष्कर्तुं दीधितिपङ्क्तिस्थसकलपदार्थानां विशदतया परिष्कारेण अतिशयगुरुशरीरा। दीधितिकृन्मतिं वैशद्येन व्याख्यातुं प्रवृत्तेन गदाधरेण यद्यपि क्लिष्टनव्यन्यायरचनाशैली समाश्रिता, तथापि

[22] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 401

क्लिष्टत्वे अपि निगूढदीधितिमतप्रकाशपरत्वात्सदा तदधिगमार्थं धीमतामायासः प्रयासश्च तदीयटीकाया नारिकेलफलसम्मितत्वमेव स्मारयति। सविशेषतया दीधितिपङ्क्तिव्याख्यान-समये टीकाकृता नैके विषया निरूपिताः। तेषु प्रबन्धोपयोगिनः केचन विषयाः हि –

1. हुताशनेत्यादिदीधितिपङ्क्त्युपस्थापनप्रयोजनविवेचनम्
2. दीधितौ हुताशनेत्यादौ रासभपदोपादानप्रयोजननिरूपणम्
3. कार्यकारणभावग्रहस्य आवश्यकत्वप्रदर्शनम्
4. तर्काकारप्रविष्टपदव्यावृत्तिकथनम्
5. वह्न्यसमवधानपदार्थविचारः
6. वह्न्यसमवधानकालीनत्वविचारः
7. शङ्कात्रयविचारः
8. अवह्नेरेव भविष्यतीति शङ्काघटकावह्निपदार्थविचारः
9. धूमो यदीत्यादितर्कविरोधिशङ्कायाः धूमार्थिनः वह्नौ प्रवृत्तेः प्रतिरोधकत्व-विचारः
10. वह्नौ धूमरूपफलसाधनताज्ञानस्य धूमो यदीत्यादितर्कविरोधिशङ्का-प्रतिरोधकत्वविचारः
11. वह्नौ धूमप्रयोजकत्वनिश्चयस्य धूमो यदीत्यादितर्कविरोधिशङ्काप्रतिरोधकत्व-विचारः
12. आपाद्यव्यतिरेकनिश्चयापत्त्योः कार्य्यकारणभावविचारः

13. आपाद्यव्याप्यापादकवत्ताज्ञानयोः कार्यकारणभावविचारः

14. आपाद्यव्याप्यापादकवत्तानिश्चयापत्त्योः प्रतिबध्यप्रतिबन्धकभावविचारः

15. आपादकसंशयापाद्यव्यतिरेकनिश्चयादीनां प्रतिबध्यप्रतिबन्धकभावविचार:

16. धूमत्वावच्छेदेन वह्निजन्यतासाधनविचारः

17. धूमत्वावच्छेदेन वह्निजन्यतासाधने बाधकोपस्थापनम्

18. धूमत्वेन वह्निजन्यत्वसाधने बाधकोपस्थापनम्

19. तर्कवैयर्थ्याक्षेपसमाधानविचारः

20. चार्वाकमतखण्डनम्

## ५.३.१. हुताशनेत्यादिदीधितिपङ्क्त्युपस्थापनप्रयोजनविवेचनम्

**"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादि"**ति यः तर्कः गङ्गेशोपाध्यायेन प्रदर्शितः स न प्रकृतव्याप्तिज्ञाने – 'पर्वतो वह्निमान् धूमादि'त्यादिस्थले वह्निव्याप्यो धूम इति व्याप्तिज्ञाने नोपयोगी। तथा च, इतः पूर्वं यत् तर्के तर्कान्तरस्य अपेक्षा चेद् अनवस्थावशाद् अनुमित्यौपयिको व्याप्तिग्रहः असम्भव इत्याक्षेपस्य उद्धरणं कृतं तर्के तर्कान्तस्यानपेक्षाप्रतिपादनद्वारा तदपि प्रकृते व्याप्तिग्रहे अनुपयोगि। एवं गङ्गेशोपाध्यायकृतं धूमो यदीत्यादितर्कप्रदर्शनं, तर्कान्तराश्रयेणानवस्था-वशाद्व्याप्तिग्रहासम्भवदूरीकरणार्थं तर्कान्तरापेक्षाप्रदर्शनं च धूमवह्निव्याप्तिग्रहे अनुयोगीति शङ्का। शङ्कायास्तस्या दूरीकरणार्थं दीधितकारो हुताशनेत्यादिकं वदति इति गदाधर-

भट्टाचार्यस्याशयः। ननु दीधितिकृद्वचनेन हुताशनेत्यादिना उक्तशङ्काद्वयस्य निवृत्तिर्भवेद् इत्यपि भट्टाचार्यैरगादि – **“धूमो यदित्यादितर्कस्य प्रकृतव्याप्तिग्रहानुपयोगित्वे तत्पूर्वं तर्कान्तरानपेक्षाव्युत्पादनस्यानवस्थायानुमित्यौपयिकव्याप्तिग्रहासम्भवाक्षेपोद्धारानुपयोगि-तेत्याशङ्कां परिजिहीर्षुर्दीधितिकारो व्याप्तिग्रहोपयोगिनमन्वयव्यतिरेकेण कार्यकारणभाव-ग्रहं प्रत्युपयोगितया मूलोक्ततर्कस्य प्रकृतव्याप्तिग्रहोपयोगितां घटयिष्यन् वह्नेर्धूम-कारणताग्राहकान्वयव्यतिरेकं प्रदर्शयति - हुताशनेत्यादिना।”**[23] इति। तथा हि, धूमवह्निव्याप्तिग्रहं प्रति धूमवह्न्योः कार्यकारणभावग्रह उपयोगी। व्याप्तिग्रहोपयोगिनं - धूमवह्न्योः कार्यकारणभावग्रहं प्रति धूमवह्न्योः अन्वयव्यतिरेकौ उपयोगिनौ। तत्र च धूमवह्न्योः अन्वयव्यतिरेकप्रदर्शने धूमो यदीत्यादिमूलोक्ततर्क उपयोगीति परम्परया धूमो यदीत्यादिमूलोक्ततर्को व्याप्तिग्रहं प्रत्युपयोगी। ननु धूमवह्न्योः कार्यकारणभाव-ग्राहकान्वयव्यतिरेकयोः कथं धूमो यदीत्यादिमूलोक्ततर्कस्य उपयोगितेति दर्शयितुम् आह दीधितिकारो हुताशनेत्यादि इति भट्टाचार्याणामाशयः।

### ५.३.२. दीधितौ हुताशनेत्यादौ रासभपदोपादानप्रयोजननिरूपणम्

दीधितौ धूमवह्न्योः अन्वयव्यतिरेकप्रदर्शनार्थम् उक्तम् – **“हुताशनरासभादि-पदार्थसार्थस्यान्वयव्यतिरेकयोः”** इत्यादि। अत्र धूमवह्न्योः अन्वयव्यतिरेकग्रहस्य विषया हि हुताशनरासभघटादिपदार्थाः। एतेषु अन्वयव्यतिरेकग्रहविषयीभूतेषु हुताशनरासभ-

---

[23] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 676

घटादिपदार्थेषु दीधितिकारेण धूमस्य अकारणीभूतान् रासभघटादीन् पदार्थान् परित्यज्य धूमवह्न्योः अन्वयव्यतिरेकप्रदर्शनार्थं कारणीभूतहुताशनसमुदायपदार्थानादायैव वक्तुं शक्यते स्म। तेन दीधितिकृता हुताशनसमुदायान्वयव्यतिरेकयोः इत्येवमपि वक्तुं शक्यते स्म। किमर्थं दीधितिकृद्भिः तथानुक्त्वा अकारणीभूतान् रासभघटादीन् पदार्थान् अन्तर्भाव्य उक्तम् इति शङ्का।

अत्रेदं बोध्यं धूमोत्पत्तौ सामग्रीद्वयमुपस्थितम्। प्रथमा हुताशन-तदितरसामग्री, अपरा च हुताशनरासभादिसामग्री। तेन धूमोत्पत्तौ हुताशन-तदितरसामग्री हुताशन-रासभादिसामग्रीसमानाधिकरणा भवति। एवं हुताशन-तदितरसामग्र्याः हुताशन-रासभादिसामग्रीसामानाधिकरण्यात् धूमं प्रति हुताशन-तदितरसामग्र्याः कारणत्वसन्देहो यदि भवेत् तथापि हुताशनरासभादिसामग्र्यन्तर्गतस्य कस्यापि व्यभिचारासम्भवः। तथाहि हुताशनरासभादिसामग्र्यन्तर्गतेन केनापि सह धूमस्य व्यभिचारः असम्भवः। अर्थात् हुताशनरासभादिसामग्र्यभाववद्वृत्तिः धूम इति व्यभिचारो न सम्भवति। किञ्च, हुताशनरासभादिसामग्र्या अपि धूमस्य व्यभिचारो न कल्प्यते इति लाघवम्। एवं हुताशनरासभादिसामग्र्यन्तर्गतस्य धूमव्यभिचारित्वासम्भवस्तथा हुताशनरासभादि-सामग्र्या अपि धूमव्यभिचारित्वासम्भवः। तेन च हुताशनतदितरसामग्र्याः धूमकारणत्व-निश्चयो भवतीत्यत्र तर्कः अनावश्यक एव। अस्यामवस्थायां विशेषदर्शिनां तर्कवैफल्यं नास्तीति सूचयितुं हि दीधितिकृता रासभपदोपादानं कृतमिति भट्टाचार्याशयः। तथाहि उक्तम् – **“अन्वयव्यतिरेकग्रहविषयसमुदायमध्येऽकारणरासभादिकमनन्तर्भाव्य कारण-**

**मात्रघटितसमुदायस्यान्वयव्यतिरेकग्रहसम्भवेऽपि तादृशसमुदायत्वसामानाधिकरण्य-मात्रेण प्रथमं कारणत्वसन्देहेऽपि तत्समुदायान्तर्गतस्य कस्यापि व्यभिचारज्ञाना-सम्भवेनैतत्समुदायव्यभिचारिधूमाकल्पने लाघवमिति प्रतिसन्धानेन च तद्घटित-समुदायत्वावच्छेदेन कारणतानिश्चयात्तर्कवैयर्थ्यं स्यादिति तदन्तर्भावस्यावश्यकत्व-माविष्कर्तुं रासभपदोपादानं बोध्यम्। यद्यप्यकारणघटितसमुदायत्वावच्छेदेनापि कदाचित्कारणत्वनिश्चयसम्भवात्तर्कवैफल्यं सम्भवति। तथापि विशेषदर्शिनां न तर्कवैयर्थ्यमित्याविष्कर्तुं रासभपदोपादनं बोध्यम्।**[24] इति।

## ५.३.३. कार्यकारणभावग्रहस्य आवश्यकत्वप्रदर्शनम्

व्याप्तिग्रहार्थम् अवश्यमेव कार्यकारणभाव आवश्यकः। अत्र कारणं व्याप्तिग्रहः कार्यकारणभावाधीन एव। कार्यं व्यभिचारिविरोधि। एवं व्याप्तिरपि व्यभिचारिविरोधिनी। एवं कार्यतानिश्चयः 'धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादि'ति तर्कद्वारा व्यभिचारशङ्कां निराकरोति। अतः व्याप्तिः कार्यकारणभावाधीना। तथाहि भट्टाचार्यैरगादि – **"अनुसन्धेयश्चेति। व्याप्तिग्रहार्थमपेक्षणीय इत्यर्थः। तदधीनत्वादिति। कार्यत्वस्य व्यभिचारविरोधित्वेन कार्यतानिश्चयस्य विशेषदर्शनतया स्वत आपाद्यव्यतिरेकनिश्चय-मुद्रया, धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्येतादृशतर्कोत्थापकतया च व्यभिचारशङ्कानिवर्तकत्वादिति भावः।**[25] इति।

---

[24] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 676-678

[25] तत्रैव, पृ 681

**<u>आक्षेपः</u> –** ननु कार्यता व्याप्तिघटिता इति कार्यताज्ञानमेव स्वतः व्याप्तिज्ञानम्। अतः कार्यताज्ञानं न व्याप्तिज्ञानाधीनम्। अत्रोच्यते कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्त्यभावाप्रतियोगित्वरूपव्यापकताघटिता कार्यताघटकव्याप्तिः। किन्तु अनुमित्यौपयिकी व्याप्तिः प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावाप्रतियोगित्वरूप-व्यापकताघटिता इति भेदः।

### ५.३.४. तर्काकारप्रविष्टपदव्यावृत्तिकथनम्

**“धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात् नोत्पन्नः स्यादि”**ति तर्काकारः। अत्र तर्कशरीरे सतिसप्तम्याः विशिष्ट इत्यर्थः। तेन वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः इत्यंशस्य अर्थो भवति – वह्न्यसमव-हिताजन्यत्वविशिष्टवह्निसमवहिताजन्य इति। अत्र तर्कशरीरे वह्न्यसमवहिताजन्यत्व-विशिष्टवह्निसमवहिताजन्यत्वम् आपादकम्, उत्पन्नत्वाभाव आपाद्यः। वह्न्यसमवहिता-जन्यत्वम् वह्न्यसमवहितजन्यभेदः, न तु जन्यत्वात्यन्ताभावः।

एवञ्च, धूमो यदि वह्न्यसमवहितजन्यभिन्नत्वसमानाधिकरणवह्निसमवहित-जन्यभिन्नत्ववान् स्याद् तदा उत्पन्नत्वाभाववान् स्यादिति तर्कस्वरूपं पर्यवसितम्।

अत्र वह्न्यसमवहितजन्यभिन्नत्वं विशेषणम्, वह्निसमवहितजन्यभिन्नत्वं विशेष्यम्। यदि वह्न्यसमवहितजन्यभिन्नत्वरूपं विशेषणं न प्रयुज्यते तर्हि घटादौ व्यभिचारापत्तिः स्यात्। तथाहि घटादौ वह्निसमवहितजन्यभिन्नत्वरूपमापादकं वर्तते

किन्तु उत्पन्नत्वाभावत्वरूपमापाद्यं नास्तीति व्यभिचारः। अतः वह्न्यसमवहितजन्यभिन्नत्वं विशेषणं तर्कशरीरे देयमेव। तथा सति न घटादौ व्यभिचारापत्तिः। तथाहि घटादौ वह्निसमवहितजन्यभिन्नत्वस्य विशेष्यस्य सत्त्वे अपि वह्न्यसमवहितजन्यभिन्नत्वस्य विशेषणस्यासत्त्वाद् विशेषणाभावप्रयुक्तविशिष्टाभावः वह्न्यसमवहिताजन्यत्वविशिष्ट-वह्निसमवहिताजन्यत्वाभावः आपादकाभावो वर्तते। एवं तत्र घटादौ उत्पन्नत्वाभावाभावो वर्तते इति न व्यभिचारापत्तिः। तथाहि गादाधर्यामुक्तम् – **"घटादौ व्यभिचारवारणाय वह्न्यसमवहिताजन्यत्वरूपमादाकविशेषणमुपात्तम्।"**[26] इति। उक्तञ्च, "**तथा च घटादि-समवहिताजन्यत्वरूपविशेषणाभावात्तत्र तद्विशिष्टजन्यत्वाभावरूपापाद्यस्य सत्त्वेन न व्यभिचारः।"**[27] इति।

**<u>आक्षेपः</u> –** यः वह्निसमवहितजन्यः स वह्निव्याप्तिव्याप्यो भवतीति कार्यकारण-भावं विनैव वह्निसमवहितजन्यत्वनिश्चयेन वह्निव्याप्तिनिश्चयः सम्भवति। अतः धूमवह्न्योः व्याप्तिनिश्चयार्थं कार्यकारणभावग्रहः अनावश्यकः।

**<u>समाधानम्</u> –** उक्तं मतं न युक्तम्। तथा च, स्वाव्यवहितपूर्वक्षणावच्छिन्नवह्निमति स्वाव्यवहितपूर्वक्षणावच्छिन्नवह्न्यभाववति च उत्पन्नद्वित्वादिवस्तुनि वह्निसमवहित-जन्यत्वसत्त्वे अपि तेन साकं वह्निव्याप्तिर्नास्ति। तेन वह्निसमवहितजन्यः सर्वदा वह्निव्याप्तिव्याप्यो न भवति। अतः कार्यकारणभावमाश्रित्यैव वह्निसमवहितजन्यस्य वह्निव्याप्तिव्याप्यत्वमिति स्वीकार्यम्। तथाहि उक्तं गादाधर्याम् – **"न च**

---

[26] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 682

[27] तत्रैव, पृ 688

**वह्निसमवहितजन्यत्वस्य वह्निव्याप्यत्वनियततया तन्निश्चयादेव व्याप्तिनिश्चयनिर्वाहात् कार्यकारणभावग्रहोऽकिञ्चित्कर इति वाच्यम्। स्वाव्यवहितपूर्वक्षणावच्छिन्नवह्निमति तादृशवह्निशून्ये च यदुत्पत्तिस्तत्साधारण्येन वह्निसमवहितजन्यत्वस्य वह्निव्याप्यव्याप्यत्वात् ।**[28] इति

**<u>आक्षेपः</u> –** वह्न्यसमवहिताजन्यत्वविशिष्टवह्निसमवहितजन्यः वह्निव्याप्यो भवतीति कार्यकारणभावं विनैव वह्न्यसमवहिताजन्यत्वविशिष्टवह्निसमवहितजन्यत्वनिश्चयेन वह्निव्याप्तिनिश्चयः सम्भवति। अतः अत्र कार्यकारणभावग्रहः अकिञ्चित्कर एवेत्याक्षेपः।

**<u>समाधानम्</u> –** वह्न्यसमवहिताजन्यत्वविशिष्टवह्निसमवहितजन्यत्वस्य वह्निव्याप्तिव्याप्यत्वे कार्यकारणभावं विनैव वह्न्यसमवहिताजन्यत्वविशिष्टवह्निसमवहितजन्यत्वनिश्चयेन वह्निव्याप्तिनिश्चये स्वीकारे वह्न्यसमवहिताजन्यत्वविशिष्टशुद्धजन्यत्वस्यापि वह्निव्याप्तिनियततया वह्निसमवहितजन्यत्वनिश्चायकतर्कवैफल्यापत्तिः। तथाहि अत्र गादाधरी – **"वह्न्यसमवहिताजन्यत्वे सति वह्न्यसमवधानकालीनवह्नितत्समवधानेतरयावत्कारणको न स्याद्"**[29] इति दीधित्युक्ते पर्यवसिते अर्थे कारणपदं फलोपहितकारणपरं बोध्यम् इति गदाधरसिद्धान्तः। अन्यथा असमवधानकालीनायाः इन्धनादिव्यक्तेरपि धूमादिजननयोग्यत्वेन तद्घटितधूमकारणसमुदायस्य कुत्रापि क्षणे वृत्तित्वाभावात् आपाद्यसिद्धिः स्यात्। अतो भट्टाचार्यैरगादि – **"अत्र धूमादिजननयोग्यसमुदायस्यासमान-**

---

[28] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 687

[29] तत्रैव, पृ 689

**कालीनेन्धनादिव्यक्तिघटितस्य यावत्त्वेन न कुत्रापि क्षणे वृत्तिरिति आपाद्याप्रसिद्धिरतः कारणपदं फलोपहितकारणपरं बोध्यम्"**[30] इति।

### ५.३.५. वह्न्यसमवधानपदार्थविचारः

उक्ते पर्यवसितार्थे वह्न्यसमवधानं नाम कालिकसम्बन्धावच्छिन्नप्रतियोगिताको वह्न्यभावो बोध्यः, न तु वह्निसंयोगाभावः। यदि वह्न्यसमवधानपदस्य वह्निसंयोगाभाव-रूपार्थो गृह्यते तदा वह्निभेदनिवेशनं निष्प्रयोजनकं स्यात्। तथाहि वह्न्युत्पत्तिक्षणः वह्निसंयोगाभाववान्। यतो हि द्रव्यं क्षणं निर्गुणं निष्क्रियञ्च तिष्ठति इति न्यायः। वह्न्युत्पत्तिक्षणे वह्निसंयोगाभाववत्त्वे अपि वह्नेस्तत्र वृत्तित्वेन वह्निभेदनिवेशनमनर्थकम्। किन्तु पर्यवसितार्थे वह्न्यसमवधानं नाम कालिकसम्बन्धावच्छिन्नप्रतियोगिताको वह्न्यभावो यदि गृह्यते तदा वह्निभेदनिवेशनं सार्थकम्। तथाहि कालिकेन वह्न्युत्पत्ति-क्षणस्य वह्निमत्त्वात् वह्निघटितकारणसमुदायस्य न वह्न्याद्यसमवधानकालीनत्वमिति वह्निभेदनिवेशनमर्थवत्।

**<u>आक्षेपः</u>** – ननु कालिकेन वह्निमान् अपि वह्न्युत्पत्तिक्षणो देशविशेषावच्छेदेन वह्न्यभाववान् इति वह्निभेदनिवेशनमनर्थकम्।

**<u>समाधानम्</u>** – वह्निसमवहितजन्यघटादिसामग्र्यधिकरणक्षणः अपि देशान्तराव-च्छेदेन वह्न्यभाववान् इति घटे व्यभिचार इति व्यभिचारवारणाय स्वाधिकरण-देशावच्छिन्नवह्न्यभाववत्त्वं विवक्षितम्। तेन वह्न्युत्पत्तिक्षणो न धूमाधिकरणदेशावच्छेदेन

---

[30] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 690

वह्न्यभाववान्। अतो वह्नेर्न वह्न्यसमवधानकालीनत्वमिति वह्निभेदनिवेशनं सप्रयोजनम्। तथाहि उक्तम् – **"अथ वह्नेर्वह्निसमवधानाभाववत्स्वोत्पत्तिक्षणवृत्तित्वाद् वह्निभेदस्य कारणविशेषणत्वमनर्थकम्। न च वह्निसंयोगाभावो न वह्न्यसमवधानपदार्थः। किन्तु कालिकसम्बन्धावच्छिन्नप्रियोगिताकवह्न्यभाव एव, वह्न्युत्पत्तिक्षणश्च न तादृशः, तस्य कालिकसम्बन्धेन वह्निमत्त्वादिति वह्नेर्न वह्न्यसमवधानकालीनत्वं ..... वह्निभेदनिवेशन-मावश्यकमिति वाच्यम्, वह्निमतः अपि ह्युत्पत्तिक्षणस्य देशविशेषावच्छिन्न-तदभाववत्त्वात्।"**[31] इति।

**<u>पुनराक्षेपः</u> –** एतत्काले देशान्तरवृत्तिघटस्य कालान्तरे अत्रानयने अपि एतत्काले तद्घटस्य अस्मिन् देशे अधिकरणतानियामकसंयोगादिसम्बन्धाभावे अपि एतद्देशावच्छेदेन एतत्कालवृत्तिः घट इत्यर्थतात्पर्येण इहाद्य स घट इति प्रतीतिप्रसङ्गो दुर्निर्वारः। अतः **'यस्मिन् काले यस्याधिकरणतानियामकः संयोगादिसम्बन्धो यस्मिन् देशे भवति तस्मिन् काले तत्कालनिरूपितवृत्तितायां स देशः अवच्छेदको भवति'** इति व्युत्पत्ति-रवश्यमङ्गीकर्तव्या। तेन वह्न्यादेः स्वोत्पत्तिक्षणवृत्तौ तत्कालिकसम्बन्धवतः स्वावयव एवावच्छेदकः। न तु स्वसंयोगी अपि धूमवान् तदानीं तत्र तत्संयोगाभावादिति तत्र धूमतदवच्छेदेन वह्न्यभाववत्त्वस्याक्षतत्वात्। वह्नेरपि वह्न्यसमवधानकालीनतया वह्निभेदनिवेशनम् असङ्गतम् एव।

**<u>समाधानम्</u> –** यत्र महाघटनाशः वह्निसमवधानदशायां भवति तदनन्तरक्षणे महाघटारम्भककपाले वह्निसमवधानप्राक्कालीनैरेव स्वकारणैः खण्डघटोत्पत्तिः भवति।

[31] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 690

तादृशघटस्य यावतां कारणानां वह्निसमवधानप्राक्कालीनत्वेन तादृशखण्डघटे वह्निजन्यत्वाभावरूपापादकं वर्तते तथा वह्न्यसमवधानकालीनवह्नितत्समवधानेतर-यावत्कारणकत्वाभावरूपापाद्यं न वर्तते इति व्यभिचारो भवति। तस्य व्यभिचारस्य वारणार्थं स्वोत्पत्तिप्रयोजकप्रत्यासत्तिविशिष्टानां यावतां कारणानां वह्न्यसमवधानकालीनत्वमिति विवक्षणीयम्। तेन तादृशघटजनकस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यरूप-प्रतिबन्धकाभावस्य तद्घटोत्पत्तिप्रयोजकतत्कपालप्रत्यासत्तिविशिष्टस्य महाघटाधिकरणकपाले असत्त्वात् तथा वह्नेः स्वोत्पत्तिक्षणे धूमोत्पादप्रयोजकसंयोगरूपप्रत्यासत्तिविशिष्टस्यासत्त्वात् न व्यभिचारः। तेन तस्य वह्नेः न वह्न्यसमवधानकालीनतेति वह्निभेदनिवेशः सार्थकः। तथाहि गादाधर्यामगादि – **“न च वह्निसमवहितजन्यघटादिसामग्र्यधिकरणक्षणस्य देशान्तरावच्छिन्न-वह्न्यभाववत्तया स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्त्वस्य विवक्षितत्वाद् वह्न्युत्पत्तिक्षणस्य च धूमाधिकरणावच्छेदेन वह्न्यभाववत्ताविरहाद्वह्नेर्न वह्न्यसमवधानकालीनत्वमिति वाच्यम्। यदा यत्र यस्याधिकरणतानियामकः संयोगादिस्तदधिकरणमेव तदानीं तद्वृत्तौ अवच्छेदकमन्यथा देशान्तरवृत्तौ दिनान्तरे चात्रानेष्यमाणे घटादौ इहाद्य स घट इत्यादिप्रतीतिप्रसङ्गात्। एवञ्च वह्न्यादेः स्वोत्पत्तिक्षणवृत्तौ तत्कालीनसम्बन्धवतः स्वावयवस्यैवावच्छेदकत्वं, न तु स्वसंयोगिनः अपि धूमवतस्तदा तत्र तत्संयोगाभावादिति, तत्र च धूमवदवच्छेदेन वह्न्यभाववत्त्वस्याक्षतत्वाद् वह्नेरपि तदसमवधानकालीनत्वस्य दुर्वारत्वात्। मैवम्। यत्र वह्निसमवधानदशायां महाघटनाशस्तदुत्तरक्षणे च वह्निसमवधान-प्राक्कालीनैरेवावयवसंयोगादिभिर्वह्निमति खण्डघटो जनितस्तादृशस्य खण्डघटस्य यावतां द्रव्याभावसंयोगादिरूपकारणानां वह्निसमवधानप्राक्कालीनतया तत्र वह्न्यसमवधानकालीन-**

**यावत्कारणकत्वमेवेति व्यभिचारः। एवञ्च एतादृशव्यभिचारवारणाय स्वोत्पत्तिप्रयोजक-प्रत्यासत्तिविशिष्टानां कारणानां वह्न्यसमवधानक्षणवृत्तित्वं विवक्षणीयम्। तथा च, सति तादृशघटजनकस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यरूपप्रतिबन्धकाभावस्य तद्घटोत्पत्तिप्रयोजकतत्कपालप्रत्यासत्तिविशिष्टस्य महाघटाधिकरणकाले असत्त्वेन व्यभिचार-वारणसम्भवात्। एवं च, स्वोत्पत्तिक्षणे धूमोत्पादप्रयोजकसंयोगरूपप्रत्यासत्तिविशिष्टस्य वह्नेरसत्त्वात्तस्य न वह्न्यसमवधानकालीनतेति वह्निभेदनिवेशनमर्थवत्।"**[32] इति।

### ५.३.६. वह्न्यसमवधानकालीनत्वविचारः

अत्र वह्न्यसमवधानकालीनत्वं स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्क्षणवृत्तित्वम्, न तु स्वसमानाधिकरणवह्निमदन्यक्षणवृत्तित्वम्। यदि वह्न्यसमवधानकालीनत्वं नाम स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्क्षणवृत्तित्वमिति गृह्यते तदा वह्न्युत्पत्तिक्षणः स्वाधिकरणवृत्तित्वोपलक्षितवह्निमान्, तदन्यो नित्यवस्तु इति तत्र धूमयावत्कारणान्तर्गतस्य वह्नेरभावाद् वह्नीतरत्वनिवेशस्य सार्थक्यसम्भवेऽपि स्वसमानाधिकरणवह्निमत्स्वाव्यवहितप्राक्क्षणकत्वरूपस्य वह्निसमवहितजन्यत्वस्य विशेषणतयैव सामञ्जस्ये नञ्द्वयघटितसत्यन्तानुसरणक्लेशो व्यर्थः स्यात्।

वह्न्यसमवधानकालीनत्वं स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्क्षणवृत्तित्वम् इति स्वीकारे तु यस्य घटस्य स्वाव्यवहितप्राक्कालावच्छिन्नवह्निसमवधानवति, यत्किञ्चिद्देशावच्छिन्नवह्निसमवधानाभाववति चोत्पत्तिः तादृशघटव्यक्तेः वह्निसमवहित-

[32] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 690-91

जन्यतया यत्किञ्चिद्देशावच्छिवह्न्यभाववक्षणवृत्तिसामग्रीजन्यत्वेन च तत्र व्यभिचार इति तद्वारणाय नञ्द्वयोपादानं सार्थकं भवति।

## ५.३.७. शङ्कात्रयविचारः

धूमो यदीत्यादितर्केऽपि 'किं धूमोऽवह्नेरेव भविष्यति', 'क्वचिद्वह्निं विनाऽपि भविष्यति', 'अहेतुक एवोत्पत्स्यते' इति शङ्कात्रयं विरोधि।

तत्र शङ्कात्रये 'धूमोऽवह्नेरेव भविष्यति' इति प्रथमशङ्कायां धूमपदस्य धूमत्वावच्छिन्नाऽर्थकत्वेन, अवह्निपदस्य च वह्निशून्याऽर्थकत्वेन, जन्यत्वस्य तदुत्तर-पञ्चम्यर्थत्वेन धूमत्वाऽवच्छेदेन स्वसमानाऽधिकरणवह्निमदन्यस्वाऽव्यवहितप्राक्क्षणको न वेति शङ्कायां पर्यवसितत्वेन 'क्वचिद्वह्निं विनाऽपि भविष्यति' इति द्वितीयशङ्कायां प्रथमशङ्कातो धूमपदस्याऽनुषङ्गेऽपि क्वचित्पदसान्निध्यात् अत्र धूमपदस्य शब्दाऽध्याहारवादमाश्रित्य धूमत्वजात्याश्रययत्किञ्चिद्व्यक्तिवाचित्वेन धूमत्व-सामानाधिकरण्येन स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणको न वेति शङ्कायामेव पर्य्यवसितत्वेन उपाध्यायानुयायिनां प्राचां मते वह्न्यसमवहिताजन्यत्वस्य पक्षेऽपि विशेषणतया तस्य स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्व-रूपतया च तद्विरोधिनो निरुक्तसंशयस्य पक्षतावच्छेदकविशिष्टपक्षे आपाद्यव्याप्यापादक-वत्तानिरूपकपरामर्शविघटकत्वेन तर्काऽनुत्पादप्रयोजकत्वेन तर्कविरोधित्वम्।

न च आहार्य्यपक्षतावच्छेदकवैशिष्ट्यावगाहिज्ञानादेव परामर्शोत्पत्तिरिति वाच्यम्, पक्षतावच्छेदकाद्यंशे अनाहार्य्यपरामर्शस्यैव तर्कजनकत्वात्।

एवमपि प्रथमसंशयस्य धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यावगाहित्वेन धूमत्वसामानाधिकरण्येन स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूप-वह्न्यसमवहिताजन्यत्वावगाहिपरामर्शविरोधित्वेन तर्कविरोधित्वेऽपि द्वितीयसंशयस्य धूमत्वसामानाधिकरण्येन स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकत्वाभाव-रूपवह्न्यसमवहिताजन्यत्वावगाहिपरामर्शाविरोधित्वेन तर्कविरोधित्वं न सम्भवतीति चेन्न, संशयस्य सामग्रीसत्त्वे संशय एव भवति, न तु निश्चयः। एवं स्थिते संशयस्यापि विरुद्धकोटिद्वयोपस्थितिरूपस्य संशयसामग्रीत्वेन निश्चयप्रतिबन्धकतया, विशेष्यताव-च्छेदकसामानाधिकरण्येन बाधनिश्चयस्य विशेष्यतावच्छेदकसामानाधिकरण्येन विशिष्टबुद्ध्यप्रतिबन्धकत्वेऽपि विशेष्यतावच्छेदकसामानाधिकरण्येन बाधसंशयस्य संशयत्वेन संशयसामग्रीस्वेन वा विशेष्यतावच्छेदकसामानाधिकरण्येन विशिष्टनिश्चयं प्रत्यपि प्रतिबन्धकत्वात्।

अथ 'अहेतुक एवोत्पत्स्यत' इति तृतीयसंशयस्य तर्कविरोधित्वोपपादनम् उपस्थाप्यते। 'अहेतुक एवोत्पत्स्यत' इति तृतीयशङ्का तु पूर्वतो धूमपदाननुषङ्गे उत्पत्तिमात्रस्य हेत्वनधीनत्वे वह्न्यधीनजन्यत्वाप्रसिद्ध्या तदभावरूपापादकाऽप्रसिद्धिः।

एवं यावत्कारणनिरूपितजन्यत्वाप्रसिद्ध्या तदभावरूपापाद्याप्रसिद्धि-रित्यापादकापाद्यप्रसिद्धिपर्यवसायित्वमहेतुकत्वशङ्कायाः। पूर्वतो धूमपदाऽनुषङ्गे तु धूमो

निर्हेतुको न वेति धूमत्वावच्छेदेन निर्हेतुकत्वशङ्कारूपतया सम्प्रदायमते धूमत्वावच्छेदेन निर्हेतुकत्वशङ्का व्याप्यसंशयविषया स्वव्यापिकां धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्व-विशिष्टवह्निसमवहिताजन्यत्वकोटिकविशिष्टापादकशङ्कामुपस्थापयन्तो, पक्षे आपाद्य-व्यतिरेकनिश्चयस्य तर्ककारणतया तर्कपूर्वम् धूमत्वावच्छेदेन व्यापकत्वेन अभिमतापाद्यव्यतिरेकनिश्चयस्य ध्रौव्येण धूमत्वावच्छेदेन अहेतुकत्वशङ्काधीना व्याप्यत्वे न अभिमतापादकशङ्का, व्यापकत्वेनाभिमताभाववति व्याप्यत्वेनाभिमतस्य सत्तायाः व्यभिचाररूपतया व्यभिचारशङ्कापर्यवसायिनी। तथा च अनाहार्य्यव्यभिचारसंशयस्य व्याप्तिग्रहप्रतिबन्धकत्वेन अहेतुकत्वशङ्कादशायाम् आपादके आपाद्यव्याप्तिग्रहाऽभावेन पक्षे आपाद्यव्याप्याऽपादकवताग्रहाऽभावेन कारणाऽभावात्तर्काऽनुत्पादेन तर्काविरोधित्व-महेतुकत्वशङ्कायाः। तथाहि दीधितिकारेण उक्तम् – **"अत्र आद्या द्वयी शङ्का इष्टापत्ति-पर्यवसायिनी। तृतीया पुनरापादकाद्यप्रसिद्धिपर्यवसायिनी। अवह्नेः वह्निशून्यत्वात्।"**[33] इति। भट्टाचार्यैश्चोक्तम् – **"इष्टत्वं च पक्षे अबाधितत्वम्, पक्षे सत्त्वमिति यावत्। तज्ज्ञान-जनकत्वमत्र तत्पर्यवसानं बोध्यम्, धूमे वह्न्यसमवहितजन्यत्वस्य सन्देहे तद्व्यापादकस्य तदभावविशिष्टजन्यत्वाभावस्यापि संशयादिति भावः।**

**नन्वमेवमप्यहेतुक एवोत्पत्स्यते इति तृतीयशङ्काया एतन्मते कथं तर्कविरोधिता। तथाहि सम्प्रदायमते उत्पन्नत्वरूपजन्यत्वाभावस्यापाद्यतयोत्पन्नत्वरूपतदभाववति अहेतुकत्वशङ्का मूलशैथिल्यशङ्कापर्यवसायिनी।"**[34] इति।

---

[33] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 693

[34] तत्रैव

न च पक्षे आपाद्यव्यतिरेकनिश्चयस्य आपादकवत्तानिश्चयस्य च तर्ककारणतया विनाप्यहेतुकत्वशङ्कां तर्कात्पूर्वमवश्यं करणीयत्वेन व्यभिचारो दुर्वार एवेति वाच्यम्, आपाद्यव्याप्यापादकवत्तानिश्चयस्य तर्ककारणस्य आपादकवत्त्वांशे आहार्य्यस्यैव उपगमात्। अनाहार्य्याया एव व्याप्याभिमतसत्तायाः व्यभिचारघटकत्वेन प्रकृते तदभावात्।

न च तथापि अहेतुकत्वशङ्कायाः व्यभिचारशङ्कापर्यवसितत्वं दुर्घटम्, तस्याः व्याप्यसंशयविषया धूमत्वावच्छेदेन आपादकशङ्कोत्थापकत्वेऽपि व्यापकत्वेनाभिमता-पाद्यव्यतिरेकावच्छिन्ने व्याप्यत्वेन अभिमतापादकशङ्कानुपस्थापकत्वेन समुच्चयस्थलस्य इव व्यापकत्वेनाभिमता आपाद्याभावविषयताव्याप्यत्वेन अभिमतापादकविषयतयोः परम्परयापि परस्परं निरूप्यनिरूपकभावाभावेन व्याप्यत्वेनाभिमतापादकशङ्काया व्यभिचाररूपत्वाऽभावात्। व्यापकत्वेन अभिमता अभावविषयतानिरूपिताधिकरण-विषयतानिरूपितवृत्तित्वविषयताया एव व्यभिचारघटकत्वात्। ननु पर्वते धूमेन वह्न्यनुमितौ परामर्शविघटकतया 'धूमो वह्निव्यभिचारी न वे'ति शङ्काप्रतिबन्धिका, तादृशशङ्कानिवारणार्थम्, 'धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादि'ति तर्कानुसरणम्। तादृशतर्ककारणीभूतधूमधर्मिकवह्निजन्यत्वनिश्चयप्रतिबन्धकधूमो वह्नि-जन्यो न वेति शङ्कानिवारणाऽर्थम् – 'धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्नि-समवहिताजन्यः स्यात्तर्हि नोत्पन्नः स्यादि'ति तर्कानुसरणम्।

व्यापकत्वेनाभिमताभाववति व्याप्यत्वेनाभिमतस्य शङ्कायाः व्यभिचाररूपत्वे तु धूमधर्मिकवह्न्यहेतुकत्वशङ्कानिवारणस्य एतत्तर्कप्रयोजनतया विनाप्यहेतुकत्वशङ्कां वह्निजन्यत्वाभावशङ्कायाः एतत्तत्पूर्वमवश्यं कल्पनीयत्वेन तस्या एव व्यभिचाररूपतया परामर्शप्रतिबन्धकत्वेन तर्कानुपस्थितौ अहेतुकत्वशङ्कानिवारणप्रयासोऽपि वृथा स्यात्। न च तथापि हेतुकत्वशङ्कादशायां सकारणकत्वघटितापाद्यव्यतिरेकनिश्चय एव न सम्भवतीति, तादृशनिश्चयविघटकतयैव अहेतुकत्वशङ्कायाः तर्कविरोधित्वमिति वाच्यम्, उत्पन्नतया निश्चितेऽपि धूमे यद्यहेतुत्वशङ्का स्यात्तर्हि सर्वत्रैव सा भवितुमर्हतीति सहेतुकत्वस्य न कुत्रापि प्रसिद्धिरिति प्रतियोग्यप्रसिद्ध्या सहेतुकत्वाभावरूपाहेतुकत्व-शङ्कायाः एव अनुपत्थितिप्रसङ्गात्। न चाभावबुद्धौ प्रतियोगिनः कुत्रचित् निर्णयो नापेक्ष्यते किन्तु प्रतियोगिनि प्रतियोगितावच्छेदकप्रकारकनिश्चय एव। तथाहि भट्टाचार्यैरुक्तम् – **"एवं धूमत्वादिरूपे पक्षे वह्न्यहेतुकत्वसंशयो विनैवाहेतुकत्वशङ्कां सुलभ एव तामेवोच्छेत्तुं तर्कानुसरणात् सा चेत्तर्कमुच्छिन्द्यात्तर्हि अलमहेतुकत्वशङ्कानिराकरणायासेन।"**[35] इति।

तथा च सहेतुकत्वप्रसिद्धिविरहेऽपि अहेतुकत्वशङ्का सम्भवतीति वाच्यम्, सर्वहेतुत्वादत्र अहेतुकत्वशङ्कादशायाम्, हेतुतायां वृत्तित्वनिश्चयाभावेन प्रतियोगिता-वच्छेदकप्रकारकनिश्चयस्यापि दुर्घटत्वाद् इति चेन्न, अहेतुकत्वसंशयस्य तदीयनियत-पूर्ववर्तितासामान्ये तं प्रति अनन्यथासिद्धत्वरूपस्य तं प्रति अन्यथासिद्धसामान्ये तदीय-नियतपूर्ववर्तिरूपस्य स्वीकरणीयतया सहेतुकत्वप्रसिद्धिमन्तरापि अहेतुकत्वशङ्कोपपत्तेः।

35 तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 694

न चाहेतुकत्वशङ्का आपाद्यव्यतिरेकनिश्चयनिवर्तकतया इष्टापत्तिशङ्कायाम् एव अन्तर्भूता अस्तु इति वाच्यम्, आपाद्याप्रसिद्धिस्थले आपाद्याप्रसिद्ध्या अबाध्यापाद्यकत्वरूपेष्टापत्तेः अयोगात्।

अथैवं रीत्या नव्यमते स्वसमानाधिकरणवह्निमदन्यस्वास्यवहितप्राक्क्षणकान्यत्व-विशिष्टस्वसमानाधिकरणवह्निमदन्यवह्नितत्समवधानेतरयावत्कारणाधिकरणक्षणकत्वरूपा -पाद्यव्यतिरेकनिश्चयविघटकतया तर्कविरोधिनी आद्यशङ्काद्वयी, अबाधितापाद्यकत्व-रूपेष्टापत्तिपर्यवसायिनी चास्तु। अस्तु च 'अहेतुक एवोत्पत्स्य' इति तृतीया शङ्कापि धूमपदाननुषङ्गपक्षे उत्पत्तिमात्रस्य हेत्वनधीनत्वे वह्न्यधीनजन्यत्वाप्रसिद्ध्या आपादकाप्रसिद्धिपर्यवसायिनी, धूमपदानुषङ्गपक्षे वह्न्यधीनजन्यत्वस्थालोकादौ प्रसिद्ध्या आपादकाप्रसिद्धिपर्यवसायित्वविरहेऽपि यावत्कारणजन्यत्वघटितप्रतियोग्यप्रसिद्ध्या तदभावरूपापाद्यापसिद्धिपर्यवसायिनी, पक्षधर्मिकापायव्यतिरेकनिश्चयविघटकतया तर्कविरोधिनी च।

सम्प्रदायमते तु आद्यशङ्काद्वयी वह्न्यसमवहिताजन्यत्वस्य पक्षविशेषणतया पूर्वोक्तरीत्या परामर्शविघटकतया परम्परया तर्कविरोधिनी। तृतीयशङ्कायाः धूमपदाननुषङ्गपक्षे वस्तुमात्रस्य हेत्वनधीनत्वे वह्न्यसमवहितजन्यत्वाप्रसिद्ध्या तदभावस्य सुतराम् अप्रसिद्ध्या सम्प्रदायमते वह्न्यसमवहिताजन्यत्वस्य पक्षविशेषणतया पक्षाप्रसिद्धिपर्य्यवसायित्वम्, परामर्शविघटकतया तर्कविरोधित्वञ्च।

धूमपदानुषङ्गप्रक्षे तृतीयशङ्कायाः सम्प्रदायमते धूमधर्मिकयथाश्रुतार्थक-जन्यत्वरूपाऽपाद्यव्यतिरेकनिश्चयविघटकतया तर्कविरोधित्वमिति सर्वमवदातम्। सामान्याभावज्ञानस्य विशेषवत्ताबुद्धौ प्रतिबन्धकत्वेन हेतुजन्यत्वसामान्याभावविषयकस्य, 'धूमः अहेतुक एव उत्पत्स्यते' इति संशयस्य धूमधर्मिकस्वसमानाधिकरणवह्निमदन्य-स्वाव्यवहितप्राक्क्षणकान्यत्वविशिष्टस्वसमानाधिकरणवह्निमदन्यवह्नितत्समवधानेतर-यावत्कारणाधिकरणक्षणकत्वरूपा आद्यव्यतिरेकनिश्चयविघटकतया अहेतुकत्वशङ्कायाः धूमो यदि इत्यादितर्कविरोधित्वमिति निष्कर्षः।

### ५.३.८. अवह्नेरेव भविष्यतीति शङ्काघटकावह्निपदार्थविचारः

अथ 'अवह्नेरेव भविष्यती'ति शङ्काघटकावह्निपदस्य वह्निभिन्नार्थकत्वे वह्निभिन्न-जन्यत्वस्य धूमे सिद्ध्या शङ्कैव नोदियात्। वह्निभिन्नमात्रार्थकत्वे वह्निभिन्नमात्रजन्यत्वस्य धूमे सिद्ध्यभावेऽपि वह्निभिन्नमात्रजन्यत्वशङ्कायाः वह्निजन्यत्वशङ्कापर्यवसायितया वह्निजन्यत्वशङ्कानिवारणमात्रप्रयोजनकात् धूमो यदीत्यादितर्कात् पूर्वमावश्यकत्वेन वह्निजन्यत्वाभावस्य पक्षे आपाद्यप्रतियोगिकोटौ वा निवेशासम्भवेन अवह्नेरेव भविष्यतीति शङ्कायाः प्रकृततर्कविरोधित्वं न स्यात्। तस्मात् अवह्निपदस्य वह्न्यसमवहिते तात्पर्यमवधारणीयम्।

### ५.३.९. धूमो यदीत्यादितर्कविरोधिशङ्कायाः धूमार्थिनः वह्नौ प्रवृत्तेः प्रतिरोधकत्वविचारः

धूमो यदीत्यादितर्केऽपि अवह्नेरेव इत्यादिशङ्कायाम् तदपाकरणाय तर्कस्यावश्यकत्वे पूर्वोक्तरीत्या अप्रामाणिकानवस्थिततर्कधाराप्रसक्तेः अनवस्थापातात्, तर्कानुत्थितिः तर्कादनिर्णयो वा स्यादिति चेन्न, अवह्नेरेव भविष्यतीत्यादिसर्वस्याः एव शङ्कायाः स्वक्रिययैव व्याघातात् न तर्कान्तराऽपेक्षेति अनवस्थापत्तेरभावात्।

स्वक्रिययैव इत्यत्र स्वपदम् तर्कप्रयोक्तृपूर्वपरम्, क्रियापदं च भावव्युत्पत्त्या प्रयत्नपरम्, प्रयुक्तत्वं तृतीयाऽर्थः। अनुत्पादो व्याघातपदार्थः। तथा च तर्कप्रयोक्तृपुरुष-समवेतप्रयत्नयुक्तोऽनुपदोक्तसर्वशङ्काकर्मकोत्पत्त्यभाव इति लभ्यते।

न च धूमार्थिनो वह्न्यादौ प्रयत्नस्य अवह्नेरेव इत्यादिशङ्काप्रतिबन्धकत्वमेव अप्रामाणिकमिति वाच्यम्, धूमादिकारणं वह्न्यादिकं न वेति शङ्कावतो धूमार्थिनः प्रवृत्त्यदर्शनेनैव धूमार्थिनो वह्न्यादौ प्रयत्नस्य पूर्वोक्तशङ्कात्रयप्रतिबन्धकत्वकल्पनात्।

न च प्रयत्नस्य विरोध्यविषयकत्वेन अवह्नेरेव इत्यादिशङ्कात्रयप्रतिबन्धकत्वं न युक्तमिति वाच्यम्, यतो हि, तृप्तये भोजनं करोमीत्यादौ भोजननिष्ठतृप्तिसाधनता-ज्ञानजन्यप्रयत्नस्य तृप्तिसाधनताविषयकत्वदर्शनात् तत्तत्फलसाधनताज्ञानजन्यप्रयत्नस्य तत्तत्फलसाधनताविषयकत्वम् अङ्गीकार्यम्।

किञ्च, घटो मे जायतामिति इच्छासत्त्वे पटसाधनं तन्तुः इतीष्टसाधनताज्ञानात् सन्तो प्रयत्नवारणाय तत्तत्फलविषयकेच्छात्वेन तत्फलसामनताज्ञानत्वेन न प्रयत्नं प्रति कारणत्वं वाच्यम्। एवञ्च कार्यताऽवच्छेदकस्य प्रयत्नत्वस्य असंकुचिततया

परस्परेच्छाजन्यप्रयत्ने परस्परेच्छायाः व्यभिचारोऽपि तत्फलसाधनताविषयकत्वस्य जन्यतावच्छेदककुक्षौ निवेशेन तत्तत्फलसाधनत्वावगाहिप्रयत्नत्वावच्छिन्नं प्रति तत्तत्फलेच्छायाः कारणत्वस्वीकारेण सुकरवारणः।

न च तत्तत्फलोद्देश्यकप्रवृत्तौ तत्तत्फलगोचरेच्छात्वेन कारणत्वस्वीकारेणैव व्यभिचारवारणसम्भवेन प्रयत्नस्य फलसाधनताविषयकत्वे प्रमाणाभाव इति वाच्यम्, यत्र घटसाधनं तन्तुः, पटसाधनं कपालमिति समूहालम्बनेष्टसाधनताज्ञानात् कपाले तन्तौ च प्रवृत्तिः, घटसाधनं कपालम् इति इष्टसाधनताज्ञानाभावेऽपि कपाले प्रयत्नदर्शनात् घटसाधनं कपालमिति इष्टसाधनताज्ञानस्य व्यभिचारवारणाय कपालविषयतानिरूपित-घटविषताकप्रयत्नत्वावच्छिन्नं प्रति कपाले घटसाधनताज्ञानस्य कारणत्वं वाच्यम् । तथा च असम्बद्धनिष्ठविषयतयोः निरूप्यनिरूपकभावाभावेन कपालघटयोः सम्बन्धोऽपि कल्पनीयः। सम्बन्धश्च तयोः कार्य्यकारणभाव एव भवितुमर्हतीति सम्बन्धविधया कार्य्यकारणभावमानस्याऽवश्यमुपगन्तव्यतया ज्ञानस्येव प्रयत्नस्यापि विरोधिविषयकत्वेन प्रतिबन्धकत्वं दुर्वारम्। संशयान्यविरोधिविषयकत्वेनैव प्रतिबन्धकत्वकल्पनान्न प्रतिबध्यप्रतिबन्धकभावाधिक्यम्। प्रतिबन्धकताऽवच्छेदककोटौ ज्ञानत्वानन्तर्भावेऽपि संस्कारव्यावृत्तजातिविशेषस्य प्रतिबन्धकतावच्छेदककोटौ निवेशेन संस्कारस्य विरोधिविषयकस्य प्रतिबन्धकत्वापत्तिवारणसम्भवादिति।

तन्न, प्रयत्नस्य तर्कोत्तरकालीनत्वेन तर्कपूर्वकालीनशङ्काप्रतिरोधकत्वे प्रमाणाभावादिति।

## ५.३.१०. वह्नौ धूमरूपफलसाधनताज्ञानस्य धूमो यदीत्यादितर्कविरोधिशङ्काप्रतिरोधकत्व-विचारः

न च स्वक्रिययैव व्याघातादित्यत्र क्रियापदम् करणव्युत्पत्त्या धूमार्थिनो वह्न्यादौ प्रवृत्तेर्जनकस्य वह्न्यादिधर्मिकधूमादीष्टसाधनतानिश्चयस्यैव बोधकमस्तु। तथा च तस्य विरोधिविषयकत्वेन अवह्नेरेव भविष्यतीत्यादिशङ्काप्रतिबन्धकत्वमुपपद्यत इति वाच्यम्, वह्न्यादिधर्मिकधूमादीष्टसाधनतानिश्चयस्यापि तर्कोत्तरकालीनत्वेन तर्कपूर्वकालीनशङ्का-प्रतिरोधकत्वे प्रमाणाभावादिति।

## ५.३.११. वह्नौ धूमप्रयोजकत्वनिश्चयस्य धूमो यदीत्यादितर्कविरोधिशङ्काप्रतिरोधकत्व-विचारः

न च तथापि धूमे वह्निजन्यत्वनिश्चयस्य वह्निधूमकारणत्वनिश्चयस्य च धूमो यदीत्यादितर्कसापेक्षत्वेऽपि धूमे वह्निप्रयोजत्वनिश्चयस्य वह्नौ धूमप्रयोजकत्वनिश्चयस्य च प्रत्यक्षत एव सुग्रहत्वेन न तर्कापेक्षत्वम्, प्रयोजकत्वस्य कारणाकारणसाधारणसम्बन्ध-विशेषरूपतया तस्य तर्कात्पूर्वं निश्चयेऽपि न कारणताग्राहकतर्कवैयर्थ्यमपीति। तर्कात्पूर्वमेव प्रत्यक्षतो वह्नौ धूमप्रयोजकत्वनिश्चये धूमप्रयोजकत्वस्य च धूमनिष्ठ-प्रयोज्यतानिरूपितप्रयोजकतारूपतया धूमनिष्ठवह्निप्रयोज्यकत्वस्य वह्न्यसमवहित-जन्यत्वव्यावर्तकधूमरूपतया च वह्न्यसमवहितजन्यत्वकोटिकशङ्कानिवर्त्तकत्वापत्तिः। एवम्, वह्निनिष्ठधूमप्रयोजकत्वस्य धूमनियतपूर्ववर्तित्वाभावव्यावर्तकधर्मरूपतया

वह्निनिष्ठधूमप्रयोजकत्वज्ञानस्य कार्य्यसामान्ये अहेतुकत्वशङ्का निवर्तकत्वमिति वाच्यम्, विकल्पासहत्वात्। तथा हि, धूमप्रयोजकत्वस्य पूर्वोक्तरीत्या धूमकारणत्वातिरिक्तत्वे धूमधर्मिकवह्न्यसमवहितजन्यत्वकोटिकशङ्कानिवर्तकत्वानुपपत्तिः। धूमकारणतारूपत्वे तर्कात्पूर्वं तन्निर्णयासम्भवेन तर्कपूर्वकालीनशङ्कानिवर्तकत्वानुपपत्तिरिति।

## ५.३.१२. आपाद्यव्यतिरेकनिश्चयापत्त्योः कार्य्यकारणभावविचारः

पक्षतावच्छेदकावच्छेदेन आपाद्यव्यतिरेकनिश्चयः पक्षतावच्छेदकावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्येन च आपत्तौ कारणम्। तस्य पक्षतावच्छेदकावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्येन च आपाद्यवत्ताज्ञानविरोधित्वात्, पक्षतावच्छेदकावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्येन च आपादकाभावानुमापकत्वाच्च।

पक्षतावच्छेदकसामानाधिकरण्येन आपाद्यव्यतिरेकनिश्चयः पक्षतावच्छेदकावच्छेदेन आपत्तिं जनयति, न तु पक्षतावच्छेदकसामानाधिकरण्येनापि आपत्तिं जनयति। तद्व्यतिरेकसामानाधिकरण्यस्य तत्सामानाधिकरण्याविरोधित्वेन पक्षतावच्छेदकसामानाधिकरण्येन आपाद्यव्यतिरेकनिश्चयस्य पक्षतावच्छेदकसामानाधिकरण्येन आपाद्यवत्ताज्ञानाविरोधित्वात्। तर्कस्य आहार्य्यारोपरूपत्वेन विरोधिविषयकापाद्यव्यतिरेकनिश्चयस्यैव तर्कहेतुत्वोपगमात्।

एतेन धर्मितावच्छेदकतासम्बन्धेन आपाद्यव्यतिरेकनिश्चयस्य धर्मितावच्छेदकतासम्बन्धेन आपत्तौ हेतुत्वम् इति धूमत्वसामानाधिकरण्येन आपाद्यव्यतिरेकनिश्चयेऽपि

धूमत्वसामानाधिकरण्येन धूमत्वावच्छेदेनापि आपत्तिरुत्पद्यत इत्यपि प्रत्युक्तम्। तथाहि भट्टाचार्यैर्गदाधरैरगादि – **"न चापत्तौ समानधर्मितावच्छेदककापाद्यव्यतिरेकनिश्चयमात्रमपेक्षितं स चावच्छेदकावच्छेदेन तत्सामानाधिकरण्यमात्रेण वा व्यतिरेकमवगाहतामिति वाच्यम्। विरोधिविषयकस्यैव निश्चयस्य तर्कहेतुत्वोपमात्। तथा च तद्व्यतिरेकसमानाधिकरण्यमात्रस्य तत्सामानाधिकरण्याविरोधित्वात् तद्व्यतिरेकावच्छेदकत्वस्यैव च तथात्वात्। अत एव तर्कस्याहार्यारोपरूपता।"**[36] इति।

### ५.३.१३. आपाद्यव्याप्यापादकवत्ताज्ञानयोः कार्यकारणभावविचारः

पक्षतावच्छेदकावच्छेदेन आपाद्यव्याप्यापादकवत्तानिश्चयः, पक्षतावच्छेदकावच्छेदेन, पक्षतावच्छेदकसामानाधिकरण्येन च आपत्तिं जनयति। पक्षतावच्छेदकसामानाधिकरण्येन आपाद्यव्याप्यापादकवत्तानिश्चयः न पक्षतावच्छेदकावच्छेदेन आपत्तिं जनयति, तदेकदेशेऽभ्युपगतस्य तत्सामान्येऽनिष्टाप्रसञ्जकत्वात्। किन्तु पक्षतावच्छेदकसामानाधिकरण्येन आपाद्यव्याप्यापादकवत्तानिश्चयः पक्षतावच्छेदकसामानाधिकरण्येनैव आपत्तिं जनयति। तथाहि उक्तम् – **"अवच्छेदकावच्छेदेन आपत्तौ तदवच्छेदेन आपादकवत्ताज्ञानं हेतुः, तदेकदेशे अभ्युपगतस्य तत्सामान्ये अनिष्टाप्रसञ्जकत्वात्। न वा पक्षतावच्छेदकसामानाधिकरण्यमात्रेण आपादकज्ञाननिवर्तनक्षणस्तत्सामानाधिकरण्यमात्रावगाही तर्कः प्रकृते सम्भवति धूमत्वसामानाधिकरण्यमात्रावगाहिवह्न्यसमवहित-**

[36] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 698

**जन्यत्वशङ्काया यत्किञ्चिद्धूमे अन्वयव्यतिरेकानुविधायित्वनिश्चयानिवर्तनीयाया जागरूक-तया तादृशतर्कहेतोर्धूमत्वावच्छेदेन आपाद्यव्यतिरेकनिश्चयस्यानुदयात्"**[37] इति।

## ५.३.१४. आपाद्यव्याप्यापादकवत्तानिश्चयापत्त्योः प्रतिबध्यप्रतिबन्धकभावविचारः

पक्षतावच्छेदकसामानाधिकरण्येन आपत्तिः, पक्षतावच्छेदकसामानाधिकरण्येन आपादकवत्ताज्ञानस्य प्रतिबन्धकः, पक्षतावच्छेदकावच्छेदेनापि आपादकवत्ताज्ञानस्य प्रतिबन्धकः। पक्षतावच्छेदकावच्छेदेन आपत्तिः पक्षतावच्छेदकेन आपादकवत्ताज्ञानस्य प्रतिबन्धकः, न तु पक्षतावच्छेदकसामानाधिकरण्येन आपादकवत्ताज्ञानस्य प्रतिबन्धकः। यतो हि यादृशापादकवत्ताज्ञानं यादृशीमापत्तिं जनयति सा तादृशज्ञाने अनिष्टसाधनत्वम् उपनयन्ती इच्छाविघटनद्वारा मणिमन्त्रादिन्यायेन साक्षादेव वा तन्निवर्तयति। तथाहि भट्टाचार्यगीः – **"न हि पक्षतावच्छेदकावच्छेदेनापत्तिस्तत्सामानाधिकरण्यमात्रेणापादक-ज्ञानं निवर्तयितुमीष्टे। यतो यादृशापादकज्ञानं यादृशीमापत्तिं जनयति सा तादृशज्ञाने अनिष्टसाधनत्वम् उपनयन्ती इच्छाविघटनद्वारा मणिमन्त्रादिन्यायेन साक्षादेव वा तन्निवर्तयति।"**[38] इति।

[37] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 699

[38] तत्रैव, पृ 700

### ५.३.१५. आपादकसंशयापाद्यव्यतिरेकनिश्चयादीनां प्रतिबध्यप्रतिबन्धकभावविचारः

पक्षतावच्छेदकसामानाधिकरण्येन आपादकसंशयः, पक्षतावच्छेदकावच्छेदेनापाद्यव्यतिरेकनिश्चयविरोधी पक्षतावच्छेदकसामानाधिकरण्येनापाद्यनिश्चयविरोधी च। पक्षतावच्छेदकावच्छेदेनापादकसंशयोऽपि पक्षतावच्छेदकावच्छेदेन, पक्षतावच्छेदकसामानाधिकरण्येन च आपाद्यव्यतिरेकनिश्चयविरोधी।

पक्षतावच्छेदकसामानाधिकरण्येन आपत्तिः, पक्षतावच्छेदकावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्येन च आपादकसंशयविरोधिनी। पक्षतावच्छेदकावच्छेदेन आपत्तिः, पक्षताऽवच्छेदकसामानाऽधिकरण्यमात्रविषयकापादकसंशयविरोधिनी, न तु पक्षतावच्छेदकावच्छेदेन आपादकसंशयविरोधिन्यपीति।

### ५.३.१६. धूमत्वाऽवच्छेदेन वह्निजन्यतासाधनविचारः

ज्ञानलक्षणासन्निकर्षेण वह्न्यसमवहिताजन्यत्वस्य धूमत्वावच्छेदेन पूर्वोक्तरीत्या मानसबोधसम्भवेऽपि अलौकिकसन्निकर्षजनितमानसबोधस्य लौकिकसन्निकर्षजन्यवह्न्यसमवहितजन्यसंशयाविरोधित्वेन, वह्निजन्यत्वसंशयाविरोधित्वेन च तादृशसंशयेन प्रतिरोधात् धूमत्वावच्छेदेन आपाद्यव्यतिरेकनिश्चयाभावेन धूमत्वावच्छेदेन वह्निजन्यत्वग्राहकतर्कानुदयेन धूमत्वावच्छेदेन वह्निजन्यत्वग्रहो नैव भवितुमर्हतीति चेन्न, धूमविशेषवह्निविशेषयोः अन्वयव्यतिरेकदर्शनजनितशङ्काविरहप्रयोज्यापाद्यव्यतिरेकनिश्चयजन्यधूमनिष्ठवह्निजन्यताग्राहकतर्केणैव निरवच्छिन्नजन्यतायाः अदर्शनेन धर्मान्तरस्य

धूमनिष्ठजन्यतावच्छेदकत्वासम्भवेन च धूमनिष्ठा वह्निजन्यता धूमत्वावच्छिन्ना, धूमत्वान्यधर्मानवच्छिन्नत्वे सति सावच्छिन्नत्वात् इति परिशेषानुमानसहकारेण धूमत्वे वह्निजन्यतावच्छेदकत्वग्रहसम्भवात्।

तथाहि दीधितिगीः – **"यद्यपि चैतवता धूमत्वावच्छिन्नं प्रति वह्नेर्जनकत्वं नायाति। तृणारणिमणिन्यायेन वैकल्पिककारणतायामपि तथात्वसम्भवात्। तथापि विशेषाणां कार्यकारणाभावग्रहस्तर्केण तद्विरोधिशङ्कायामपनीतायां जायमानः सामान्य-व्यभिचारानिर्णयानुगतागुरुविशेषरूपान्तरानुपस्थितिलाघवप्रतिसन्धानादिवशात् सामान्यत एव तं परिच्छिनत्ति। प्रामाणिकौ च तथैवान्वयव्यतिरेकौ। फलबलेन लाघवादिज्ञान-शून्याया एव सामान्यव्यभिचारशङ्कायाः प्रतिबन्धकत्वं कल्प्यते।**[39] इति।

### ५.३.१७. धूमत्वावच्छेदेन वह्निजन्यतासाधने बाधकोपस्थापनम्

ननु तृणारणिमणीनां वह्निजनकत्वेऽपि वह्निनिष्ठतृणजन्यतावच्छेदकं दाहजनकतावच्छेदकवह्नित्वव्याप्यविलक्षणजातिरेव। मणिजन्यतावच्छेकं तादृशं जात्यन्तरमेव, न तु वह्नित्वं तस्य अतिप्रसक्तत्वात्। तथा प्रकृतेऽपि धूमनिष्ठवह्नि-जन्यतावच्छेदकं धूमत्वव्याप्यधर्मान्तरमेव स्यादिति सम्भावनायां जन्यतायां धूमत्वान्य-धर्मावच्छिन्नत्वस्य बाधाभावेन परिशेषानुमानसहकारेणापि प्रकृततर्कस्य न

[39] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 700

धूमत्वावच्छेदेन वह्निजन्यताग्राहकत्वमिति 'क्वचिद्वह्निं विनापि भविष्यति' इति धूमत्व-सामानाधिकरण्येन जायमानवह्निजन्यत्वशङ्कानिवर्तकधूमत्वसामानाऽधिकरण्यमात्रा-वगाहितर्कानुदयेन धूमत्वावच्छेदेन वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयनिवर्त्तनीयधूमत्व-सामानाधिकरण्येन वह्न्यजन्यत्वशङ्कया प्रतिबन्धात् धूमत्ववह्नित्वाभ्यां कार्यकारणभावानिश्चयेन धूमनिष्ठधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्व-सामान्याभाववद्वह्नित्वावच्छिन्नसामानाधिकरण्यरूपव्याप्तिग्रहविरोधिधूमसमानाधिकरणा-भावप्रतियोगितावछेदकवह्नित्वावच्छिन्नसामानाधिकरण्यरूपव्यभिचारसंशयस्य अनिवृत्तिः इति वाच्यम्। यतो हि धूमत्वसामानाधिकरण्येन कार्यकारणभावग्रहविरोधि-धूमत्वावच्छेदेन वह्न्यसमवहितजन्यत्वसंशयविरोधितर्कसहकारेण धूमविशेषवह्नि-विशेषयोरन्वयव्यतिरेकानुविधायित्वग्रहजनितधूमविशेषवह्निविशेषयोः कार्यकारणभाव-ग्राहकसामग्री, धूमत्वं वह्निजन्यत्वाभाववद्वृत्तिरिति व्यभिचारश्चियाभावसहकारेण सामान्यधर्मावच्छिन्नविशेष्यकवह्निकार्य्यत्वाभावनिश्चयाभावरूपयोग्यताबलेन सामान्य-धर्मावच्छेदेन धूमत्ववह्नित्वाभ्यां कार्यकारणभावग्रहं जनयति। यत्र तु सामान्य-धर्मावच्छेदेन व्यभिचारग्रहः तत्रानतिरिक्तवृत्तित्वरूपावच्छेदकतायाः सामान्यधर्मे असम्भवात् विशेषधर्मावच्छेदेनैव कार्यकारणभावग्रहः, यथा वह्नित्वादौ तृणादिजन्यत्वव्यभिचारग्रहदशायां तुरगादिजन्यतावच्छेदकत्वग्रहो न वह्नित्वादौ, किन्तु विशेषधर्म एव। तथाहि भट्टाचार्यैः उक्तम् – **"ननु धूमत्वसामानाधिकरण्यजन्यतायां धूमत्वान्यधर्मावच्छिन्नत्वबाधसहकृतावच्छिन्नत्वग्राहकजन्यतात्वादिहेतोर्धूमत्वावच्छिन्नत्वं सेत्स्यतीत्यत आह। तृणारणीति। यथा तृणादीनां वह्नित्वसमानाधिकरणजन्यताकत्वे अपि**

न तदवच्छिन्नजन्यताकत्वम्, अपि तदवान्तरधर्मावच्छिन्नजन्यताकत्वमेव तथा प्रकृते अपि अवान्तरधर्मस्यावच्छेदकत्वे अपि जन्यताया धूमत्वसामानाधिकरण्योपपत्तेरित्यर्थः। तथा चावान्तरधर्मस्यावच्छेदकत्वसम्भावनया न जन्यतायां धूमत्वन्यधर्मावच्छिन्नत्वबाध इति भावः। विशेषाणां कार्यकारणभावग्रह इति। विशेषधर्मावच्छेदेनान्वयव्यतिरके-ग्रहाज्जायमानः सामान्यधर्मसामानाधिकरण्येन कार्यत्वकारणत्वग्रह इत्यर्थः। सामान्यत एव सामान्यधर्मावच्छेदेनैव। तं कार्यकारणभावम्। परिच्छिन्नेति। विषयीकरोती-त्यग्रिमेणान्वयः। एवकारेण विशेषधर्माणामवच्छेदकत्वावाहित्वव्यवच्छेदः।

ननु विरोधिशङ्कासत्त्वे सामान्यधर्मसामानाधिकरण्येनापि कार्यकारणभावग्राहक-सामग्री न सम्भवतीत्यत आह। तर्केणेति। उक्ततर्केणेत्यर्थः। तद्विरोधिशङ्कायां तादृश-कार्यकारणभावग्रहविरोधिन्यां सामान्यधर्मावच्छएदतेन कार्यकारणभावाभावशङ्कायाम्। अपनीतायां निवर्तितायां सत्यां जायमानः।

नत्वेवं कस्यचित्सामान्यधर्मस्योपस्थितौ तदवान्तरधर्मावच्छेदेन क्वचिदपि कार्यकारणभावग्रहो न स्यादपि तु सामान्यधर्मावच्छेदेनैव इत्यादिशङ्काम् अपनिनीषुः सामान्यधर्मसामानाधिकरण्येन कार्यकारणभवग्राहकसामग्यास्तन्मात्रावच्छेदेन तद्ग्रहजनने अपेक्षणीयान्तरमाह। सामान्यव्यभिचारानिर्णयेति। सामान्यधर्मावच्छिन्नविशेष्यताक-प्रकृतकार्यत्वाभावानिश्चयेत्यर्थः।”[40] इति।

[40] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 700-701

एवं क्रियाजन्यतावच्छेदकत्वग्रहो न संयोगत्वसामान्यधर्मे, किन्तु विशेषधर्म एव। यतो हि क्रियाजन्यतायाः संयोगविभागोभयनिष्ठत्वेन तदुभयसाधारणैकजातेः संयोगत्वादिना साङ्कर्येण स्वीकर्तुम् अशक्यतया संयोगत्वस्य संयोगवृत्तितया विभागावृत्तितया च अवच्छेदकत्वासम्भवेन विशेषधर्मावच्छेदेनैव कार्य्यकारणभावग्रहः।

न च अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यां विशिष्टबुद्धावेव तत्सामानाधिकरण्यावगाही बाधनिश्चयो विरोधी, न तु स्वरूपसम्बन्धविशेषरूपावच्छेदकत्वावगाहिन्यामिति वह्नित्वसामानाधिकरण्येन तृणादिजन्यत्वाभावनिश्चयेऽपि वह्नित्वादौ स्वरूपसम्बन्धविशेषरूपतृणादिजन्यतावच्छेदकत्वग्रहे न किञ्चिद्बाधकम्। अत एव गन्धप्रागभावसामानाधिकरण्येन गन्धवत्तानिश्चयेऽपि गन्धप्रागभावावच्छेदेन गन्धात्यन्ताभावग्रहो जायत इति वाच्यम्, अनुभवानुरोधेन अन्यूनानतिप्रसक्तत्वनियतविलक्षणस्वरूपसम्बन्धविशेषरूपावच्छेदकत्वावगाहिन्यामपि प्रतीतौ सामानाधिकरण्यावगाहिग्राह्याभावनिश्चयस्य प्रतिबन्धकत्वोपगमात्।

तथाहि गदाधरी गीः – **“एतेन वह्नित्वाद्यवच्छेदेन तृणादेः संयोगविभागादिविशेषसाधारणगुणत्वाद्यवच्छेदेन च कर्मादेर्जन्यताग्रहप्रसङ्गो वारितः। तृणादिकं विनापि बह्न्याद्युत्पत्तिदर्शनेन वह्नित्वादिसामानाधिकरण्येन तृणाद्यजन्यत्वनिश्चयात् प्रत्येकं तृणाद्यन्वयव्यतिरेकानुविधायिषु यावद्वह्निषु अवगतागुरुविशेषान्तरस्य जातिरूपस्य प्रागसिद्धेः। क्रियान्वयव्यतिरेकानुविधायिसंयोगविभागादिषु संयोगत्वादिना सङ्करप्रसङ्गेनाननुगतजातेरसम्भवाच्च तत्र द्वितीयप्रयोजकसत्त्वमव्याहतमैवेति ध्येयम्। प्रकृते सामान्य-**

**धर्मधूमत्वसामानाधिकरण्येन वह्न्यजन्यत्वस्य संशयसत्त्वान्निश्चयानुधावनम्। तस्य च बाधनिश्चयाभावरूपस्य कारणत्वेनैवोपयोगिता बोध्या।**[41] इति।

गन्धप्रागभाववान् गन्धवान्, गन्धात्यन्ताभाववान्, इति गन्धप्रागभाव-सामानाधिकरण्येन गन्धवत्तानिश्चयदशायां गन्धप्रागभावावच्छेदेन गन्धात्यन्ताभावग्रहे गन्धप्रागभावे धर्मितावच्छेदकत्वन्तु नान्यूनानतिरिक्तवृत्तित्वरूपम्। नापि अन्यूनानतिरिक्त-वृत्तित्वनियतविलक्षणस्वरूपसम्बन्धविशेषरूपम्, किन्तु अन्यादृशमेव इति। तथा च भट्टाचार्यैः उक्तम् – **"न गन्धप्रागभावसामानाधिकरण्येन गन्धवत्तानिश्चयेऽपि तद्वच्छेदेन गन्धात्यन्ताभावग्रहाद् धर्मिताचच्छेदकांशेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यामेव विशिष्टबुद्धौ तत्सामानाधिकरण्यमात्रावगाहिबाधनिश्चयो विरोधी न तु स्वरूपसम्बन्ध रूपतदवगाहिन्यामिति वह्नित्वादौ स्वरूपसम्बन्धरूपतृणादिजन्यतावच्छेदकत्वग्रहे कथं तत्सामानाधिकरण्यमात्रेण तृणाद्यजन्यत्वनिश्चयो विरोधीति वाच्यम्। अनुभवानुरोधेन अन्यूनानतिप्रसक्तत्वनियतविलक्षणस्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिन्यामपि सामाना-धिकरण्यावगाहिग्राह्याभावनिश्चयस्य प्रतिबन्धकत्वोपगमात् गन्धप्रागभावादेस्तु अवच्छेदकत्वमन्यादृशमेव"**[42] इति।

नन्ववच्छेद्यावच्छेदकभावविरहाऽनिश्चयदशायामेव योग्यताबलात् विशेषधर्मा-वच्छेदेन कार्य्यकारणभावग्राहकसामग्र्याः सामान्यधर्मावच्छेदेन कार्य्यकारणभाव-ग्राहकत्वमस्तु इति चेन्न, अवच्छेद्यावच्छेदकभावस्य संसर्गविधया भाने तद्विरहनिश्चयस्य

[41] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 701

[42] तत्रैव, पृ 701-702

प्रतिबन्धकत्वाभावेन अवच्छेद्यावच्छेदकभावविरहानिश्चयस्य योग्यतात्वाभावात्। तथाहि उक्तम् – **"कश्चित्तु व्यभिचारानिर्णयपदमवच्छेद्यावच्छेदकभावविरहानिश्चयपरतया व्याकुरुते। तन्न, अवच्छेद्यावच्छेदकभावस्य संसर्गविधया भाने तद्विरहनिश्चयस्याविरोधित्वात्।"**[43] इति।

न च तथापि वह्नित्वादिधर्मिकावच्छेदकतासम्बन्धावच्छिन्नजन्यत्वाभावानिश्चयदशायामेव तादृशसामग्र्याः सामान्यधर्मावच्छेदेन कार्यकारणभावग्राहकत्वमस्तु इति वाच्यम्, वह्निः तृणजन्य इति स्वरूपतो वह्नित्वात्मकधर्मितावच्छेदकत्वावगाहिज्ञानस्य वह्नित्वं धर्मितावच्छेदकतासम्बन्धावच्छिन्नजन्यत्वाभावनिश्चयाभाववदिति ज्ञानीयधर्मितावच्छेदकप्रकारेण भासमानवह्नित्वत्वाविषयकतया तत्प्रतिबध्यत्वासम्भवेन तस्यापि योग्यतात्वविरहात्।

तथा च, तृणजन्यतावच्छेदकत्वं वह्नित्वे न सिद्ध्यति। वह्नित्वं तृणजन्यत्वाभाववद्वृत्तिरिति व्यभिचारज्ञानसामान्यस्य प्रतिबन्धकतया तदभावस्य प्रतिबन्धकाभावविधया कारणत्वेन तद्विरहात्। न चैवमपि वह्निधूमयोः तद्व्यक्तित्वेनैव कार्य्यकारणभावोऽस्तु व्यभिचारनिर्णयाभावस्य सत्त्वादिति वाच्यम्, यावद्व्यक्तिषु अन्वयव्यतिरेकानुविधायित्वं गृहीतम्, तद्व्यक्तित्वस्य तावद्व्यक्तिसाधारणत्वाभावेन व्यक्त्यन्तरे पुनस्तद्व्यक्तित्वेन कार्यकारणभावकल्पनायाः आवश्यकतया गौरवम्। धूमत्ववह्नित्वाभ्यां कार्यकारणभावकल्पनायां तु पुनः कार्यकारणभावाकल्पनेन लाघवेन धर्मान्तरे

[43] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 702

अवच्छेदकत्वकल्पने लाघवज्ञानस्य तद्धर्मे अवच्छेदकत्वकल्पने प्रतिबन्धकत्वेन लाघवज्ञानाभावस्य प्रतिबन्धकाभावविधया कारणत्वेन तद्विरहात् वह्निधूमयोः तद्व्यक्तित्वेन कार्यकारणभावासम्भवात्।

न च तथापि यावद्व्यक्तिषु अन्यव्यतिरेकानुविधायित्वं गृहीतम्, तावत्साधारणस्य आरश्यकान्यदण्डत्वस्य सत्त्वेन घटं प्रति आरण्यकान्यदण्डत्वेनैव कारणत्वमस्तु इति वाच्यम्, आरण्यकान्यदण्डत्वेनैव कार्यकारणभावे अरण्यकान्यत्वदण्डत्वयोः अवछेदकत्व-कल्पने गौरवम्। दण्डत्वस्य अवच्छेदकत्वकल्पने एकस्मिन् एव अवछेदकत्वकल्पनात् लाघवमिति दण्डत्वोपस्थितिदशायाम्, आरण्यकाऽन्यदण्डत्वेन कारणत्वकल्पनस्य अयुक्तत्वात्। तथाहि गदाधरेण उक्तम् – **“न च वह्नित्वादिधर्मिकावच्छेदकता-सम्बन्धावच्छिन्नजन्यत्वाभावानिश्चयपरमेव तदास्तामिति वाच्यम्, वह्नित्वाद्यवच्छेदेन जन्यतावगाहिनः स्वरूपतो वहित्वाद्यात्मकधर्मितावच्छेदकावगाहिज्ञानस्य ताशाभावग्रह-धर्मितावच्छेदकप्रकारेण वह्नित्वत्वाद्यविषयकतया तत्प्रतिबध्यत्वासम्भवात्। अनुगतागुरु-विशेषान्तरानुपस्थितीति। यावत्स्वन्वयव्यतिरेकानुविधायित्वं गृहीतं तत्साधारणस्य सामान्यधर्मापेक्षया अगुरोस्तन्नयूनवृत्तिधर्मस्य स्थितीत्यर्थः।**

**एतेन विशिष्टानुभवत्वाद्युपस्थितिदशायां तद्व्यापकविशिष्टज्ञानत्वावच्छेदेन विशेषणशानादिजन्यताग्रहो निरस्तः। न हि तत्र स्मरणे व्यभिचारनिश्चयः सम्भवति, प्रत्यक्षस्येव स्मरणस्यापि निर्विकल्पकरूपस्य सम्भवात्। प्रकृते धूमनिष्ठसत्ताया यावत्सु वह्न्यन्वयव्यतिरेकानुविधायित्वग्रहस्तावद्धूमान्यतमत्वस्य द्रव्यत्वादेश्चोपस्थितिसम्भवात्**

**तदुपस्थितिसत्त्वेऽपि तद्ग्रहोपपत्तये विशेषणत्रयानुसरणम्। तादृशधर्मोपस्थितिसत्त्वे च न तदपेक्षयाऽधिकदेशवृत्तिधर्मस्यावच्छेदकत्वग्रहः सम्भवति, सामान्यधर्मस्यावच्छेदकत्वग्रहेऽवच्छेद्यजन्यतायास्तदधिकरणीभूताधिकदेशवृत्तित्वकल्पने गौरवम्, विशेषधर्मस्य तथात्वे तु तदकल्पनेन लाघवमिति प्रतिसन्धानेन प्रतिबन्धादिति तादृशधर्मोपस्थितिविरहापेक्षा। एतादृशलाघवज्ञान एव धर्मान्तरस्य न्यूनवृत्तित्वमुपयुज्यत इति तदभिहितम्। एवं धर्मान्तरस्य शरीरगौरवे तद्घटकनानावस्तुष्ववच्छेदकतायाः कल्पनीयतया गृहीतान्वयव्यतिरेक कार्यान्तरावृत्तित्वे च कार्यान्तरेऽन्यधर्मावच्छेदेन कार्यत्वान्तरस्य कल्पनीयतया नोक्तलाघवावकाश इत्यतोऽनुगतात्वागुरुशरीरत्वेऽपि तादृशलाघवज्ञान उपयुज्येते इति ध्येयम्।"**[44] इति।

एवं धूमत्वोपस्थितिदशायां धूमत्वप्रकारकप्रमाविशेष्यत्वेन न कार्यकारणभावग्रहः। तादृशविशेष्यत्वे जन्यत्वावच्छेदकत्वकल्पने जन्यतानिरूपितपरम्परया अवच्छेदकतायाः तद्घटकपदार्थमात्रे कल्पनीयतया गौरवम्। धूमत्वस्यावच्छेदकत्वकल्पने तदकल्पनाल्लाघवं लाघवज्ञानस्य समनियतधर्मान्तरेऽवच्छेदकत्वकल्पनायां प्रतिबन्धकत्वेन तदभावस्य प्रतिबन्धकाभावविधया कारणत्वेन तादृशकारणाभावान्न समनियतगुरुधर्मे अवच्छेदकत्वकल्पनम्। तथा च निरुक्तम् – **"तत्तद्धूमत्वतत्तद्वह्नित्वादीनां कार्यकारणभावावच्छेदकत्वे नानाकार्यकारणभावकल्पने गौरवम्, धूमत्ववह्नित्वयोस्तदवच्छेदकत्वे पुनस्तदैक्येन लाघवमित्यादिप्रतिसन्धानेत्यर्थः। ईदृशं प्रतिसन्धानम्**

[44] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 702-703

**एवकारलभ्यविशेषधर्मावच्छेदेन कार्यकारणभावाग्रह उपयुज्यते। आदिपदात् समनियत-धर्मान्तरापेक्षया गौरवप्रतिसन्धानाभावपरिग्रहः तेन धूमत्वाद्यपेक्षया गुरुधूमत्वादि-समनियतधूमत्वादिप्रकारकप्रमाविशेष्यत्वादिरूपेण वह्न्यादिजन्यत्वग्रहनिरासः।"**[45] इति।

एवम् पृथिवीत्वोपस्थितिदशायां गन्धकारणतावच्छेदकत्वम् अष्टद्रव्यातिरिक्त-द्रव्यत्वे न कल्प्यते किन्तु पृथिवीत्व एव।

न च यत्र धूमद्व्यणुकमुत्पाद्य नष्टे वह्नौ ततस्तादृशद्व्यणुकैः परस्परसंयोगक्रमेण महाधूमोत्पत्तिः, तत्र महाधूमे वह्निजन्यताविरहेऽपि धूमत्वस्य विद्यमानतया धूमत्वे व्यभिचारनिर्णयसत्त्वात्, धूमत्ववह्नित्वाभ्यां कार्यकारणभावग्रहो नैव भवितुमर्हतीति वाच्यम्, धूमत्वस्य नानात्वात्। वह्निजन्यताऽवच्छेदकतया सिद्धधूमत्वजातेः अव्यभिचारित्वात् । कस्यचिद्धूमत्वस्य व्यभिचारित्वेऽपि क्षतिविरहात्।

नन्वेवमपि धूमसमवायिनि कारणतावच्छेदकसंयोगसम्बन्धेन धूमत्ववह्नित्वाभ्यां कार्यकारणभावग्रहो दुर्घट एवेति वाच्यम्, दण्डस्य घटजनकतायां चक्रभ्रम्यादि-कपालद्वयसंयोगपर्य्यन्तमिव वह्नेर्धूमजनकतायां स्वजन्यरूपविशेषपरावृत्यादि-तत्तत्द्धूमावयवसंयोगपर्यन्तं कारणतावच्छेदकः सम्बन्धः।

---

[45] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 702-703

तथा च स्वजन्यरूपविशेषपरावृत्तिसम्बन्धेन धूमसमवायिन्यपि वह्नेः सत्वात् कारणतावच्छेदकसम्बन्धाऽननुगमेऽपि क्षत्यभावाद्धूमत्ववह्नित्वाभ्यां कार्यकारणभाव-ग्रहोपपत्तेः।

न च आर्द्रेन्धनसंयोगाद्यभावेऽपि कालिकेन वह्नेः सत्त्वात् कालिकेन धूमोत्पत्त्यापत्तिरिति वाच्यम्, तत्तद्धूमं प्रति आर्द्रेन्धनसंयोगदेरपि सहकारिकारणत्वेन व्यापकधर्मावच्छिन्नकार्ये जननीये व्याप्यधर्मावच्छिन्नकार्योत्पादकसामग्र्याः अपेक्षितत्वेन अदोषात्। न च व्याप्यधर्मावच्छिन्नकार्य्योत्पादकसामग्रीत्वेन अपेक्षितत्वे कुलालपितुरिव चतुर्थान्यथासिद्धत्वापत्तिरिति वाच्यम्, व्याप्यधर्मावच्छिन्नकार्योत्पादकसामग्रीत्वस्य परिचायकतया तत्तद्व्यक्तित्वेनैव व्याप्यधर्मावच्छिन्नकार्योत्पादकस्य व्यापकधर्मावच्छिन्न-कार्ये जननीये कारणत्वोपगमात्।

न च तथापि सामग्र्याः कारणसमुदायरूपतया नैकेन सम्बन्धेन अपेक्षितत्वं सम्भवति सामग्र्या एक विशिष्टापरत्वरूपत्वेऽपि विनिगमनाविरहेण अनेकरूपतया नैकेन सम्बन्धेन अपेक्षितत्वं सम्भवति। नानासम्बन्धेन अपेक्षितत्वे वरं स्वजन्यरूपविशेष-परावृत्त्याद्यननुगतसम्बन्धेन वह्नेः कारणत्वकल्पनम् इति वाच्यम्, स्वजन्यकार्य्यव्याप्यत्वेन व्याप्यधर्मावच्छिन्नकार्य्योत्पादककारणस्य संयोगाद्येकसम्बन्धेनैव वह्नेः कारणत्वोपगमात्।

समवायेन धूमत्वाऽवच्छिन्नं प्रति स्वजन्यरूपवदवच्छेद्यसंयोगसम्बन्धेन वह्नेः कारणत्वकल्पनेन धूमसमवायिमात्रे वह्निजन्यरूपविशेषवत् परमाण्वन्तरावच्छेद्यसंयोगस्य

सत्त्वात्। धूमद्व्यणुकसमवायिन्यपि स्वजन्यरूपविशेषवत् परमाण्वन्तरावच्छेद्य संयोग-सम्बन्धेन वह्नेः सत्त्वात्।

## ५.३.१८. धूमत्वेन वह्निजन्यत्वसाधने बाधकोपस्थापनम्

ननु विशेषाणां कार्य्यकारणभावग्राहकसामग्री यदि व्यभिचारानिर्णयादि-सहकारेण सामान्यधर्माऽवच्छेदेन कार्य्यकारणभावग्रहं जनयति तदा धूमनिष्ठवह्न्यन्वय-व्यतिरेकानुविधायित्वग्रहघटितसामग्री द्रव्यत्ववह्नित्वाभ्यामेव कार्य्यकारणभावग्रहं कुतो न जनयेदिति शङ्का जायते। इयं शङ्का न युक्ता। तथा च, द्रव्यत्वे वह्निजन्यतावच्छेदकत्व-कल्पने सकलद्रव्ये वह्निजन्यतायाः सम्बन्धकल्पनाप्रसक्त्या गौरवम्। धूमत्वे वह्निजन्यतावच्छेदकत्वकल्पने धूममात्रे वह्निजन्यतायाः सम्बन्धस्य कल्पनीयतया लाघवमिति। एवमत्र लाघवज्ञानस्यैव प्रतिबन्धकत्वं बोध्यम्।

यावद्व्यक्तिषु अन्वयव्यतिरेकानुविधायित्वं गृह्यते तावद्व्यक्तिवृत्ति-सामान्यधर्मापेक्षया लघुशरीरकन्यूनवृत्तिधर्मानुपस्थितिदशायामेव सामान्यधर्मावच्छेदेन कार्यकारणभावग्रहजनकत्वं तादृशसामग्र्याः, न तु तदुपस्थितिदशायाम्।

प्रकृते द्रव्यत्वापेक्षया न्यूनवृत्तिधूमत्वस्य उपस्थितिसत्त्वेन धूमत्वावच्छिन्नोत्पादक-सामग्र्याः द्रव्यत्वेन कार्यकारणभावग्राहकत्वाऽसम्भवः।

न चैवमपि विशिष्टबुद्धौ विशेषणज्ञानस्य जनकत्वं ज्ञानत्वेनैव स्यात्। एवं विशिष्टबुद्धेर्जन्यत्वमपि विशिष्टज्ञानत्वेनैव स्यात् न तु विशिष्टानुभवत्वेन, अनुभवत्वस्य ज्ञानत्वापेक्षया लघुशरीरकत्वादिति वाच्यम्, शरीरकृतगुरुधर्मे अवच्छेदकत्वकल्पने शरीरघटकपदार्थमात्रे अवच्छेदकत्वं कल्पनीयम्। व्यापकधर्मे अवच्छेदकत्वकल्पने व्यापकाश्रये ततोऽधिकसंख्याके पदार्थे जन्यतायाः जनकतायाः वा सम्बन्धः कल्पनीय इति गौरवेण विशेषधर्मपुरस्कारेणैव कार्य्यकारणभावग्रह इति तादृशविशेष-धर्मोपस्थितिदशायाम्, सामान्यधर्मपुरस्कारेण कार्यकारणभावग्रहस्यायुक्तत्वात्।

तथा च, प्रकृते विशिष्टानुभवत्वादिविशेषधर्मोपस्थितिदशायां विशिष्टज्ञानत्वादि-सामान्यरूपेण एवं विशेषणज्ञानत्वादिविशेषधर्मोस्थितिदशायां ज्ञानत्वादिसामान्यरूपेण कार्य्यकारणभावग्रहस्यासम्भवात् विशिष्टानुभवत्वादिविशेषधर्मपुरस्कारेणैव कार्यकारण-भावग्रहः।

एवञ्च तर्काधीनविरोधिशङ्कानिवृत्तौ सामानाधिकरण्येन अन्वयव्यतिरेकानु-विधायित्वग्रहघटिता विशेषाणां कार्य्यकारणभावग्राहिका सामग्री, सामान्यव्यभिचारा-निर्णयानुगतागुरुविशेषान्तरानुपस्थितिलाघवप्रतिसन्धानगौरवज्ञानाभावसहकारेण सामान्यधर्मावच्छेदेनैव कार्यकारणभावग्रहं जनयतीति सारः।

ननु एकवह्निधूमयोः अन्वयव्यतिरेकानुविधायित्वदर्शनेन अन्ययोरपि वह्निधूमयोः कार्यकारणभावग्रहे अन्यत्वाविशेषात् एकवह्निधूमयोः अन्वयव्यतिरेकानुविधायित्वदर्शनं घटदण्डयोरपि कार्यकारणभावग्रहं जनयेदिति चेन्न, तत्सामान्यालिङ्गितयोर्विशेषयोः

अन्वयव्यतिरेकग्रहः पूर्वोक्तसहकारिसमवधाने तत्सामान्यावच्छेदेनैव कार्य्यकारणभावग्रह इति सामान्यविशेषभावस्य नियामकत्वेन अन्यत्वमात्रस्य नियामकत्वाभावेन चातिप्रसङ्गाभावात्।

न च 'क्वचिद् वह्निं विनापि भविष्यती'त्यादिशङ्कायाः धूमत्वसामानाधिकरण्येन जायमानायाः सत्त्वात्, धूमत्वावच्छेदेन कार्यकारणभावग्रहो नैव भवितुमर्हतीति वाच्यम्, यथा 'स्थाणुर्वा पुरुषो वे'ति संशयदशायाम्, पुरुषत्वव्याप्यकरचरणादिमान् अयमिति विशेषधर्मदर्शने अनुभवसिद्धपुरुषत्वप्रत्यक्षोपपत्तये विशेषधर्मदर्शनाभावविशिष्टाया एव 'स्थाणुर्वा पुरुषो वे'ति शङ्कायाः प्रतिबन्धकत्वं कल्प्यते, न तु तदविशिष्टायाः इति विशेषधर्मदर्शनरूपोत्तेजकसमवधाने सत्यामपि विरोधिशङ्कायां पुरुषत्वप्रत्यक्षमुपपद्यते। तथैव धूमत्वसामानाधिकरण्येन वह्न्यजन्यत्वशङ्कासत्त्वे धूमत्वापेक्षया गुरुशरीरः अन्यतमत्वादिरूपो धर्मः। नानाविशेषधर्माः तद्व्यक्तित्वादयो वा अवच्छेदकाः स्युरिति गौरवम्, धूमत्वावच्छेदेन अवच्छेदकत्वकल्पने च न तथेति लाघवमिति लाघवज्ञानाभावविशिष्टाया एवं धूमत्वसामानाधिकरण्येन वह्न्यजन्यत्वशङ्कायाः, धूमत्वावच्छेदेन वह्निजन्यत्वग्रहे अनुभवसिद्धफलान्यथाऽनुपपत्त्या प्रतिबन्धकत्वं कल्प्यते।

तथा च विशेशधर्मदर्शनस्य इव पूर्वोक्तलाघवज्ञानस्यापि उत्तेजकतया लाघवज्ञानादिरूपोत्तेजकसमवधाने विरोधिशङ्कासत्त्वेऽपि धूमत्वावच्छेदेन कार्य्यकारणभावग्रहोपपत्तेः। एतन्मूलकमेव 'यद्विशेषयोः कार्य्यकारणभावः तत्सामान्ययोरपि' इति न्यायः।

नन्वेवं सति बहिरिन्द्रियजन्यचाक्षुषप्रत्यक्षं प्रति रूपस्य कारणत्वेन, बहिरिन्द्रियजन्यत्वाचप्रत्यक्षं प्रति स्पर्शस्य कारणत्वेन बहिरिन्द्रियजन्यप्रत्यक्षत्वाऽवच्छिन्नं प्रति गुणत्वेन कारणत्वापत्त्या गुणस्य परमाणावपि सत्त्वेन तस्यापि प्रत्यक्षत्वापत्तिरिति चेन्न, असति बाधके इति प्रपूर्य्य 'यद्विशेषयोः कार्यकारणभावग्रहः असति बाधके तत्सामान्ययोरपि' इति न्यायस्वरूपाभ्युपगमेन अदोषात्। गुणत्वेन कारणतायां परमाणोः प्रत्यक्षापत्तिरूपबाधकसत्त्वेन विशेषयोः कार्य्यकारणभावसत्त्वेऽपि सामान्ययो-स्तदकल्पनात्।

तथा च सामान्यव्यभिचारनिर्णयादिसत्त्वे सामान्यधर्मसामानाधिकरण्येन अन्वय-व्यतिरेकानुविधायित्वग्रहात्, विशेषधर्मावच्छेदेनैव कार्य्यकारणभावग्रहः। सामान्य-व्यभिचारनिर्णयादिसत्वे तु सामान्यधर्मसामानाधिकरण्येन अन्वयव्यतिरेकानुविधायित्व-ग्रहादपि सामान्यधर्मावच्छेदेनैव कार्यकारणभावग्रह इति विशेषधर्मावच्छेदेन कार्यकारण-भावग्रहस्य न गगनकुसुमायमानता। एतत्सर्वं विचार्य भट्टाचार्यैः उक्तम् - **“ननु सामान्यधर्मसामानाधिकरण्यमात्रेणान्वयव्यतिरेकग्रहस्य सामान्यव्यभिचारानिर्णयादि-सहकारेण सामान्यधर्मावच्छेदेन कार्यकारणभावग्राहकत्वमसिद्धमित्यत आह। प्रामाणिकौ चेति। अनुभवसिद्धावेवेत्यर्थः। तथैव सामान्यधर्मावच्छिन्नकार्यकारणभावजन्यत्वाभाव-शङ्कारूपप्रतिबन्धकसत्त्वान्नोक्तसामग्रीतः सामान्यधर्मावच्छेदेन कार्यकारणभावग्रहः सम्भवतीत्यत आह। फलबलेनेति। अनुभवसिद्धफलान्यथानुपपत्त्येत्यर्थः। लाघव-ज्ञानादिशून्याया इति। कस्यचिद् धूमस्य वह्न्यजन्यत्वे धूमत्वापेक्षया गुरुशरीरः कश्चन धर्मो**

**नानाविशेषधर्मा वा जन्यतावच्छेदकाः स्युरिति गौरवम्। धूमत्वावच्छेदेन तज्जन्यत्वे च न तथेति लाघवमित्यादिलाघव ज्ञानाद्यभावविशिष्टाया इत्यर्थः। आदिपदाद्विशेषदर्शन-परिग्रहः। सामान्यव्यभिचारशङ्काया धूमत्वादिसामानाधिकरण्येन वह्न्याद्यजन्यत्व-शङ्कायाः। प्रतिबन्धकत्वमित्यस्य धूमत्वाद्यवच्छदेन वह्न्यादिजन्यत्वग्रह इत्यादिः।”**[46] इति।

ननु ग्राह्यसंशयग्राह्याभावनिश्चययोरेकरूपेणैव विपरीतनिश्चयत्वावच्छिन्नं प्रति प्रतिबन्धकतया विशेषधर्मदर्शनलाघवज्ञानगौरवज्ञानाभावसत्त्वे, ग्राह्यसंशयस्य प्रतिबन्धकत्ववारणाय विशेषधर्मदर्शनाभावविशिष्टलाघवज्ञानविशिष्टगौरवज्ञानाभाव-विशिष्टतत्प्रकारकज्ञानत्वेन विपरीतनिश्चयत्वावच्छिन्नं प्रति प्रतिबन्धकत्वं वाच्यमिति विशेषधर्मदर्शनादेः उत्तेजकतया विशेषधर्मदर्शनादिसत्त्वे संशयसत्त्वेऽपि यथा विपरीतनिश्चयो जायते तथैव लाघवज्ञानादिसत्त्वे बाधग्रहदशायामपि विपरीतनिश्चयो जायेतेति चेन्न संशयोत्तरं संशयोत्सत्तेः। विपरीतनिश्चयानन्तर संशयानुपत्तेश्च संशयनिश्चय-साधारणतत्प्रकारकज्ञानत्वेन प्रतिबन्धकत्वाकल्पनात्संशयनिश्चयसाधारणविपरीतज्ञानत्वेन प्रतिबन्धकत्वाकल्पनाच्च।

किन्तु पृथक् पृथगेव तत्प्रकारकज्ञानत्वावच्छिन्नं प्रति विपरीतनिश्चयत्वेन, तत्प्रकारकनिश्चयत्वावच्छिन्नं प्रति ग्राह्यसंशयत्वेन प्रतिबध्यप्रतिबन्धकभावो वक्तव्यः।

---

[46] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 703

तथा च, तत्प्रकारकनिश्चयत्वावच्छिन्नप्रतिबन्धकतावच्छेदककोटौ लाघव-ज्ञानाभावादिवैशिष्ट्यं निवेश्यते। तत्प्रकारकज्ञानत्वावच्छिन्नप्रतिबन्धकतावच्छेदककोटौ तु लाघवज्ञानाभावादिवैशिष्ट्यं नैव निवेश्यते इति लाघवज्ञानसत्त्वेऽपि वाधग्रहदशायां तत्प्रकारकनिश्चयापत्तिविरहोऽप्युपपद्यते।

न चैवं सति विपरीतभ्रमाऽनन्तरं विशेषदर्शनेऽपि प्रत्यक्षनिश्चयो न स्यादिति वाच्यम्, इष्टापत्तेः। भ्रमनाशानन्तरमेव प्रत्यक्षनिश्चयोपगमात्। क्षणैकविलम्बस्य शपथमात्रनिर्णेतव्यत्वेन क्षत्यभावात्। ग्राह्यसंशयस्य प्रतिबन्धकत्वानभ्युपगमे तु, ग्राह्यसंशयदशायां लाघवज्ञादिसत्त्वे निश्चयोपपत्तये लाघवज्ञानस्य विशेषदर्शनवत् विपरीतभानप्रतिबन्धकत्वमेव अभ्युपेयम्, न तूत्तेजकत्वम्। तदुक्तम् – **"न चैवं लाघवज्ञानसत्त्वे ग्राह्याभावनिश्चयदशायामपि प्रत्यक्षनिश्चयापत्तिः, संशयविपरीतनिश्चय-साधारणविपरीतज्ञानत्वेनैव प्रतिबन्धकतया तस्य प्रतिबन्धकत्वान्तराभावादिति वाच्यम्। विपरीतनिश्चयानन्तरं संशयादिवारणाय संशयादिसाधारणज्ञानत्वावच्छिन्नं प्रति विपरीत-निश्चयत्वेन स्वतन्त्रप्रतिबन्धकताकल्पनस्यावश्यकतया तत्र च लाघवज्ञानाद्यभाव-वैशिष्ट्यानिवेशात् तादृशप्रतिबन्धकतावच्छेदकावच्छिन्नसत्त्वेनोक्तापत्त्यनवकाशात् भ्रमोत्तरं विशेषदर्शने जातेऽपि भ्रमनाशानन्तरमेव प्रत्यक्षनिश्चयोपगमेन निश्चयप्रतिबध्यता-वच्छेदककोटौ प्रत्यक्षनिश्चयभेदानिवेशात्। इदं च प्रत्यक्षनिश्चये ग्राह्यसंशयस्य**

**प्रतिबन्धकतामभ्युपेत्य अभिहितम्। स्वमते तु विशेषदर्शनवल्लाघवज्ञानस्यापि विपरीतकोटिभाननिवर्तकत्वेन निश्चयोपयोगिता बोध्या।"**[47] इति।

साधारणधर्मदर्शनादिसंशयकारणसत्त्वे धूमत्वसामानाधिकरण्येन वह्न्यसमवहित-जन्यत्वसंशयात् धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वविशिष्टजन्यत्वरूपापाद्यव्यतिरेक-निश्चयाभावेन कारणाभावाद् धूमत्वसामानाधिकरण्येन आपत्तिर्नैव भवितुमर्हतीति आपत्तिबलेन धूमत्वावच्छेदेन वह्निजन्यत्वनिर्णयानुत्पत्त्या धूमत्वसामानाधिकरण्येन वह्निजन्यत्वनिर्णयेन धूमत्वसामानाधिकरण्येन वह्निव्यभिचारसंशयानिवृत्त्या धूमत्वाव-च्छेदेन वह्निव्याप्तिनिश्चयो न स्यादतो विशेषाणां कार्यकारणभावग्राहकसामग्र्याः लाघवज्ञानादिसहकारेण सामान्यधर्मावच्छेदेन कार्यकारणभावग्राहकत्वाभिधान-मावश्यकम्।

साधारणधर्मदर्शनाद्यसत्वे तु कारणाभावादेव वह्न्यसमवहितजन्यत्वसंशयानुदयेन धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वविशिष्टजन्यत्वरूपापाद्यव्यतिरेकनिश्चयाद् धूमत्व-सामानाधिकरण्येन आपादकवत्ताज्ञानसहकाराद् धूमत्वसामानाधिकरण्येन आपत्त्युत्पत्तिः, तथैव धूमत्वावच्छेदेन वह्निजन्यत्वनिर्णयात् धूमत्वसामानाधिकरण्येन व्यभिचार-संशयप्रतिरोधात् धूमत्वावच्छेदेन वह्निव्याप्तिनिश्चयः सुलभ एवेति विशेषाणां कार्य्यकारणभावग्राहकसामग्र्याः सामान्यधर्मावच्छेदेन कार्य्यकारणभावग्राहकत्वाभि-धानस्य नावश्यकता। उक्तं च – **"यत्रोपदर्शिततर्कावतारपूर्वमेव धूमत्वसामानाधिकरण्येन**

---

[47] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 703-704

**वह्न्यसमवहितजन्यत्वशङ्काजनकसाधारणधर्मदर्शनात्मकदोषादिसमवधानं दैववशाद्भवति तत्र तादृशशङ्काविरहप्रयोजकस्य दुर्लभतया धूमत्वावच्छेदनापाद्यव्यतिरेकनिश्चयासम्भवात् सामानाधिकरण्यमात्रावगाहितर्को नावतरितुमीष्ट इति तादृशस्थलाभिप्रायकोऽयं सामान्यधर्मावच्छेदेन जन्यताग्रहोपायप्रयासः। यत्र च तर्कात् पूर्व दोषादि-विरहात्तादृशशङ्कानुदयस्तत्र धमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वनिश्चयात्तत्सामानाधि-करण्यमात्रेण आपत्तिः सुलभेति तत एव सामान्यकार्यकारणभावः सुग्रहः। तदभिप्रायेण क्वचिद्वह्निं विनापि भविष्यतीत्याकारिकाया अंशत इष्टापत्तिशङ्कायाः तर्क-विरोधित्वाभिधानसङ्गतिः।"**[48] इति।

पक्षतावच्छेदकसामानाधिकरण्येन आपत्तिमनुसन्धायैव 'क्वचिद्वह्निं विनापि भविष्यती'ति पक्षतावच्छेदकसामानाधिकरण्येन शङ्कायाः तर्कविरोधित्वाभिधानम्। पक्षतावच्छेदकावच्छेदेन आपत्तेः उल्लिखितत्वे तु – पक्षतावच्छेदकावच्छेदेन आपत्तौ पक्षतावच्छेदकसामानाधिकरण्येन शङ्काया अविरोधित्वेन तदसंगतमेव स्यात्।

न च पक्षतावच्छेदकसामानाधिकरण्येन आपत्तेस्तात्पर्य्यविषयत्वे पक्षताव-च्छेदकावच्छेदेन शङ्काया एव तद्विरोधित्वेन तादृशशङ्काविरोधित्वस्य पक्षतावच्छेदकाव-च्छेदेन अन्वयव्यतिरेकानुविधायित्वग्रह एव सत्वेन पक्षतावच्छेदकावच्छेदेन अन्वय-व्यतिरेकानुविधायित्वग्रहस्य असम्भवेन, पक्षतावच्छेदकसामानाधिकरण्येन अन्वय-व्यतिरेकग्रहसम्भवेऽपि तस्य तादृशशङ्काप्रतिबन्धकत्वाभावेन अन्वयव्यतिरेकानुविधायित्व-

---

[48] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 704

ग्रहस्य शङ्काविरोधित्वाभिधानम् असङ्गतमेव स्यादिति वाच्यम्, अन्वयव्यतिरेकानुविधायित्वग्रहपदस्य तादृशशङ्काविरहप्रयोजकसाधारणधर्मदर्शनादिकारणाभावस्य अप्युपलक्षकत्वात्।

ननु 'कचिद्वह्निविनाऽपि भविष्यति' इति द्वितीयशङ्कापि 'अवह्नेरेव भविष्यती'ति प्रथमशङ्कावत् पक्षतावच्छेदकावच्छेदेन वह्न्यसमवहिताजन्यत्वकोटिका एवास्तु, शङ्कयोरभेदस्तु प्रथमशङ्कायाम् एवार्थान्तर्भावेण स्वाव्यवहितप्राक्कालावच्छिन्नवह्न्यभाववदुत्पत्तिकत्वं कोटिरित्येतावतैव परिहरणीय इति चेन्न, क्वचित्पदस्वारस्यापलापात्।

न चैवमपि पक्षतावच्छेदकसामानाधिकरण्येन आपत्तौ पक्षतावच्छेदकावच्छेदेन आपाद्यव्यतिरेकनिश्चयस्य कारणत्वेन धूमत्वसामानाधिकरण्येन वह्न्यसमवहितजन्यत्वशङ्कासत्त्वे पक्षतावच्छेदकावच्छेदेन वह्न्यसमवहिताज्जन्यत्वरूपापाद्यव्यतिरेकनिश्चयाभावेन पक्षतावच्छेदकसामानाधिकरण्येन आपत्तिर्नैव भवितुमर्हति, पक्षतावच्छेदकसामानाधिकरण्येन आपाद्यव्यतिरेकनिश्चयात् पक्षतावच्छेदकावच्छेदेन आपत्तिसम्भवेऽपि पक्षतावच्छेदकावच्छेदेन आपत्तेः पक्षतावच्छेदकसामानाधिकरण्यावगाह्यापादकसंशयाविरोधित्वेन तादृशापत्तेः अकिञ्चित्करत्वादिति वाच्यम्, पूर्वोक्तरीत्या हुताशनरासभादिन्यायेन क्वचिद्धूमानुत्पादप्रयोजकत्वेन अवधृतस्य वह्निविरहस्यैव धूमानुत्पत्तिसामान्यं प्रति लाघवात् प्रयोजकत्वकल्पनेन इतराप्रयोज्यसमवधानकालीनधूमानुत्पादप्रयोजकत्वस्य वह्न्यभावे निर्णयात् वह्न्यभावप्रयुक्ताभावप्रतियोगिकत्वबुद्धेः विशेषधर्मदर्शनविधया क्वचिद्वह्निं, क्वचिदितरद् आसाद्य जनकत्वसन्देहस्य निवर्तकत्व-

कल्पनेन च विरोधिशङ्कानिराकरणसम्भवेन धूमत्वावच्छेदेन जन्यत्वविशिष्टस्य वह्न्यसमवहिताजन्यत्वस्य, वह्न्यसमवहिताजन्यत्वविशिष्टस्य वा आपाद्यव्यतिरेकरूपस्य वह्न्यसमवहितजन्यत्वाद्यर्थकस्य तर्कात्पूर्वमनिर्णयेऽपि वह्नियुक्तकारणकलापं विना अनुत्पद्यमानार्थकस्य तर्कात्पूर्वमानसबोधसम्भवेन धूमत्वसामानाधिकरण्येन आपत्तिसम्भवेन धूमत्वसामानाधिकरण्येन आपत्तेः धूमत्वसामानाधिकरण्येन वह्न्यजन्यत्वरूपापादकसंशयप्रतिरोधकत्वेन धूमत्वावच्छेदेन वह्निजन्यत्वनिश्चयोपपत्तिः। ननु धूमविशेषस्य पक्षत्वे लाघवज्ञानादिसहकारेण धूमविशेषवह्निविशेषयोः कार्य्यकारणभावग्राहकसामग्र्याः धूमसामान्यवह्निसामान्ययोः कार्य्यकारणभावग्रह-जनकत्वेऽपि सामान्यधर्मस्य पक्षतावच्छेदकत्वाभावेन पक्षतावच्छेदकावच्छिन्न एवं तर्कस्य आपादकाभावसाधकत्वेन तर्केण तत्तद्धूमत्वावच्छिन्न एव वह्निजन्यत्वस्य सिद्धिः स्यात्, न तु धूमसामान्ये।

ताद्दशसिद्धेश्च धूमसामान्ये वह्निसामान्यनिरूपितव्याप्तिनिश्चयविरोधिव्यभिचार-शङ्कानिवर्तकत्वाभावेन धूमसामान्ये वह्निसामान्यनिरूपितव्याप्तिनिश्चयो नैव भवितुमर्हतीति चेन्न, धूमसामान्यस्येव पक्षत्वाभ्युपगमात्।

न च तथापि धूमत्वसामानाधिकरण्येन वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयेन लाघवज्ञानादिसहकारेण धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वनिश्चये तत एव विपरीतज्ञानविषया वह्न्यसमवहितजन्यत्वशङ्कानिवृत्तिसम्भवेन धूमत्वावच्छेदेन वह्नि-

जन्यत्वनिश्चयस्य निरङ्कुशतया वह्न्यसमवहितजन्यत्वशङ्काविघटनद्वारा धूमत्वावच्छेदेन वह्निजन्यत्वसाधकस्य तर्कस्य वैयर्थ्यम्।

किञ्च, धूमत्वसामानाधिकरण्येन वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानेनैव लाघवज्ञानादिसहकारेण धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वञ्च गृह्यते तदा लाघवज्ञानादिसहकारेण धूमत्वसामानाधिकरण्येन वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानेनैव धूमत्वावच्छेदेन वह्निजन्यत्वमपि गृह्यतां किं तर्केण।

किञ्च, धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वनिश्चये लाघवज्ञानादिसहकारस्य आवश्यकत्वे लाघवज्ञानादिसहकारेण तत्तद्धूमत्वावच्छेदेन आपाद्यव्यतिरेकनिश्चय-जनिततर्कादिव धूमत्वावच्छेदेन वह्निजन्यत्वग्रहसम्भवेन क्लिष्टकल्पनं व्यर्थम्।

तद्धर्मावच्छेदेन तर्के तद्धर्मावच्छेदेन आपाद्यव्यतिरेकनिश्चयस्य कारणत्व-कल्पनायाम् लाघवज्ञानाद्यभावकालीनत्वस्य कार्यतावच्छेदके निवेशेनैव लाघवज्ञानादि-दशायाम् तत्तद्धर्मसामानाधिकरण्येन आपाद्यव्यतिरेकनिश्चयादपि तद्धर्मावच्छेदेन तर्क-सम्भवादिति वाच्यम्, तत्तद्धूमत्वावच्छिन्नस्यैव पक्षत्वाभ्युपगमात्।

तत्तद्वह्निधूमयोः अन्वयव्यतिरेकाविधायित्वनिश्चयस्य व्यावर्तकधर्मदर्शनविधयैव वह्न्यसमवहिताजन्यत्वशङ्कानिवर्तकत्वेन वह्नयसमवहिताजन्यत्वघटितसामग्रयाः लाघव-ज्ञानादिसहकारेण धूमत्वावच्छेदेन वह्निजन्यत्वनिर्णायकत्वस्यैव पूर्वोक्तस्य पूर्वोक्तरीत्या क्लिष्टकल्पनायामपि गतिविरहेण स्वीकरणीयत्वाच्च।

ननु तथापि आपाद्यव्यतिरेकनिश्चयघटकतया धूमे वह्न्यसमवहिताजन्यत्व-निश्चयस्य तर्कपूर्वमपेक्षणीयतया वह्न्यसमवहितजन्यत्वशङ्कासत्त्वे तदनुत्पत्त्या तर्को नैव भवितुमर्हतीति पूर्वोक्तहुताशनरासभादिन्यायेन वह्निसमवधाननियतेन्धनादिघटितसामग्र्यां धूमजनकत्वग्रहजनिते धूमे तादृशसामग्री जन्यत्वनिर्णयेऽपि वह्निसमवहितजन्यत्व-वह्न्यसमवहितजन्यत्वयोरविरोधात्, धूमे वह्निसमवहितसामग्रीजन्यत्वनिर्णयस्य वह्न्यसमवहितसामग्रीजन्यत्वशङ्काविरोधित्वाभावादिति चेन्न, हुताशनरासभादिन्यायेन एव वह्न्यघटितसामग्रयां धूमाजनकत्वनिर्णयजनिते धूमे वह्न्यसमवहिताजन्यत्वनिर्णये बाधकाऽभावात्।

तथा च, हुताशनरासभादिन्यायेन वह्न्यघटितेन्धनादिघटितसामग्र्यां धूमाजनकत्वग्रहजनिते धूमे वह्न्यघटितसामग्रयजन्यत्वनिश्चये सति जन्यत्वतुहेतुना धूमे वह्निसमवहितसामग्रीजन्यत्वनिश्चये धूमार्थिनो वह्निसमवहिते वह्न्यसमवहिते प्रवृत्तिनिवृत्ती उपपद्यते।

अथवा वह्न्यसमवहितजन्यत्वनिश्चये सति आपाद्यव्यतिरेकनिश्चयसम्पत्त्या तर्कोत्पत्तौ तर्केण आपादकाभावनिर्णयविधया धूमे वह्निसमवहितजन्यत्वनिश्चये धूमार्थिनो वह्निसमवहिते प्रवृत्तिः।

## ५.३.१९. तर्कवैयर्थ्याक्षेपसमाधानविचारः

अधुना तर्कवैयर्थ्याक्षेपसमाधानविचारः गदाधरदिशा प्रस्तूयते।

**<u>तर्कवैयर्थ्याक्षेपः</u>** - ननु वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य वह्न्यसमवहिताजन्यत्वव्याप्यधर्मदर्शनविधया वह्न्यसमवहिताजन्यत्वस्य असकृद् आवेदितत्वेन वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्यैव व्याप्यधर्मदर्शनधिया वह्न्यजन्यत्वशङ्कानिवर्तकत्वस्याऽपि सम्भवेन तर्कस्य वैयर्थ्यम्।

**<u>तर्कवैयर्थ्याक्षेपसमाधानम्</u>** – न च तर्कप्रयोजकीभूतापाद्यव्यतिरेकनिश्चयस्य वह्न्यसमवहिताजन्यत्वनिश्चयरूपतया वह्न्यन्वयव्यतिरेकानुविधायित्वविषयकत्वेन तदुत्तरं जायमाने मानसबोधात्मके तर्के प्रागुपस्थितस्य वह्न्यन्वव्यतिरेकानुविधायित्वस्य ज्ञानलक्षणासन्निकर्षेण भाने बाधकाभावेन तर्कस्यापि वह्न्यन्वयव्यतिरेकानुविधायित्वविषयकत्वेनैव जन्यत्वशङ्काप्रतिबन्धकत्वेन पृथक् प्रतिबन्धकत्वस्य तत्राभ्युपगमान्न दोष इति वाच्यम्। तथाहि दीधितिकृद्भिः उक्तम् – **“यत्तु अन्वयव्यतिरेकानुविधायित्वस्य ज्ञानमेव विशेषदर्शनतया शङ्काप्रतिबन्धकं तदेव तर्कघटकं तदिदमुक्तं यदि गृहीतान्वयव्यतिरेकं हेतुमतीति। तन्न। याद्दच्छिकस्य तदनुविधानस्य व्यभिचारित्वान्नियतस्य चोक्ताभेदसम्पादकत्वादिति वदन्ति। तच्चिन्त्यम्।”** इति। अत्र भट्टाचार्यैरेवं व्याख्यातम् – **“नन्वेवं वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चय एव धूमे वह्न्यजन्यत्वशङ्कामपि विशेषदर्शनतया निवर्तयिष्यति किं तर्कस्य प्रतिबन्धकत्वकल्पनेनेत्यत आह। तदैवेति। एवकारोऽप्यर्थे। अन्वयव्यतिरेकानुविधानमपीत्यर्थः। तर्कघटकं तर्कप्रयोजकीभूतज्ञानविषयतया तर्कनिर्वाहकम्। तथा च तर्कात्मके मानसज्ञाने प्रागुवस्थितपदार्थान्तराणामुपनयमर्यादया भाने बाधकाभावात्तदपि अन्वयव्यतिरेकाद्यनुविधान-**

**ज्ञानात्मकमिति तर्कस्य स्वातन्त्र्येण शङ्काप्रतिबन्धत्वविरहेऽपि विशेषदर्शनविधयैव तथात्वस्याक्षततया तर्कस्य शङ्कानिवर्तकत्वाभिप्रायेण मूले तदुपन्यासस्य नासङ्गतिः। तत्र स्वातन्त्र्येण शङ्का निवर्तकत्वे तात्पर्यानुपगमादित्याशयः।"** [49] इति।

**<u>पुनस्तर्कवैयर्थ्याक्षेपः</u>** – तर्कस्य पृथक्प्रतिबन्धकत्वानभ्युपगमेऽपि तर्कप्रयोजकीभूतापाद्यव्यतिरेकनिश्चयस्य वह्न्यन्वयव्यतिरेकानुविधायित्वविषयकत्वेन तत एव व्याप्यधर्मदर्शनविधया वह्न्यजन्यत्वशङ्कानिवृत्तिसम्भवेन तर्कवैयर्थ्यस्य दुरुद्धरत्वात्।

**<u>पुनस्तर्कवैयर्थ्याक्षेपसमाधानम्</u>** – न च केनापि कारणेन ज्ञानलक्षणासन्निकर्षेण प्रागुपस्थितस्यापि वह्न्यन्वयव्यतिरेकानुविधायित्वस्य तर्के अभाने तर्कपूर्वम् अन्वयव्यतिरेकानुविधायित्वग्रहसम्भवेऽपि तर्कदशायां सर्वत्र तत्सत्त्वे प्रमाणाभावेन तर्कस्य पृथक् प्रतिबन्धकत्वकल्पनाया आवश्यकतया यत्र तर्कपूर्वम् अन्वयव्यतिरेकनिश्चयो नास्ति तत्र वह्न्यसमवहितजन्यत्वसंशयनिवारणार्थं तर्कसार्थक्यसम्भवादिति वाच्यम्।

तद्व्यतिरेकसमानाधिकरणव्यतिरेकप्रतियोगित्वरूपस्य व्यतिरेकानुविधात्वस्य यादृशघटस्य वह्निसत्व एवोत्पत्तिः तादृशघटसाधारणतया वह्न्यसमवहितजन्यत्वाव्यावर्तकत्वेन वह्न्यसमवहितजन्यत्वशङ्कानिवर्तकत्वायोगात्।

न च वह्निव्यतिरेकव्यापकव्यतिरेकप्रतियोगित्वमेव वह्निव्यतिरेकानुविधायित्वं वाच्यम् तस्य च नान्तरीयकघटादिव्यावृत्तत्वेन वह्न्यसमवहितजन्यत्वव्यावर्तकतया भवति वह्न्यसमवहितजन्यत्वशङ्कानिवर्तकत्वमिति वाच्यम्, धूमत्वसामानाधिकरण्येन

---

[49] तत्त्वचिन्तामणौ, कीर्त्यानन्दझाम्पादिते, पृ 709-710

वह्निव्यभिचारसन्देहदशायाम् धूमाभावे वह्न्यभावव्यापकत्वग्रहासम्भवात्, लाघव-ज्ञानादिवशाद् धूमाभावे वह्न्यभावव्यापकत्वग्रहसम्भवेऽपि नियतान्वयव्यतिरेकानु-विधायित्वस्य जन्यतारूपतया तस्यान्यथैव उपपत्तौ तद्ग्राहकतर्कस्य वैयर्थ्यप्रसङ्गात्। तथाहि भट्टाचार्योक्तिः – **"न च तर्कपूर्वमन्वयव्यतिरेकानुविधानग्रहस्यावश्यकत्वेऽपि तर्कदशायां तत्सत्त्वानियमात्तत्प्रतिबन्धकतया सर्वत्र तर्कानन्तरवारणासम्भवात् तर्कस्यापि प्रतिबन्धकत्वकल्पनमावश्यकमिति वाच्यम्। एवं सति मूलस्यैव तादृशशङ्कास्थले शङ्कानिवृत्त्युपयोगित्वाभिप्रायकनासम्भवात्तदुपरि तर्कवैयर्थ्यशङ्काया एवानवतारात्। यत्र च कारणान्तरविरहाच्छङ्कानवतारस्तस्य स्वतःसिद्धशङ्काविरहस्थलतया मूलस्य तदन्यस्थल एव तर्कस्य शङ्कानिवर्तकत्वपरतया उभयसम्भेदस्थले तर्कसार्थक्यप्रदर्शनस्या-त्यन्तासङ्गतत्वाच्च। एवं च मिश्रग्रन्थस्यापि दर्शितदिशा यथाश्रुतार्थपरत्वमेव सम्यगित्यवधेयम्।"**[50] इति।

न चाऽन्यथासिद्ध्यनिरूपकत्वसहितस्यैव तस्य जन्यतात्मकत्वेन तथाभूतस्या-न्यथोपपत्त्यभावेन जन्यताग्राहकताकस्य आवश्यकत्वमिति वाच्यम्, नियतान्वय-व्यतिरेकानुविधायित्वमात्रस्यैव व्यभिचारव्यावर्तकत्वेन तन्निश्चयस्यैव व्याप्तिनिश्चय-सम्पादकत्वेन अपेक्षणीयतया अन्यथासिद्ध्यनिरूपकत्वसहितस्य जन्यतापदार्थस्य प्रकृते अकिञ्चित्करत्वेन तन्निर्णयस्य अनपेक्षितत्वेन तर्कवैयर्थ्यध्रौव्यात्।

---

[50] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 710

न चेदानीं तत्तद्धूमत्वस्यैव पक्षतावच्छेदकत्वेन तदवच्छेदेनैव आपाद्य-व्यतिरेकनिश्चयविधया वह्न्यसमवहिताजन्यत्वनिश्चयस्यापेक्षणीयतया तादृशनिश्चयविरोधि-वह्न्यसमवहितजन्यत्वशङ्कानिवर्तकत्वस्य तत्तद्धूमाभावे वह्न्यभावव्यापकतायाः सर्वानुमत-त्वेन वह्न्यभावव्यापकीभूताभावप्रतियोगित्वरूपवह्निनिरूपितनियतान्वयव्यतिरेकानु-विधायित्वे तत्तद्धूमरूपपक्षनिष्ठसम्भवेन तत्तद्धूमात्मके पक्षे वह्न्यसमवहिताजन्यत्व-रूपापाद्यव्यतिरेकनिश्चये बाधकाभाव इति वाच्यम्, एवमपि नियतान्वयव्यतिरेकानु-विधावित्वस्यैव जन्यतात्मकत्वेन तर्कवैय्यर्थ्यतादवस्थ्यात्। अतो हि भट्टाचार्यैरगादि – **“न चान्यथासिद्ध्यनिरूपकत्वसहितमेच तज्जन्यतात्मकं तत्तु प्रागनिश्चितमिति तन्निश्चायकतया तर्कसार्थक्यमिति वाच्यम्। अन्यथासिद्ध्यनिरूपकत्वाविशेषितस्यापि नियतान्वय-व्यतिरेकानुविधायित्वस्य व्यभिचाराव्यावर्तकतया तनिश्चयस्यैव व्याप्तिनिश्चयसम्पादकत्वेन तादृशविशेषणघटितजन्यतापदार्थनिर्णयस्य प्रकृतेऽकिञ्चित्करत्वादित्याशयवानाह। नियतस्य त्विति। नियमगर्भस्य त्वित्यर्थः। उक्ताभेदसम्पादकत्वादिति। प्रकृतोपयुक्त-जन्यतांशाभिन्नत्वादित्यर्थः। अन्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्काविघटनद्वारा धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वनिश्चायकतावादिनामिदं दुषणमित्यवधेयम्। दीधितिकारमते तु तत्तद्धूमत्वावच्छिन्ने वह्न्यसमवह्निताजन्यत्वनिश्चयविरोधिशङ्कानिवर्तकं तज्ज्ञानम्, तन्निवर्तकत्वं च धूमत्वावच्छेदेनान्वयव्यतिरेकानुविधायित्वानवगाहिनोऽपि तत्तद्धूमत्वावच्छिन्नविशेष्यकतज्ज्ञानस्याक्षतम्। तत्तद्धूमत्वावच्छिन्नाभावे च वह्न्यभाव-व्यापकतायाः सुग्रहत्वेन तत्तद्धूमत्वावच्छिन्ने नियतान्वयव्यतिरेकानुविधायित्वं सुग्रहमेव।**

**तादृशग्रहेण जन्यताग्राहकतर्कवैयर्थ्यमित्यपि नाशङ्कनीयम्, तर्कं विना धूमत्वावच्छेदेन व्याप्तिनिश्चयसम्पादकस्य धूमत्वावच्छेदेन जन्यतानिश्चयस्यानिर्वाहात्।"**[51] इति।

न च तर्कं विना तत्तद्धूमत्वावच्छेदेन नियतान्वयव्यतिरेकानुविधायित्वरूपवह्नि-जन्यत्वग्रहसम्भवेऽपि धूमत्वावच्छेदेन वह्निव्याप्तिलाभायापेक्षितस्य धूमत्वावच्छेदेन वह्निजन्यत्वनिश्चयस्यासम्भवेन लाघवज्ञानादिसहकारेण धूमत्वावच्छेदेन वह्निजन्यत्व-साधकतर्कस्य सार्थक्यमिति वाच्यम्, लाघवज्ञानादिसहकारेण तत्तद्धूमत्वावच्छेदेन वह्निनिरूपितनियतान्वयव्यतिरेकानुविधायित्वनिश्चयस्यैव धूमत्वावच्छेदेन वह्निजन्यत्व-ग्राहकत्वसम्भवेन तर्कवैयर्थ्यस्य दुर्निवारत्वादित्यपि नाशङ्कनीयम्, तत्तद्धूमत्वावच्छेदेन वह्निनिरूपितनियतान्वयव्यतिरेकानुविधायित्वस्य सर्वमतसिद्धतया कल्पनानर्हत्वेन तादृशस्यैव नियतपौर्वापर्य्यभावमात्ररूपस्य वह्निजन्यतात्मकस्य धूमत्वावच्छेदेन वह्निव्याप्तिलाभाय धूमत्वावच्छेदेन अपेक्षिततया, तस्य च तत्तद्धूत्वावच्छेदेन सर्वानुमतत्वेऽपि धूमत्वावच्छेदेन सर्वानुमतत्वाभावेन कल्पनाविषयत्वेन तत्कल्पनायामपेक्षितस्य तत्तद्धूमत्वावच्छेदेन वह्निनिरूपितनियतान्वयव्यतिरेकानु-विधायित्वरूपवह्निजन्यत्वकल्पनापेक्षया धूमत्वावच्छेदेन तत्कल्पने लाघवमिति लाघवज्ञानस्य सहकारिणो लाभो न सम्भवति, यतो हि उभयोरसिद्धत्वेन कल्पनाविषयत्व एव तादृशलाघवज्ञानादिसहकारिणो लाभो नान्यथा। तथा च गादाधरपङ्क्तिः - **"न च तद्धूमत्वावच्छिन्नधर्मिकान्वयव्यतिरेकानुविधानबोधमूलकतर्कस्य लाघवज्ञानसहकारादेव**

[51] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 711-712

**धूमत्वावच्छेदेतन जन्यतात्वम्। एवं च धूमत्वसामानाधिकरण्येन तदन्वयव्यतिरेकानुविधानरूपजन्यतांशनिश्चायकप्रमाणेनापि लाघवज्ञानसहकाराद् धूमत्वावच्छेदेन तन्निश्चयजननसम्भवात्तत एव च धूमत्वावच्छेदेन व्याप्तिनिश्चयोपपत्तेस्तर्कवैयर्थ्यं दुर्वारमेव इति वाच्यं, यतस्तत्तद्धूमत्वावच्छेदेन वह्निजन्यत्वकल्पनापेक्षया धूमत्वावच्छेदेन तत्कल्पने लाघवमिति लाघवज्ञानमुक्ततर्केण धूमत्वावच्छिन्नस्य वह्निजन्यत्वग्रहे सहकारि तादृशं च लाघवज्ञानम् अन्यथासिद्धत्वघटितकार्यकारणभावकल्पनायामेवोपपद्यते, न तु नियतपौर्वापर्यमात्रकल्पने, तत्तद्धूमत्वरूपविशेषधर्माणां नियतान्वयव्यतिरेकानुविधायितावच्छेदकत्वस्योभयमतसिद्धत्वादिति। तच्चिन्त्यम्। धूमत्वाद्यवच्छेदेन आपाद्यव्यतिरेकनिश्चये लाघवज्ञानापेक्षाया आवश्यकत्वे धूमत्वसामानाधिकरण्येनापाद्यव्यतिरेकमूलकादेव तर्कात् लाघवज्ञानवशेन ग्रहोऽस्तु किमुक्तप्रयासेनेति चिन्ताबीजं बोध्यम्।"**[52] इति।

किञ्च अनन्यथासिद्धत्वघटितस्य वह्निनिरूपितनियतान्वयव्यतिरेकानुविधायित्वरूपवह्निजन्यत्वस्य तत्तद्धूमत्वावच्छेदेनापि सर्वानुमतत्वाभावेन कल्पनार्हतया धूमत्वावच्छेदेन तत्कल्पनायां तादृशलाघवज्ञानादेः सहकारिणो लाभेन तादृशसहकारिबलात् धूमत्वावच्छेदेन अनन्यथासिद्धत्वघटितजन्यत्वसिद्धये तर्कापेक्षायां मानाभावः। तथाहि भट्टाचार्यपङ्क्तिः - **"न चान्यथासिद्धत्वशङ्कां नान्वयव्यतिरेकयोर्निवर्तयितुं प्रभवतीति तन्निवृत्तिस्तर्कमपेक्षत एवेति वाच्यम्। तर्कं विनापि कारणान्तरविरहेण कदाचिदन्यथासिद्धत्वशङ्काविरहसम्भवात्।**

[52] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 712

**एतेन धूमत्वावच्छेदेनान्वयाद्यनुविधानस्य निश्चेतुमशक्यतया तत्सामानाधिकरण्येन वह्निजन्यत्वशङ्का नियमत एव जायते, तत्कथं धूमत्वावच्छेदेन वह्निजन्यत्वनिश्चय इत्यपि परास्तम्। कोटयुपस्थित्यादिविरहेण लाघवज्ञानेन वा तादृशशङ्काया अपि निवृत्तिसम्भवात्।"**[53] इति।

## ५.३.२०. चार्वाकमतखण्डनम्

ननु व्याप्तिनिश्चयप्रतिबन्धकशङ्कानिवर्तकत्वं तर्कस्य न सम्भवति तर्कस्य व्याप्तिमूलकत्वेन तत्रापि शङ्कानिवृत्तये तर्कान्तरस्य अपेक्षितत्वेन अनवस्थापत्तेरिति शङ्कायाः स्वार्थानुमानस्थलाभिप्रायकत्वं नाङ्गीकर्तुम् उचितम्, क्वचित्कोटिद्वयोपस्थित्यादिरूपकारणविरहेणापि व्यभिचारादिविरहसम्भवेन सर्वत्रशङ्कानपेक्षणादनवस्थानिवृत्तेः। तदर्थं धूमार्थिनो वह्नौ नियमतः प्रवृत्त्यनुपपत्तिपर्यन्तानुधावनवैयर्थ्यम्।

किन्तु परार्थानुमानस्थले धूमादिना वह्न्याद्यनुमितिर्मम न जायते व्यभिचारशङ्कया धूमादौ वह्न्यादिव्याप्तिग्रहप्रतिबन्धादिति प्रतिवादिना चार्वाकेण पृष्टे तर्केण शङ्कानिवृत्तिः करणीयेति वादिना तार्किकेणोत्तरिते तदुपरि तर्कविरोधिव्यभिचारादिशङ्कासत्वात् तर्कोऽपि मम न भवतीति चार्वाकेण पुनः शङ्किते व्यभिचारादिविरोधितर्कान्तरेण व्यभिचारादिशङ्का निराकरणीयेति वादिना तार्किकेणोत्तरितेऽपि पौनःपुन्येन शङ्कानिवृत्तये तर्कोपन्यासापेक्षणादनवस्थापत्त्या परार्थानुमानोच्छेदापत्तिरिति शङ्कायाम्, शङ्कोपन्यास-

---

53 तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 712

दशायामेव तर्कोपन्यासापेक्षा। यत्र स्वप्रवृत्तिव्याघातेन न शङ्कोपन्यासः तत्र व्याघात-प्रदर्शनमात्रेणैव कृतकृत्यतासम्भवान्न तर्काऽन्तरोद्भावनस्याऽवश्यकतेति नानवस्था-प्रसक्तिः।

एवञ्च, अनवस्थापत्तिशङ्कायाः परार्थानुमानस्थलाभिप्रायकत्वे चार्वाकस्य प्रवृत्तिव्याघातोपन्यासेनैव चार्वाकः स्वशङ्कोद्भावनं कर्तुं न शक्नोतीति तत्र शङ्कानिवृत्तये तर्कान्तरमनुपन्यस्याऽपि चार्वाकं व्याप्तिं स्वीकारयितुं शक्यमिति नानवस्था-प्रसक्तिरितिनिष्कर्षः।

**"धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादि"**ति तर्के उत्पत्स्यमाने 'किं धूमोऽवह्नेरेव भविष्यति', 'क्वचिद्वह्निं विनापि भविष्यति', 'अहेतुक एवोत्पत्स्यते' इति शङ्का मम जायते इति चार्वाकेणोद्भावनीयम्। ततश्च तर्कान्तरमनुपन्यस्य तार्किकेण वादिना यदि गृहीतान्वयव्यतिरेकं हेतुं विनापि कार्य्योत्पत्तिं शङ्कते तदा स्वयमेव धूमार्थं वह्नौ, परप्रतिपत्त्यर्थं शब्दप्रयोगे, तृप्त्यर्थं भोजने नियमतः प्रवृत्तिः कथं कुर्य्यात्। अवह्नेरेव इत्यादिशङ्काविरोधेन वह्निधूमयोः कार्यकारण-भावनिश्चायकतर्कानवतारेण वह्निं विनापि धूमासम्भवस्य शङ्कोदयादिति प्रवृत्तेः शङ्काविरोधित्वं कल्पनीयम्। विचारदशायां तदेव ह्याशङ्क्येत यस्य सत्त्वे स्वप्रवृत्त्यनुपपत्तिर्न भवति धूमाद्यर्थं वह्न्यादौ नियमतः प्रवृत्तिः, धूमादिकारणं वह्न्यादिकं न वेत्याशङ्कनञ्च परस्परविरोधि।

ननु शङ्काप्रवृत्त्योर्विरोधज्ञानदशायामेव प्रवृत्त्या प्रतिबन्धात् शङ्कोत्पत्त्यभावेन निरङ्कुशेन तर्केण कारणतानिश्चयो जायेत, सहानवस्थाननियमरूपविरोधस्य व्याप्तिघटितत्वेन तद्विरोधिशानिराकरणाय तर्कान्तरापेक्षायाम् अनवस्थापत्तिरिति चेन्न, शङ्कायां विरोधग्रहस्य प्रतिवादिनः शङ्कोद्भावनप्रतिबन्धकत्वेन अभिधानात्, वादिनः प्रवृत्तेरेव शङ्कोद्भावनप्रतिबन्धकत्वेनाभिधानाच्च।

न च धूमः 'अवह्नेरेव भविष्यती'त्यादिशङ्कायां स्वक्रियाव्याघातज्ञानस्य 'सर्वत्र स्वकियाव्याघातः स्यादि'त्यादिग्रन्थेन शङ्कानिवर्तकत्वेनाऽभिधानात्। व्याघातस्य विशेषरूपत्वेन विरोधग्रहस्येव शङ्कानिवर्तकत्वेनाऽभिधानमिति वाच्यम् 'यदि गृहीतान्वयव्यतिरेकं हेतुं विनाऽपि' इत्यादितदुपपादकग्रन्थेन प्रवृत्तिरूपस्वक्रियाया एव शङ्काप्रतिबन्धकत्वनिर्वचनात्।

यदि धूमः अवह्नेरेवेत्यादिशङ्का स्यात् तर्हि धूमाद्यर्थिनः स्वस्यैव वह्न्यादौ प्रवृत्तिर्न स्यादित्यापादिकायां शङ्कायाम् आपाद्यप्रवृत्त्यभावव्याप्यत्वसत्त्वेन पक्षीभूते स्वस्मिन् व्यापकाभावरूपया प्रवृत्त्या व्याप्याभावरूपस्य शङ्काविरहस्य सिद्धौ आपाद्याभावेन आपादकाऽभावसाधने नियमतो यद्धर्माऽवच्छिन्नं सिद्ध्यति तद्धर्मावच्छिन्नाभावकोटिक-संशयं प्रति तर्को विरोधीति सिद्धान्तेन शङ्कासंशयस्याप्यभावात्।

विरोधो न व्याघातपदार्थः, एवम्प्रवृत्तिविरोधो न प्रवृत्तिव्याघातः। किन्तु प्रवृत्त्यनुत्पत्तिः। तथा च विरोधघटकतया व्याप्तिप्रवेशे तद्विरोधिशङ्कानिवृत्तये तर्कान्तरापेक्षायामनवस्थाप्रसक्तेर्नाऽवकाशः।

न च प्रवृत्तेः शङ्काविरोधित्वस्य प्रागेव निराकरणात् क्रियापदस्यान्वय-व्यतिरेकानुविधायित्वबोधपरत्वस्य वक्तव्यतया अन्वयव्यतिरेकानुविधायित्वस्य व्याप्यधर्म-दर्शनविधयैव प्रतिबन्धकत्वस्यप्राग्व्यवस्थापनेन व्याप्तिग्रहसापेक्षतया व्याप्तिग्रहविरोधि-शङ्कानिराकरणाय तर्कान्तरापेक्षायामनवस्थाप्रसक्तिस्तदवस्थैवेति वाच्यम्, कालान्तर-गृहीतव्याप्त्यवच्छेदकधर्मप्रकारेण व्याप्यधर्मदर्शनस्यापि शङ्काविरोधितया अविच्छिन्नतर्क-धाराप्रसक्त्यभावेन अनवस्थाप्रसक्त्यभावात्। प्रवृत्तेः शङ्काविरोधित्वोपगमेन प्रवृत्ति-व्याघातस्य शङ्काविरोधित्वानुपगमेन च खण्डनकृतः – **'शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम्। व्याघातावधिराशङ्का तर्कः शङ्काऽवधिर्मतः।।'** इति कुसुमाञ्जलिकारियायाः आचार्याशयमबुद्धैव शङ्कायाः क्वचिद्व्याघातप्रयोज्यानुत्पत्तिकत्वम् इति निरूपितवन्तः। व्याघातः शङ्कानिष्ठप्रवृत्तिप्रतियोगिकः सहानस्थायित्वरूपो विरोधः। स च आश्रयता-सम्बन्धेन शङ्कावृत्तित्वविशिष्टः सन् शङ्काप्रतिबन्धक इति आचार्याभिप्रायं स्वयमेव प्रकल्प्य आश्रयतासम्बन्धेन शङ्कावृत्तित्वविशिष्टस्य व्याघातस्य शङ्काप्रतिबन्धकत्वाऽसिद्धिरिति – **शङ्का चेदनुमाऽस्त्येव न चेच्छङ्काततस्तराम्। व्याघाताऽवधिराशङ्का तर्कः शङ्कावधिः कुतः॥** इति कारिकया खण्डनं कृतं श्रीहर्षेण। व्याघातस्य शङ्काप्रतिबन्धक-त्वानुक्तेरभुक्तवान्तविषयतामेव आसादयति। खण्डनकृतः कारिकाऽर्थस्तु – शङ्काप्रत्यासन्नतया व्याघातो यदि शङ्काप्रतिबन्धकः स्वीक्रियते तदा शङ्कोत्पादोऽवश्यमङ्गीकार्यम् इति व्याघातस्य शङ्काप्रतिबन्धकत्वासिद्धिः। शङ्का प्रत्यासन्नो व्याघातश्चेन्नास्ति तदा प्रतिबन्धकसमवधानाभात् शङ्का निराबाधैव। अतः व्याघातप्रयोज्या अनुत्पत्तिकाशङ्का शङ्कानुत्पादप्रयोजकस्तर्क इति कुतः। तर्कविरोधिशङ्कायाः

व्याघातानिवर्त्यत्वेन अनवस्थया तर्कस्यैव अप्रसक्तेरिति। तथाहि भट्टाचार्यैरुक्तम् – **"शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम्। व्याघातावधिराशङ्का तर्कः शङ्काविधिर्मतः।। इति कारिकया शङ्काया क्वचिद्व्याघातप्रयोज्यानुत्पत्तिकत्वमभिहितमाचार्यैरित्यभिमाने तदुपरि खण्डनकृतां शङ्कानिष्ठप्रवृत्तिप्रतियोगिकविरोधरूपाश्रयतासम्बन्धेन शङ्काप्रत्यासन्नीभूय तत्प्रतिबन्धक इत्यनुमतं तन्न सम्भवति व्याघातस्य शङ्काश्रितत्वेन शङ्कोत्पत्तावेव तत्र व्याघातरूपप्रतिबन्धकसम्भवेन तदुत्पत्तेरावश्यकतया व्याघातस्य तत्प्रतिबन्धकत्व-व्याघातादित्याक्षपसुपन्यस्य निराकरोति।"**[54] इति।

अथवा तर्कः शङ्कावधिरित्यस्य शङ्कावधिसमयाभिन्नावधिकस्तर्क इत्यर्थः। व्याघाताद् यदैव शङ्काविच्छेदस्तदैव प्रयोजनाभावात् तर्कधाराया अपि विच्छेद इति भावः। तथा च तर्कधारानिवृत्तेर्न अनवस्थावकाश इति कस्मादिति वा। पूर्वोक्तयुक्त्या व्याघातस्य शङ्कानिवर्तकत्वासिद्ध्या शङ्कानिवृत्त्यभावेन प्रयोजनसत्त्वात् तर्कधारा-निवृत्त्यभावेन अनवस्थया तर्कस्यैव अनवतारात्। तथाहि भट्टाचार्यपङ्क्तिः – **"व्याघातो यदीति। शङ्काप्रत्यासन्नतया स्वक्रियत इति शेषः। शङ्कास्तीति। तदा शङ्कोत्पादोऽवश्यमङ्गीकार्य इत्यर्थः। न चेत्यादि। शङ्काप्रत्यासन्नो व्याघातश्चेन्नास्ति तदा प्रतिबन्धकसमवधानाभावाच्छङ्का जायेत एव इत्यर्थः। अतो व्याघातावधि-**

[54] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 722

**व्याघातप्रयोज्यानुत्पत्तिका आशङ्का इति कुतः, तर्कः शङ्कावधिप्रयोजक इति वा कुतः, तर्कविरोधिशङ्काया व्याघातानिवर्त्यत्वेनानवस्थया तर्कस्यैवानवतारादित्यथ।"**[55] इति।

अथवा व्याघातपदं न शङ्कानिष्ठप्रवृत्तिविरोधपरम्। येन विरोधघटकतया व्याप्तिप्रवेशे व्याप्तिग्रविरोधिशङ्कानिवर्तकतर्कधाराप्रसक्तिः स्यात्। किन्तु व्याघातपदं स्वप्रवृत्तिनिष्ठशङ्काप्रतिबन्धकतावच्छेदकधर्मवत्त्वपरम्, तादृघधर्मवत्त्वरूप व्याघातस्य शङ्काऽवधित्वं नाम – शङ्कानुत्पादप्रयोजकत्वम्। प्रतिबन्धकस्यैव अव्यवहितपूर्वकालीन-निष्ठप्रतिबन्धकतावच्छेदकधर्मवत्त्वस्यापि कार्यानुत्पादप्रयोजकत्वाद् इति नानवस्था-प्रसक्तिः। नन्वेवमपि स्वप्रवृत्तेरपि न शङ्कानिवर्तकत्वं सम्भवति, स्वप्रवृत्तेः विरोधित्वे सत्येव शङ्कानिवर्तकत्वम्, तथा च विरोधप्रतियोगिविधया शङ्कासत्त्वसिद्ध्या शङ्कानिवर्तकत्वव्याघातादिति चेन्न, एवं सति व्याप्यधर्मदर्शनस्यापि शङ्कानिवर्तकत्वानु-पपत्त्या सर्वानुभूतस्य करचरणादिमत्त्वनिश्चये स्थाणुत्वादिशङ्काप्रतिबन्धकत्वस्य अपि अपलापापत्तेः। तथाहि गदाधरैरगादि – **"अथ वा तर्क शङ्कावधिः शङ्कावध्यवधिकः, यत्र व्याघाताच्छङ्काविच्छेदस्तत्र तर्कान्तरानुपयोगात्तर्कधाराया अपि विरह इति यावत्, एतावता नानवस्थावकाश इति कुत इत्यर्थः। न हि व्याघातः शङ्काश्रितः प्रतिबन्धकविधया शङ्कानुत्पादप्रयोजक इत्युच्यते इति शेषः। किं तु स्वक्रियैवेति। आचार्यकारिकाया व्याघातावधिराशङ्केत्यस्य यत्र शङ्कोत्पत्तौ प्रमाणसिद्धप्रवृत्त्यनुपपत्तिरूपो व्याघात-**

---

[55] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 722

**स्तदवधिका शङ्केत्यर्थः। तादृशस्थले स्वक्रियाप्रतिबन्धेनैव शङ्काया अनुत्पाद इति यावत्, न तूक्तार्थ इति भावः।"**[56] इति।

एवं समासेन तत्त्वचिन्तामणिदीधितेस्तर्कप्रकरणे गदाधरकृतटीकायाः समीक्षणं समुपस्थापितं यथामति।

## ५.४. अध्यायोपसंहारः

***तत्त्वचिन्तामणिदीधितेस्तर्कप्रकरणे भवानन्द-जगदीश-गदाधर-कृतटीकानां समीक्षणम्*** इत्याख्ये पञ्चमाध्याये तत्त्वचिन्तामणेस्तर्कप्रकरणे दीधितिमाश्रित्य रचितानां भवानन्द-जगदीश-गदाधरकृतटीकानां समीक्षणं कृतम्। अस्मिन्नध्याये प्रप्रथमं तर्क-प्रकरणमाश्रित्य भवानन्दकृतप्रकाशव्याख्यानं समीक्षितम्। अत्र भवानन्दरचितप्रकाश-टीकामाश्रित्य हुताशनेत्यादिदीधितिपङ्क्तिप्रयोजनं निरूपितम्, ततो दीधितिपङ्क्तिस्थ-रासभपदप्रयोजननिरूपणं कृतम्। अथ दीधितिस्थस्य एतेषामन्यतमं कारणं धूमस्येत्यवधारणम् इति भागस्य प्रयोजननिरूपणम्, दीधितिपङ्क्तौ धूमं प्रति रासभादेरहेतुत्वप्रदर्शनप्रयोजनं, चिन्तामण्युक्ततर्कस्य प्रकृतोपयोगित्ववर्णनं, दीधित्युत्थापितचिन्ताबीजनिरूपणं भवानन्दकृतप्रकाशटीकामाश्रित्य सम्पादितम्।

---

[56] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 722

ततश्चात्र तर्कप्रकरणमाश्रित्य जगदीशतर्कालङ्कारमतं समीक्षितम्। अत्र जागदीशीटीकामाश्रित्य हुताशनेत्यादेदीधितिपङ्क्तिप्रयोजनं निरूपितं, तत्रापि विविधाक्षेप-समाधिभिर्मण्युक्ततर्कोपस्थापनस्य साफल्यं प्रतिपादितम्, ततश्च तर्कलक्षणं निरूप्य तद्भेदाः प्रकाशिताः।

अथ चास्मिन्नेवाध्याये तर्कप्रकरणमाश्रित्य तार्किकगदाधरमतं पर्यालोचितम्। अत्र गादाधरीमाश्रित्य धूमो यदीत्यादितर्कोपस्थापनप्रयोजनविवेचनम्, दीधितौ हुताशनेत्यादौ रासभपदोपादानप्रयोजननिरूपणम्, कार्यकारणभावग्रहस्य आवश्यकत्वप्रदर्शनम्, तर्काकारप्रविष्टपदव्यावृत्तिकथनम्, वह्न्यसमवधानकालीनत्वविचारः, तर्कवैयर्थ्यशङ्का-समाधी इत्यादिविषयाः सविशदं पर्यालोचिताः।

अत्राध्याये विशेषतया दीधितिस्थस्य प्राहुरित्यस्य प्रकर्षबीजनिरूपणे क्वचिद् दीधितिस्थाया चिन्ताया बीजनिरूपणे टीकाकृतां मतवैसादृश्यं समीक्षितम्। तत्र च दीधितेराद्यपङ्क्तिप्रयोजननिरूपणं कृतं टीकाकाराणां मतानुसारम्। तत्र च कथं कुत्र कीदृशं वैसादृश्यं तत्सर्वमुपनिबद्धम्। एवमन्ये अपि दीधितिस्था गूहितविचाराः टीकाकृतां मतानुसारं सविशदं निरूपिताः समीक्षिताश्चेति शिवम्।

# उपसंहारः

प्रथमे अध्याये प्रस्तावितविषयोपयोगिनो विषयाः समालोचिताः। तथाहि तत्र नव्यन्यायप्रादुर्भावः, गङ्गेशोपाध्यायस्य परिचयः, तत्कृतस्य तत्त्वचिन्तामणेः परिचयः, तथा तत्त्वचिन्तामणिश्रितानां कृतीनां परिचयः प्रथमत उपन्यस्तः। सत्स्वपि बहुषु व्याख्यानेषु तत्त्वचिन्तामण्याश्रितेषु इह प्रबन्धे प्रसिद्धाः दीधिति-रहस्य-प्रकाश-जागदीशी-गादाधर्यः च पर्यालोचिताः। एवं प्रथमाध्यायान्ततः प्रबन्धस्यानुबन्ध-चतुष्टयम्, पूर्वपरिकल्पना, शोधपद्धतिः इत्येते विषया अपि सन्निवेशिताः यथामति।

***दर्शनशास्त्रेषु तर्कस्य स्वरूपं प्रयोजनञ्च*** इत्याख्ये द्वितीये अध्याये तर्कस्वरूपं, तर्कलक्षणं, तर्कप्रयोजनं, तर्कभेदा, तर्कस्य संशयनिश्चयानुमानातिरिक्तत्वम् इत्येते विषयाः पर्यालोचिताः। तर्कस्वरूपलक्षणवचश्चर्चायां प्रथमतः प्राचीनन्यायमतं, अतिसमासेन नव्यन्यायनयः, वैशेषिकमतं च पर्यालोचितम्। 'अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः' इति सौत्रतर्कलक्षणपर्यालोचनं विधाय नव्यानां 'व्याप्यारोपेण व्यापकारोपस्तर्क' इति तर्कलक्षणं समासेन परीक्षितम्। भाष्यस्थलक्षणस्य कारणोपपत्तिरिति पदस्य प्रमाणसम्भावनेत्याद्यर्थकल्पने प्राचां लक्षणेन नव्यानां लक्षणस्य समानता इत्यपि प्रतिपादितः प्रबन्धे। प्रसङ्गात् न्यायकुसुमाञ्जलिपर्यालोचितस्य न्यायमञ्जरीधृतस्य च तर्कविचारस्य समासेनेह विमर्श उपस्थापितः। शास्त्रान्तरेषु जैन-बौद्ध-मीमांसादिषु सम्प्रदायेषु प्रतिपादितं तर्कस्वरूपं सामान्यतया पर्यालोच्य तर्कस्य

सर्वप्रमाणानुग्राहकत्वमिह प्रपञ्चितम्। न्यायवैशेषिकसम्प्रदाये चतुर्णामेव प्रमाणानां सूरिभिर्ग्रहणादत्र प्रबन्धे न्यायवैशेषिकाभिमततर्कस्वरूपस्य च प्रतिपादनीयत्वात् तर्कस्यार्थापत्त्यादि-प्रमाणानुग्राहकत्ववर्णनमिहासङ्गतमिति धिया **नासङ्गतं शास्त्रे प्रयुञ्जीते**ति न्यायस्मरणात् तिरस्कृतम्। एवं क्रमेण तर्कप्रयोजनं, तर्कभेदांश्च पर्यालोच्य अध्यायान्ततः तर्कस्य संशयानुमानान्तर्भावविचारः उपस्थापितः। तर्कपदार्थो संशये निश्चये अनुमाने वान्तर्भवन् नातिरिच्यत इत्याक्षिपतां पूर्वपक्षमतानामसारत्वं प्रदर्श्य न्यायमतानुसारं तर्कपदार्थस्य पृथक्पदार्थत्वोपपादने प्रयासः विहितः। पूर्वपक्षिणां प्रसिद्धं कोटित्रयमिह पर्यालोचितम्। तत्र तर्को न संशयसंगृहीतः, उभयकोटिक-विमर्शात्मकानवधारणप्रत्ययत्वाभावात्, विशेषदर्शनाभावे सामान्यज्ञाने सत्यपि कोटिद्वयाभावात् पुरुष-सम्भावनमात्रस्य द्योतनात् चेति प्रथमः पक्षः युक्त्या तिरस्कृतः। एवं निश्चयान्तर्गत एवासौ तर्क इति द्वितीयः पक्षः अपि निरस्तः, विशेषदर्शनाभावात् अवधारणात्मकत्वात् च। तृतीयतः, अनुमानस्यैव तर्क इति व्यपदेशः, न तर्को भिन्नोऽनुमानादिति मतमपि हेयमिति प्रदर्श्य तर्कस्य पृथक्पदार्थत्वमुपपन्नमेवेति प्रतिपादितमिह।

***तत्त्वचिन्तामणिस्थतर्कप्रकरणसमीक्षणम्*** इत्याख्ये तृतीयाध्याये तत्त्वचिन्तामणे-स्तर्कप्रकरणे ये विहिताः विचारास्त इह प्रबन्धे यथामति प्रपञ्चिताः। अध्यायोपसंहृतौ यथामति केचन विचारा उपस्थाप्यन्ते। एषां विचाराणां पारमार्थिकत्वं सुधियां गोचरम्। तथा हि, तर्कप्रकरणं प्रणीय चिन्तामणिकृता तावत् तर्कस्य किं लक्षणमित्येव नोक्तम्।

लक्षणमकृत्वा अनवस्थापरिहारादिकं कृतमिति ग्रन्थस्य न्यूनतादोषस्तु वर्तते एव। अस्तु मन्यामहे यत् अन्यत्र ग्रन्थकृता लक्षणमुक्तमिति, किन्तु एतत्सम्मतं च लक्षणं व्याप्यारोपेण व्यापकारोपस्तर्क इति लभ्यते। किन्तु लक्षणेनानेन लभूतसूत्रविरोधः सम्भावयितुमपि शक्यते। सूत्रं तावत् अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूह-स्तर्क इति। तत्र सामान्यतो ज्ञाते वस्तुनि विशेषज्ञानाय क्रियमाण ऊह एव तर्कत्वेन उक्तः अस्ति। मणिसम्मतं च लक्षणं प्रमाणेन अनुमितौ जननीयायां प्रतिबन्धकवशात् प्रतिबद्धायाम् अनुमितौ तत्प्रतिबन्धनिवर्तनाय य आरोपोऽस्तीति अयमेव तर्कः इति लभ्यते इति मूलविरोधः कल्पयितुं शक्यः।

यद्यपि सूत्राक्षरैरपि अयमेवार्थो लभ्यते इति निरूपयितुं शक्यते। तथा हि तत्र सूत्रस्थं कारणमिति पदं व्याप्यार्थकम्। तस्योपपत्तिः आरोपः, तस्मात् यः आरोपो अर्थात् व्यापकस्य तथा च व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्यारोपात् यो व्यापकारोपः स तर्कः इति। इत्थमेव निरूपितं विश्वनाथेनापि।

तथापि इदमपि मूलविरोधदोषान्न मुक्तं भवति। यतो हि अविज्ञाततत्त्वे इत्यस्य सामान्यतया ज्ञाते, विशेषतया अज्ञाते इत्येव स्वारसिकोऽर्थो भाति। अत एव भाष्यकारादिभिः तथैव व्याख्यातम् । अत्र तु तद्विरुद्धार्थः व्यापकाभाववत्तया निर्णीते इति कल्पनीयः। सुतरां विरुद्धार्थस्य कल्पने मानाभावः। अपि च उपपत्तिशब्दस्य युक्तिः सम्भव इत्यादयः अर्थाश्च प्रसिद्धाः। किन्तु प्रकृते आरोपार्थकत्वं स्वीकर्तव्यमिति प्रसिद्धार्थत्यागरूपो दोष एव। तस्मात् मणिसम्मतस्य लक्षणस्य निर्मूलत्वापत्तिः।

तस्य मूलं तु यथाकथञ्चित्प्रदर्शयितुं शक्यते। वल्लभाचार्यैः कृतं लक्षणं मणिकृतामपि सम्मतमिति वकुं शक्यते। तथा चोकं वल्लभाचार्येण **“अथ कस्तर्कः? एकधर्माभ्युपगमे द्वितीयस्य नियतप्राप्तिरूपः”**[1] इति। एकस्य धर्मस्य व्याप्यस्य द्वितीयस्य व्यापकस्य प्रसङ्गरूप इति तदर्थः। व्याप्यारोपात् व्यापकारोप इति भावः। एवञ्च मणिसम्मतलक्षणस्य समूलत्वमेवेति वाच्यम्। तथापि न्यायसूत्रविरोधस्तु अपरिहार्य एव। अतः ऋषिसम्मतेरभावात् मूलविरोध इति प्रतिपादितम्।

किञ्च, प्रमाणानुग्राहकशब्दस्य अपव्याख्यापि कल्पयितुं शक्या। तथा हि प्रमाणानुग्राहको नाम प्रमाणेन अनुमितौ जननीयायां व्यभिचारसंशयं निवर्त्य सहकरोतीति नव्यानां मणिकृत्प्रभृतीनां व्याख्या। तथा सति यत्र व्यभिचारसंशयो नास्ति तत्रानुग्राहकत्वं वर्तते वा, न वेत्यादिसंशयाः उत्पद्यन्ते। किन्तु भाष्यादिग्रन्थेषु तावत् प्रमाणानुग्राहकशब्दस्य तादृशार्थः न लभ्यते। किन्तु यत्र प्रमाणं प्रवर्तते तत्रैव विषयविवेचनं करोति, किं युक्तमयुक्तमिति। तथा चोक्तं वार्तिककृता, **“प्रमाण-विषयविभागात्तु प्रमाणानुग्राहक इति। को विभागः युक्तायुक्तविचारः”** इति।

एवञ्च तद्रीत्या आलोचयामश्चेद् व्यभिचारसंशयो भवतु वा, नैव वा भवतु, युक्तायुक्तविचारः कर्तुं शक्यते इति व्यभिचारसंशयनिवर्तकया न तर्कसिद्धिः। तथा च आत्मा नित्यः इति विषये वर्तमानमपि प्रमाणं यदि आत्मा उत्पत्तिधर्मकश्चेत् तर्हि संसारापवर्गौ न स्यातामिति अनुत्पत्तिधर्मकेणात्र भवितव्यमिति तर्केणानुगृह्यते इति प्राचां

---
[1] न्यायलीलावती, पृ 514.

व्याख्या। तथा च अनुत्पत्तिधर्मकेण भवितव्यमिति हि तर्काकारः उक्तः। नव्यमते तु यदि तु आत्मा अभविष्यत् तर्हि संसारापवर्गौ न स्यातामित्येव तर्काकारः फलति। तथा चात्रापि विरोधः अस्त्येव।

किञ्च, तर्कस्य व्यभिचारसंशयनिवर्तकत्वासम्भवः अपि कथयितुं शक्यते। तर्को हि व्यभिचारसंशयं निवर्त्य प्रमाणमनुगृह्णातीति नव्यमतम्, तच्चायुक्तम्। व्यभिचारसंशयस्य यदि व्याप्तिग्रहप्रतिबन्धकत्वं स्यात् तदा युज्येत तन्निवृत्यै तर्कस्य अपेक्षा, किन्तु तदेव न। यतो हि व्यभिचारसंशयस्य ग्राह्यसंशयपर्यवसन्नतया तस्य पक्षतारूपत्वात् अनुमितौ तस्य अनुकूलत्वमेव, न तु प्रतिबन्धकत्वम्। अतः व्यभिचारसंशयस्य व्याप्तिज्ञानाप्रतिबन्धे सिद्धे सति तन्निवर्तनाय तर्कस्य अपेक्षैव नास्तीति स्यात्।

सम्मतश्चायमर्थः समेषां नैयायिकानाम्। तथा चौक्तं रघुनाथशिरोमणिना **“ग्राह्यसंशयस्य तु न प्रतिबन्धकतेति भावः”**[2] इति । उक्तं च मथुरानाथेनापि **“न चैवं व्यभिचारसन्देहसत्त्वेऽपि व्याप्तिग्रहापत्तिरिति वाच्यम्। सन्देहात्मकव्याप्तिग्रहे इष्टापत्तेः”**[3] इति। उक्तं च दिनकरभट्टेनापि **“व्यभिचारसंशयस्य ग्राह्यसंशय-पर्यवसन्नतया प्रत्यक्षे एव प्रतिबन्धकत्वं, न त्वनुमितौ, तत्र तस्यानुकूलत्वादिति”** इति। एवञ्च यदा व्यभिचारसंशय इष्ट एव तर्हि किं निवर्तनाय तर्कस्स्यात्। तथा तस्य च कथं व्यभिचारसंशयनिवर्तकत्वम्। अपि च, व्यभिचारनिवर्तकस्तर्कः इत्यस्य व्यभिचारनिवृतिजनक इत्यर्थः। क्वचित्

---

[2] प्रामाण्यवाददीधितौ, पृ 9

[3] तत्वचिन्तामणिरहस्यम्, पृ 216

व्यभिचारज्ञानविरहः स्वतस्सिद्ध इति स्वयमभ्युपगतत्वात् कुत्रचिद् तर्कं विनापि व्याप्तिग्रहो भवतीत्यायातम्। तथा सति एकस्य कार्यस्य अनेककारणत्वाङ्गीकारे व्यतिरेकव्यभिचारापत्त्या तर्कस्य व्यभिचारनिवृत्तिजनकत्वं कथं सिद्ध्येत्। तत्परिहाराय पुनः कार्यतावच्छेदककोटौ कारणाव्यवहितोत्तरत्वादिकं निवेश्य दोषः परिहरणीयः। तथा च गौरवम्।

अपि च, व्यभिचारज्ञानविरहः व्याप्तिग्रहोपायः, स च क्वचित् तर्केण इत्युक्तत्वात्तर्केण व्यभिचारज्ञानं प्रतिबध्यमिति आयातम्। एवञ्च प्रतिबध्यताव-च्छेदककोटौ संशयनिश्चयसाधारणज्ञानत्वस्य प्रवेशात् तदवच्छिन्नप्रतिबध्यता-निरूपितप्रतिबन्धकः तर्क इति वक्तव्यम्। किन्तु यत्र प्रमात्मकव्यभिचारनिश्चय एव वर्तते तत्र तर्कसहस्रेणापि व्यभिचारज्ञानं न निवर्तते इति तर्के कारणे सत्यपि ज्ञानत्वावच्छिन्नप्रतियोगिताकाभावस्य कार्यस्य अनुदयात् व्यतिरेकव्यभिचार एव। तस्मात् व्यभिचारज्ञाननिवर्तकत्वस्य असम्भव एव तर्कस्य।

अपि च, उदयनाचार्येणापि व्याप्तिज्ञानं प्रति विपक्षेच्छाया एव प्रतिबन्धक-त्वमुक्तम्। न तु व्यभिचारसंशयस्य। संशयस्य प्रवृत्तिप्रतिबन्धकत्वं तु सिद्धम्। यथा व्याघ्रसंशयः अरण्ये प्रवृत्तिं प्रतिबध्नाति। किन्तु संशयस्य निश्चयप्रतिबन्धकत्वं तु नास्तीति तदाशयः। तर्केण तु अनिष्टापादनं क्रियते इति सुरापानेच्छा तत्र अनिष्टापादने यथा निवर्तते तथा विपक्षेच्छापि तर्केण निवर्तते इति। तथा चोकम् उदयनाचार्यैः **"तेन हि वर्तमानेन तदायत्तव्यभिचारकोटौ अनिष्टमुपनयता इच्छा विच्छिद्यते"** इति। इच्छा

विच्छिद्यते इत्यत्र इच्छा नाम विपक्षेच्छेत्यर्थः। तस्मात उक्तैः प्रमाणैः व्यभिचारसंशयनिवर्तकत्वं न सम्भवत्येव तर्कस्येति।

***तत्त्वचिन्तामणेस्तर्कप्रकरणे रघुनाथ-मथुरानाथकृतटीकयोः समीक्षणम्*** इत्याख्ये चतुर्थाध्याये तत्त्वचिन्तामणेः साक्षाट्टीकयोः रघुनाथकृतदीधिति-मथुरानाथकृतमाथुर्योः मतसमीक्षणं विहितम्। तत्रादौ रघुनाथकृतदीधितिमतं समीक्षितम्। तथा च, दीधितिमाश्रित्य अत्राध्याये मण्युक्ततर्कस्य कार्यकारणभावग्राहकत्वोपपादनम्, व्याप्तिग्रहे कार्यकारणभावज्ञानस्यावश्यकत्वप्रदर्शनम्, तर्कशरीरस्थपदव्यावृत्तिप्रदर्शनम्, रघुनाथ-मतानुसारं मण्युक्तायाः प्रथमशङ्काया मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम्, रघुनाथ-मतानुसारं मण्युक्ताया द्वितीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम्, रघुनाथ-मतानुसारं मण्युक्तायास्तृतीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम्, मणिस्थ-तदुपादानपदार्थनिरूपणम्, मिश्रमतप्रदर्शनम्, धूमत्वावच्छिन्नधूमे वह्निजन्यत्वविचारः इत्येते च विषयाश्चर्चिताः।

ततश्च माथुरीमाश्रित्यैव अस्मिन्नध्याये मूलोक्ततर्कस्य वह्निधूमव्याप्तिग्रहोपयोगित्व-प्रदर्शनम्, मण्युक्ततर्कशरीरस्थाभावपदेनान्योन्याभावग्रहणप्रयोजननिरूपणम्, अव्याप्य-वृत्तित्वस्वरूपनिरूपणम्, तर्कघटकदलानां सार्थक्यम्, यज्ञपत्युपाध्यायमतोपस्थापनं तद्दूषणञ्च, रघुनाथशिरोमणेः मतानुवादः, मण्युक्तशङ्कात्रयस्य तर्कप्रतिबन्धकत्वोपपादनम्, वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्य शङ्कात्रयप्रतिबन्धकत्वनिरूपणम्, तर्कानुसरणस्य वैयर्थ्यशङ्का तथा तत्सार्थक्यप्रदर्शनं, तर्कस्य सत्त्वासत्त्वपरिष्कारश्चेति विषयाः समीक्षिताः।

यद्यपि रघुनाथस्तथा मथुरानाथः साक्षाच्चिन्तामणिं व्याख्यातवन्तौ तथापि अनयोर्वैलक्षण्यं सुलभमेव। तथाहि रघुनाथेन चिन्तामण्युक्ततर्कः कार्यकारणभावग्राहकः सन् धूमो वह्निजन्यो न वेति शङ्कां निराकरोतीति प्रतिपिपादयिषुणा धूमवह्न्योः कार्यकारणभावं कथं वर्तते इत्यन्वयव्यतिरेकाभ्यां प्रदर्शितम्। परं मथुरानाथेन केवलं धूमो वह्निजन्यो न वेति शङ्काविघटकः कार्यकारणभावग्राहकस्तर्क इत्येवं व्याख्यातम्। अनयोर्यद्यपि रघुनाथेन सोदाहरणं मण्युक्ततर्कोत्थापनहेतुर्वर्णितस्तथापि प्रतिपादनशैली अस्य क्लिष्टेति भाति। तथाहि दीधितिगीः – **"हुताशनरासभादिपदार्थसार्थस्यान्वय-व्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमानः अवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य सन्दिग्धे – किमेतानि सर्वाण्येव कारणानि, किं वा कानिचित्तथा कानिचिच्च नेति। तत्र च यस्य व्यतिरेके अपि इतरेभ्यस्तथाविधेभ्यो धूमोत्पत्तिमपलभते तस्याहेतुत्वमेवावधारयति यथा रासभादेः। यस्य च व्यतिरेके तादृशापरसकलान्वये अपि धूमानुत्पत्तिं पश्यति तस्य कारणत्वमेव निश्चिनुते यथा वह्नेः। तत्र चाकारणत्वसन्देहो विरोधितामासादयन्निवर्तते येन तर्केण तमाह धूम इत्यादि"**[4] इति। तदपेक्षया मथुरानाथशैली अत्र सुलभा। तथा हि माथुरीगीः - **"ननु नायं वह्निधूमव्याप्तिग्रहोपयोगी वह्निव्यभिचारित्वापादककतर्कस्यैव तथात्वात्। न चातथात्वे अपि क्षतिविरह इति वाच्यम्। तादृशवह्निधूमव्याप्तिग्राहकतर्क एव अनवस्थाप्रदर्शनादिति चेत् न। तस्यापि परम्परया वह्निधूमव्याप्तिग्रहोपयोगित्वात्, तथाहि धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादिति वह्निधूमव्याप्तिग्राहकस्तर्कस्तत्र च वह्निजन्यत्वरूपापाद्य-**

[4] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 219-220

**व्यतिरेकनिश्चयः हेतुः बाधबुद्धेस्तार्किकबुद्धौ हेतुत्वात् तस्मिंश्चान्वयव्यतिरेकाभ्यां प्रत्यक्षतो वह्निजन्यत्वनिर्णये वह्निजन्यत्वशङ्का विरोधिनी संशयसामग्रीसम्पादकत्वात् तच्छङ्काविरोधी चायं तर्क इति।”[5] इति।** एवमन्येषु विषयेषु दीधितिटीका माथुरीतः अधिकविचारबहुला इति भाति। दीधितौ नैके विचाराः समासेन उपस्थापिताः। तत्र माथुर्यां स्वीयव्याख्यानतः यज्ञपत्युपाध्याय-रघुनाथयोर्मतानुवाद आधिक्येन दृग्गोचरीभवति। तत्र मथुरानाथेन यज्ञपतिमतमनूद्य खण्डितम्। किन्तु रघुनाथमतं यद्यपि अनूदितं मथुरानाथेन तथापि न कुत्रचिदपि खण्डितम्। इत्यनेन एतत्स्पष्टं यद्रघुनाथमते मथुरानाथस्य स्वारस्यं वर्तते इति मे मतिः।

यद्यपि रघुनाथमते स्वारस्यं कुत्रचिद् वर्तते मथुरानाथस्य परं न सर्वत्र। अतो हि मथुरानाथेन मण्युक्ततर्कशरीरस्थाभावपदम् अत्यन्ताभावत्वेन न व्याख्यातम्। किन्तु मथुरानाथेन अभावपदं तत्रस्थम् अन्योन्याभावत्वेन एव गृहीतम् इति मथुरानाथमते विशेषः। मथुरानाथमतसमीक्षणावसरे अस्मिन्नध्याये दर्शितं च किमर्थं मथुरानाथेन अत्यन्ताभावं परित्यज्य अन्योन्याभाव आश्रितः। अत्यन्ताभावस्य अव्याप्यवृत्तित्वाद् अन्योन्याभावस्य च व्याप्यवृत्तित्वाद्धि अन्योन्याभाव आश्रितो मथुरानाथेन। तथाहि माथुर्याष्टीकायां विवृतौ वामाचरणेन न्यगादि – **“न च वह्न्यसमवहितजन्यत्वाभाव-विशिष्टवह्निसमवहितजन्यत्वाभावस्यैवापादकत्वसम्भवे उभयत्र भेदपदोपादानं व्यर्थमिति**

[5] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 219-220

**वाच्यम्, अत्यन्ताभावस्याव्याप्यवृत्तितामते वह्निशून्यताकालीनवह्निमद्देशोत्पन्नघटादौ व्यभिचारापत्तेः।"**[6] इति।

अत्रेदं समीक्ष्यते यत्किं नाम तावदव्याप्यवृत्तित्वम्। स्वात्यन्ताभाव-सामानाधिकरण्यम् अव्याप्यवृत्तित्वम् इति। एवञ्च, संयोगेन वृत्तिमत्पदार्थानां घटपटादीनामव्याप्यवृतित्वं युक्तिसाध्यम्। तथा च युक्तिः **"इह पर्वते नितम्बे हुताशनो न शिखरे इति प्रतीतेः संयोगेन द्रव्यस्यापि अव्याप्यवृत्तित्वात्, वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतो व्याप्यवृत्तित्वस्य अत्यन्तमसम्भावितत्वात्"**[7] इति। अतः संयोगेन वृत्तिमत्पदार्थप्रतियोगिकाभावोऽपि अव्याप्यवृत्तिरिति स्वीकर्तुं शक्यते।

इदानीं प्रश्नो जायते यद् यदि जन्यत्वाभावस्यापि अव्याप्यवृत्तित्वं प्रतिपिपादियिषितं तदा जन्यत्वाभावप्रतियोगिनो जन्यत्वस्य अव्याप्यवृत्तित्वं निरूपणीयम्। तथा सति अव्याप्यवृत्तिप्रतियोगिकाभावोऽपि अव्याप्यवृत्तिः भवतीति नियमाद् वह्न्यसमवहितजन्यत्वाभावस्य अव्याप्यवृत्तित्वमिति निर्णेतुं शक्यते। ननु जन्यत्वस्य अव्याप्यवृत्तित्वे का युक्तिरिति शङ्काया यदि उच्यते यद् सत्तायां गुणेन द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिवत् वह्निशून्यताकालीनवह्निमद्देशोत्पन्नस्य घटस्य अनधिकरणदेशे घटे नास्ति वह्न्यसमवहितजन्यत्वमिति प्रतीतिः प्रमाणमिति तदा सर्वेषामपि पदार्थानां तादृशप्रतीतिबलादव्याप्यवृत्तित्वापत्तौ व्याप्यवृत्तिः कश्चन

[6] विवृतिसहिततर्करहस्ये, वामाचरणभट्टाचार्यसम्पादिते, पृ 2

[7] सिद्धान्तलक्षणदीधितौ, पृ 35

नावशिष्येत। अतः अत्र वयं ब्रूमो यद् अत्यन्ताभावघटकतर्कं विहाय अन्योन्याभाव-घटकतर्कानुसरणे बीजं किमिति चिन्त्यम्।

किञ्च, रघुनाथेन वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तदलम् उत्पन्नत्वाभावीयप्रतियोगिनि विशेषणम्। उक्तञ्च – **"तथा च, घटादौ व्यभिचारवारणाय आपाद्यकोटिप्रतियोगिविशेषणार्थकं सत्यन्तम्।"**[8] इति। किन्तु मथुरानाथनये वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तदलम् वह्निसमवहिताजन्यत्वरूपविशेष्यप्रतियोगिनि विशेषणम् इत्युभयोर्मतभेदः। तथाहि मथरानाथेन उक्तम् - **"अत्र च वह्निशून्यत्वदशायां वह्निमद्देशोत्पन्ने घटादौ मूलशैथिल्यवारणाय विशिष्टान्तं द्वितीयभिन्नत्वविशेषम्, तत्प्रतियोगिविशेषणत्वे तद्दोषतादवस्थ्यात्।"**[9] इति।

पञ्चमाध्याये ***तत्त्वचिन्तामणिदीधितेस्तर्कप्रकरणे भवानन्द-जगदीश-गदाधरकृत-टीकानां समीक्षणम्*** इत्याख्ये तत्त्वचिन्तामणेस्तर्कप्रकरणे दीधितिमाश्रित्य रचितानां भवानन्द-जगदीश-गदाधरकृतटीकानां समीक्षणं कृतम्। अस्मिन्नध्याये प्रप्रथमं तर्क-प्रकरणमाश्रित्य भवानन्दकृतप्रकाशव्याख्यानं समीक्षितम्। अत्र भवानन्दरचित-प्रकाशटीकामाश्रित्य हुताशनेत्यादिदीधितिपङ्क्तिप्रयोजनं निरूपितम्, ततो दीधितिपङ्क्तिस्थ-रासभपदप्रयोजननिरूपणं कृतम्। अथ दीधितिस्थस्य एतेषामन्यतमं कारणं धूमस्येत्यव-धारणम् इति भागस्य प्रयोजननिरूपणम्, दीधितिपङ्क्तौ धूमं प्रति रासभादेरहेतुत्व-

[8] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 687

[9] तत्त्वचिन्तामणौ, कामाख्यानाथतर्कवागीशसम्पादिते, पृ 220

प्रदर्शनप्रयोजनं, चिन्तामण्युक्ततर्कस्य प्रकृतोपयोगित्ववर्णनं, दीधित्युत्थापितचिन्ताबीज-निरूपणं भवानन्दकृतप्रकाशटीकामाश्रित्य सम्पादितम्।

ततश्चात्र तर्कप्रकरणमाश्रित्य जगदीशतर्कालङ्कारमतं समीक्षितम्। अत्र जागदीशीटीकामाश्रित्य हुताशनेत्यादेदीधितिपङ्क्तिप्रयोजनं निरूपितं, तत्रापि विविधाक्षेप-समाधिभिर्मण्युक्ततर्कोपस्थापनस्य साफल्यं प्रतिपादितम्, ततश्च तर्कलक्षणं निरूप्य तद्भेदाः प्रकाशिताः।

अथ चास्मिन्नेवाध्याये तर्कप्रकरणमाश्रित्य तार्किकचूडामणिगदाधरमतं पर्यालोचितम्। अत्र गादाधरीमाश्रित्य धूमो यदीत्यादितर्कोपस्थापनप्रयोजनविवेचनम्, दीधितौ हुताशनेत्यादौ रासभपदोपादानप्रयोजननिरूपणम्, कार्यकारणभावग्रहस्य आवश्यकत्वप्रदर्शनम्, तर्काकारप्रविष्टपदव्यावृत्तिकथनम्, वह्न्यसमवधानकालीनत्व-विचारः, तर्कवैयर्थ्यशङ्कासमाधी इत्यादिविषयाः सविशदं पर्यालोचिताः।

अस्मिन् अध्याये तत्त्वचिन्तामणेस्तर्कप्रकरणे दीधितिमाश्रित्य रचितानां भवानन्द-जगदीश-गदाधरकृतटीकानां समीक्षणं विधायैतद्वक्तुं शक्यते यद् भवानन्द-जगदीशकृतं टीकाद्वयं लघु। एताभ्यां टीकाभ्यां केवलं दीधितिपङ्क्त्यर्थः कथञ्चित् परिष्कृतः। अधिकतया न किमपि टीकाद्वये आलोचितम्। यद्यपि टीकाद्वयं लघु तथापि किञ्चिद् वैशिष्ट्यं नूनं वर्तते। अन्यथानयोः नैष्फल्यं ध्रुवम्। यथा भवानन्दैः जगदीशैश्च दीधितौ यत्र यत्र **प्राहुः** इति प्रयुक्तं तत्र प्रकर्षत्वख्यापने किं बीजं दीधितिसम्मतं तत्समासेन निरुक्तम्। तथा च, यत्र दीधितिकृता **चिन्त्यम्** इत्यनेन उक्तमतं तिरस्कृतं तत्रापि किं

बीजमित्यादि सर्वं समासेन निरुक्तम्। एतादृशं वैशिष्ट्यं तु भवानन्दकृतटीकायां जगदीशकृतटीकायामेव उपलभ्यते, न तु गादाधर्याम् अन्यास्यां टीकायां वेत्यस्मिन् विषये भवानन्दमतं जगदीशमतं च श्रेयो गदाधरमतादिति वक्तुं शक्यते। तथाहि दीधितौ उक्तम् – **"मिश्रास्तु पंर प्रति व्याप्तिग्रहोपाये प्रदर्श्यमाने व्यभिचारशङ्कानिरासहेतुत्वेनोपदर्शिते तर्के मूलशैथिल्यादिशङ्कोद्भावकं तं प्रति व्याघातः अयमुपदर्श्यते, मैवं शङ्किष्ठाः, तथा सति तत्तत्कार्यार्थितया तत्र तत्र कारणे तवैव प्रवृत्तयो व्याहन्येरन्। यदाह, न हि सम्भवति स्वयं वह्न्यादिकमितीति प्राहुः।"**[10] इति। अत्र दीधितिकृता मिश्रमतव्याख्यानवेलायां प्राहुरिति प्रयुक्तम्। ननु कथं मिश्रमतस्य प्रकर्षत्वं निरूपितं शिरोमणिनेत्याकाङ्क्षायां भवानन्दैरुक्तम् – **"प्राहुरिति उपादानपदस्य यथाश्रुतार्थकत्वरक्षणमेव प्रकर्षः।"**[11] इति। जगदीशैरपि निरूपितम् - **"प्राहुरिति। उपादानपदस्य यथाश्रुतार्थरक्षैवात्र प्रकर्षः। इदं चेष्टसाधनतानिश्चयस्य प्रवृत्तिकारणत्वमभ्युपेत्य। वस्तुतश्चार्वाकेण संशयसाधारणज्ञानस्य प्रवर्तकत्वस्वीकारात्तत्र प्रवृत्तिरव्याहतेत्याद्यस्वरसः आहुरित्युक्त्वा सूचितः।"**[12] इति। भवानन्द-जगदीशयोर्मतानुसारं मणिस्थस्य उपादनपदस्य यथाश्रुतार्थत्वमादाय मिश्रैर्व्याख्यानं कृतमित्येव प्रकर्षत्वे हेतुः। एवं प्रकर्षत्वख्यापनहेतुनिर्णये भवानन्द-जगदीशयोर्मतसाम्यं सुलभम्। किन्तु अस्मिन् विषये जगदीशो भवानन्दमपि अतिशेते। तथाहि जगदीशैरत्र न केवलं प्रकर्षहेतुनिर्णयः कृतः, अपि तु किं मतमाश्रित्य यथाश्रुतार्थ आश्रितो मिश्रैरित्यपि निरूपितम्। किञ्च, प्राहुः इत्यत्र प्रेत्युपसर्गप्रयोगाद् यथा

[10] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 604

[11] तत्रैव

[12] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 407

प्रकर्षत्वमस्य मतस्य ख्यापितं दीधितिकृता तथा आहुरिति प्रयोगात् स्वस्यास्वारस्यमपि सूचितं दीधितिकृता इति स्पष्टीकृतं जगदीशैः। अस्मिन् विषये भवानन्दो मौनी एव। तथाहि जगदीशगीः – **"इदं चेष्टसाधनतानिश्चयस्य प्रवृत्तिकारणत्वमभ्युपेत्य। वस्तुतश्चार्वाकेण संशयसाधारणज्ञानस्य प्रवर्तकत्वस्वीकारात्तत्र प्रवृत्तिरव्याहतेत्याद्यस्वरसः आहुरित्युक्त्वा सूचितः।"**[13] इति। अतः अत्र दीधितिपङ्क्तिव्याख्याने भवानन्द-जगदीशयोर्जगदीश एव श्रेष्ठ इति मे मतिः।

अपि च, दीधितिकारेण केषाञ्चित् नयानुसारमन्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्काप्रतिबन्धकत्वेन तर्कघटकत्वं निर्णीय तथा तत्खण्डनं विधाय तत्रास्वारस्यमपि सूचितम्। तथाहि दीधिताकारैरुक्तम् – **"यत्त्वन्वयव्यतिरेकानुविधायित्वज्ञानमेव विशेषदर्शनतया शङ्काप्रतिबन्धकं तदेव तर्कघटकं तदिदमुक्तं यदि गृहीतान्वयव्यतिरेकं हेतुमितीति। तन्न। यादृच्छिकस्य तदनुविधानस्य व्यभिचारित्वान्नियतस्य चोक्ताभेदसम्पादकत्वादिति वदन्ति। तच्चिन्त्यम्।"**[14] इति। किञ्च चिन्ताबीजमत्रेति भवानन्दसिद्धान्तवागीशैर्निरूपितम्। तन्नये चिन्ताबीजं हि कार्यकारणभावग्राहकवैयर्थ्यापत्तिः। तथाहि उक्तम् – **"तच्चिन्त्यमिति, चिन्ताबीजं तु वह्न्यसमवहिताजन्यत्वस्य धुमत्वावच्छेदेन निर्णये धूमो यदि वह्निव्यभिचारी स्याद् वह्न्यसमवहिताजन्यत्वे सति जन्यो न स्यादिति तर्केणैव व्यभिचारशङ्कानिराकरणे कार्यकारणभावग्राहकस्यैव वैयर्थ्यम्।"**[15] इति। तन्नये चिन्ताबीजं हि कार्यकारणभावग्राहकवैयर्थ्यापत्तिः। जगदीशतर्कालङ्कारैरपि

[13] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 407

[14] तत्रैव, पृ 403-404

[15] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 601

अत्र चिन्ताबीजं निरूपितम्। तन्नये – **“लाघवसहकृतेन यादृशान्वयव्यतिरेकज्ञानेन धूमत्वावच्छिन्ने वह्न्यसमवहिताजन्यत्वं ग्राह्यं तादृशेन धूमत्वावच्छेदेन वह्निजन्यत्वग्रहस्यैव प्रथमं सम्भवात्तत्तर्कवैयर्थ्यमित्यस्वरसश्चिन्ताबीजम्।”**[16] इति। जगदीशनये तर्क-वैयर्थ्यापत्तिरूपास्वरसश्चिन्ताबीजम्। तथा च, एकस्या एव दीधितिपङ्क्तेः चिन्ताबीज-निरूपणे मतवैसादृश्यं लक्ष्यते।

किञ्च, हुताशनेत्यादिदीधितिपङ्क्तिप्रयोजननिरूपणावसरे भवानन्द-जगदीश-गदाधराणां भिन्नभिन्नमतपरिष्कारो दृश्यते। यथा भवानन्दनये मणिग्रन्थस्य अर्थान्तर-दोषपरिहारार्थं हुताशनेत्यादिदीधितिग्रन्थः। जगदीशनये तु वह्नौ धूमनिरूपित-कारणत्वसंशयसम्पादनेन तर्कसाफल्यार्थं हुताशनेत्यादिदीधितिग्रन्थः। गदाधरनये तु धूमवह्निव्याप्तिग्रहे मूलतर्के तर्कान्तरापेक्षाप्रदर्शनं च अनुयोगीति मण्युक्तग्रन्थे शङ्कानिराकराणार्थं हुताशनेत्यादिदीधितिग्रन्थः। एवं दीधितस्थाद्यपङ्क्तिग्रथनप्रयोजन-निरूपणावसरे टीकाकाराणां मतवैसादृश्यं सुलभं दृश्यते।

अथ तर्कलक्षणनिरूपणे तद्भेदनिरूपणे च जगदीशो हि भवानन्द-गदाधराभ्यां विशिष्यते। तत्र न भवानन्देन नापि गदाधरेण तर्कलक्षणं निरूपितं न वा तर्कभेदाः निरूपिताः। अतो भवानन्द-गदाधरकृतटीकयोः न्यूनतात्र। सा च न्यूनता जगदीशैः दूरीकृता। अतः टीकात्रयं न मिथः विरोधि किन्तु मिथः परिपूरकमिति नूनं स्वीकार्यम्।

[16] तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 405-406

अत्रेदं वक्तव्यं यज्जगदीशोक्ततर्कलक्षणं न सम्यगिति मे भाति। तथाहि जगदीशैस्तर्कलक्षणं लक्षितम् – **“आपत्तित्वं पुनरत्रेदमापादयामीति प्रतीतिसाक्षिको मानसत्वव्याप्यजातिविशेषः”**[17] इति। अत्रापत्तित्वं नाम तर्कत्वम्। परं तर्कत्वं जातिरेव न भवतीति मे मतिः। तथा च, यद्यपि चाक्षुषत्वादिना साङ्कर्यादूहत्वं तर्कत्वं च न जातिरिति वक्तुं शक्यते ऊहत्वस्य बहिरिन्द्रियनिरपेक्षमनोजन्यतावच्छेदकत्वेन चाक्षुषत्वादिना साङ्कर्यासम्भवात् तथापि सर्वत्र तर्के निर्णयादिभ्यो विषयवैलक्षण्यस्य सिद्धतया विषयवैलक्ष्यमादायैव सर्वत्र तर्के अनुगततर्कपदव्यवहारस्य सिद्धौ तर्कत्वजातिकल्पने प्रमाणाभावः। यदि च विषयवैलक्षण्येन अनुगतव्यवहारोपपत्तौ जातिस्वीकारः नूनं कर्तव्य इति उच्यते तर्हि घटज्ञानत्वादेरपि जातित्वापत्तिर्दुर्वारा। तेन तर्कयामीति आपादयामीति प्रतीतिरसाक्षिणी मानसत्वव्याप्या जातिः (आपत्तित्वं तर्कत्व वा) अप्रसिद्धेति तर्कत्वम् आपत्तित्वं तर्कलक्षणमित्यपि अयुक्तम् इति ब्रुमः।

क्वचिच्च तिसृषु टीकासु गदाधर एव विशेषतया उपयोगी भवति। यथा मण्युक्ततर्कशरीरस्थं प्रत्येकपदं किंप्रयोजनकमिति न भवानन्देन न वा जगदीशेन व्याख्यातं, किन्तु भट्टाचार्यैः सविशदतया इदं व्याख्यातम्। न केवलमेतदेव, तर्कशरीरस्थस्य प्रत्येकपदस्य परिष्कारो विहितो गदाधरैरिति महती न्यूनता दूरीकृता भट्टाचार्यैः इति पञ्चमाध्यायवर्णनावसरे सविशदं दर्शितमिति भट्टाचार्यकृतटीका सर्वाः टीका अतिशेते इति मे मतिरिति शिवम्।

---

[17] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 396

# सहायकग्रन्थग्रामः

अमरसिंहः। *अमरकोषः*। सम्पादकः गुरुनाथ-विद्यानिधि-भट्टाचार्य्यः। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, १४७७-बङ्गाब्दः (पुनर्मुद्रणसंस्करणम्)। मुद्रितम्।

अन्नंभट्टः। *तर्कसंग्रहः* (न्यायबोधिनी-पदकृत्य-दीपिका-किरणावलीसहितः)। सम्पादकः कृष्णवल्लभाचार्यः। वाराणसी : चौखम्बा-विद्याभवनम्, २००७। मुद्रितम्।

______। *तर्कसंग्रहः* (दीपिका-अध्यापनासहितः)। सम्पादकः नारायणचन्द्र-गोस्वामी। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, १४१३वङ्गाब्दः (पुनर्मुद्रणसंस्करणम्)। मुद्रितम्।

______। *तर्कसंग्रहः*। सम्पादकः निरञ्जनस्वरूप-ब्रह्मचारी। कलिकाता : संस्कृत-बुक्-डिपो, २०१३ (पुनर्मुद्रणसंस्करणम्) (प्रथमसंस्करणम् २००५)। मुद्रितम्।

______। *तर्कसंग्रहः* (नवटीकासहितः)। सम्पादकः सात्करिशर्मा वङ्गीयः। वाराणसी : चौखम्बा-संस्कृत-संस्थानम्, २००३ (चतुर्थसंस्करणम्)। मुद्रितम्।

ईश्वरकृष्णः। *सांख्यकारिका*। सम्पादकः दिवाकरानन्दः। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, १३७५-बङ्गाब्दः। मुद्रितम्।

उदयनाचार्यः। *आत्मतत्त्वविवेकः*। सम्पादकः विन्ध्येश्वरी-प्रसाद-द्विवेदी लक्षणशास्त्रि-द्राविडः च। कलिकाता : द्य रयाल एसियाटिक सोसाइटि अफ वेङ्गल, १९३९। मुद्रितम्।

______। सम्पादकः केदारनाथ-त्रिपाठी। वाराणसी : जवाहरनगरम्, १९८३। अमुद्रितम् (pdf)।

______। *आत्मतत्त्वविवेकः* (प्रथमः खण्डः)। सम्पादकः दीननाथत्रिपाठी। कलिकाता : संस्कृत-कलेज्, १९८४ (प्रथमसंस्करणम्)। मुद्रितम्।

______। *आत्मतत्त्वविवेकः* (द्वितीयः खण्डः)। सम्पादकः दीननाथत्रिपाठी। कलिकाता : संस्कृत-कलेज्, १९८९ (प्रथमसंस्करणम्)। मुद्रितम्।

______। *आत्मतत्त्वविवेकः* (तृतीयः खण्डः)। सम्पादकः दीननाथत्रिपाठी। कलिकाता : संस्कृत-कलेज्, १९९० (प्रथमसंस्करणम्)। मुद्रितम्।

______। *किरणावली*। सम्पादकः नरेन्द्रचन्द्रवेदान्ततीर्थः। कलिकाता : दि-कलिकाता-एशियाटिक्-सोसाइटि, २००२ (प्रथमं संस्करणम् १९५६)। मुद्रितम्।

______। *न्यायकुसुमाञ्जलिः*। सम्पादकः पद्मप्रसादोपाध्यायः दुण्डिराजशास्त्री च। वाराणसी : चौखम्बा-संस्कृत-सीरिज्, १९५७। अमुद्रितम् (pdf)।

______। *न्यायकुसुमाञ्जलिः* (व्याख्याचतुष्टयोपेतः)। सम्पादकः धर्मदत्तवच्चा-झाः। वाराणसी : चौखम्बा-संस्कृत-सिरिज्-अफिस्, १९५७ (प्रथमसंस्करणम्)। अमुद्रितम् (pdf)।

______। *न्यायकुसुमाञ्जलिः*। सम्पादकः श्रीमोहन-भट्टाचार्यः। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २०१७ (पुनर्मुद्रणसंस्करणम्) (प्रथमं संस्करणम् १९९५)। मुद्रितम्।

______। *न्यायवार्त्तिकतात्पर्यपरिशुद्धिः*। सम्पादकः विन्ध्येश्वरी-प्रसाद-द्विवेदी लक्षणशास्त्रि-द्राविडः च। कलिकाता : द्य रयाल एसियाटिक सोसाइटि अफ वेङ्गल, १९३९। अमुद्रितम् (pdf)।

उद्द्योतकरः। *न्यायवार्त्तिकम्*। सम्पादकः विन्ध्येश्वरी-प्रसाद-द्विवेदी। वाराणसी : चौखम्बा-संस्कृत-सिरिज्, १९१३। अमुद्रितम् (pdf)।

एन्. एस्. रामानुजताताचार्य्यः। *शाब्दबोधमीमांसा* (द्वितीयो भागः)। पण्डिचेरि : इन्स्टिट्यूट्-फ्रान्सिस्-दे-पण्डिचेरिः, २००९ (प्रथमसंस्करणम्)। मुद्रितम्।

कणादः। *वैशेषिकदर्शनम्* (शङ्करमिश्रकृतोपस्कार-पञ्चाननतर्करत्नभट्टाचार्य्यकृतानुवाद-व्याख्यासहितम्)। सम्पादकः अमित-भट्टाचार्यः। कलिकाता : संस्कृत-बुक्-डिपो, २०१२। मुद्रितम्।

______। *वैशेषिकदर्शनम्*। सम्पादकः प्रद्योतकुमार-मण्डलः। कलिकाता : प्रग्रेसिभ्-पावलिशार्स्, २००४। मुद्रितम्।

______। *वैशेषिकदर्शनम्*। सम्पादकः पञ्चानन-तर्करत्नः। कलिकाता : संस्कृत-बुक्-डिपो, १३१३-वङ्गाब्दः। मुद्रितम्।

कपिलः। *सांख्यदर्शनम्*। सम्पादकः डि. शास्त्री। वाराणसी : चौखम्बा-संस्कृत-प्रतिष्ठानम्, १९८७। अमुद्रितम् (pdf)।

______। *सांख्यसूत्रम्*। सम्पादकः रामशङ्कर-भट्टाचार्यः। वाराणसी : भारतीय-विद्या-प्रकाशनम्, १९६६। अमुद्रितम् (pdf)।

कुमारिलभट्टः। *मीमांसाश्लोकवार्त्तिकम्*। सम्पादकः पार्थसारथि-मिश्रः। वाराणसी : चौखम्बा-संस्कृत-सीरिज्, १९१३। मुद्रितम्।

______। सम्पादकः विजय-शर्मा। वाराणसी : भारतीय-विद्या-भवनम्, २००२। मुद्रितम्।

______। सम्पादकः राम-शास्त्री। वाराणसी : चौखम्बा-संस्कृत-सीरिज्, १९५५। अमुद्रितम् (pdf)।

कुरुगुण्टि-रामशास्त्री। *पञ्चलक्षणीसर्वस्वम्*। सम्पादकः वीरनारायण-पाण्डुरङ्गी। वेङ्गलूरुः : पूर्णप्रज्ञ-संशोधन-मन्दिरम्, २०१० (प्रथमप्रकाशः)। मुद्रितम्।

केशवमिश्रः। *तर्कभाषा*। सम्पादकः गङ्गाधरकरन्यायाचार्यः। कलिकाता : सेन्टर-अव्-आड्वान्स्ड्-स्टाडिज्-इन्-फिलोजफिः, यादवपुर-विश्वविद्यालयः, २००८ (प्रथमप्रकाशः)। मुद्रितम्।

गङ्गेशोपाध्यायः। *अनुमानचिन्तामणिः*। सम्पादकः विश्वबन्धु-भट्टाचार्यः। कलिकाता : यादवपुर-विश्वविद्यालय-प्रकाशनम्, १९९३। मुद्रितम्।

______। *तत्त्वचिन्तामणिः* (ईश्वरानुमानपरः अनुमानखण्डः)। सम्पादकः कामाख्यानाथ-तर्कवागीशः। तत्त्वचिन्तामणौ ईश्वरानुमानम्। कलिकाता : द्य-एसियाटिक्-सोसाइटि, १८९३। मुद्रितम्।

______। *तत्त्वचिन्तामणिः*। सम्पादकः कामाख्यानाथतर्कवागीशः। देहली : मोतिलाल-वनारसीदासः, १८९७ (प्रथमं संस्करणम्)। अमुद्रितम् (pdf)।

______। *तत्त्वचिन्तामणिः* (दीधिति-प्रकाशोपेतः)। सम्पादकः महामहोपाध्यायः कालीपदतर्काचार्यः। कलिकाता : द्य-एशियाटिक्-सोसाइटिः। अमुद्रितम् (pdf)।

______। *तत्त्वचिन्तामणिः* (दीधिति-गादाधरीसहितः)। सम्पादकः कीर्त्यानन्दझाः सात्करिशर्मा च। वाराणसी : चौखम्बा-संस्कृत-सिरिज्-आफिस्, १९७० (द्वितीयं संस्करणम्)। अमुद्रितम् (pdf)।

______। *तत्त्वचिन्तामणिः* (दीधिति-जागदीशीसहितः)। सम्पादकः सोमनाथ-नेने-उपाध्यायः। वाराणसी : चौखम्बा-संस्कृत-वुक्-डिपो, १९०८। अमुद्रितम् (pdf)।

______। *तत्त्वचिन्तामणिः (तर्कप्रकरणम्)* (तर्करहस्य-विवृतिसहितः)। सम्पादकः श्रीवामाचरणभट्टाचार्य्यः। वाराणसी : चौखम्बा-संस्कृत-सिरिज्-आफिस्, १९४४। अमुद्रितम् (pdf)।

______। *तत्त्वचिन्तामणिः* (वङ्गानुवादसहितः)। सम्पादकः ब्रह्मचारी मेधाचैतन्यः। कलिकाता : आद्यापीठम्, १४१७-वङ्गाब्दः। मुद्रितम्।

______। *व्याप्तिपञ्चकम्*। सम्पादकः राजेन्द्रनाथ-घोषः। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, १९८२ (प्रथमप्रकाशः)। मुद्रितम्।

गदाधरभट्टाचार्य्यः। *व्युत्पत्तिवादः* (आदर्शसमेतः) (खण्डद्वयात्मकः)। सम्पादकः हरेराम-त्रिपाठी। नवदेहली : राष्ट्रिय-संस्कृत-संस्थानम्, २०११ (प्रथमसंस्करणम्)। मुद्रितम्।

______। *व्युत्पत्तिवादः* (गूढार्थतत्त्वालोकसहितः)। सम्पादकः धर्मदत्तवच्चा-झाः। वारणसी : चौखम्बा-कृष्णदास-अकादमी, १९७८। अमुद्रितम् (pdf)।

गङ्गोपाध्यायः, मृणालकान्तिः। *भाषापरिच्छेदे सप्त पदार्थ*। कलिकाता : संस्कृत-वुक्-डिपो, १४२१-वङ्गाब्दः (प्रथमसंस्करणम्)। मुद्रितम्।

गौतमः। *न्यायदर्शनम्* (भाष्य-वार्त्तिक-तात्पर्यटीका-वृत्तिसहितम्)। सम्पादकः अमरेन्द्रमोहन-तर्कतीर्थः तारानाथ-तर्कतीर्थः च। नवदेहली : मुन्सिराम-मनोहरलाल-पाब्लिशार्स्, २०१८ (पुनर्मुद्रण-संस्करणम्) (प्रथमं संस्करणम् १९३६)। मुद्रितम्।

______। *न्यायदर्शनम्* (न्यायसूत्रम्, वात्स्यायनभाष्यसहितम्)। सम्पादकः गङ्गानाथ-झाः। काशी : चौखम्बा-संस्कृत-संस्थानम्, १९२५। अमुद्रितम् (pdf)।

______। *न्यायदर्शनम्* (न्यायसूत्र-वात्स्यायनभाष्य-विवृतिसहितम्) (प्रथम-खण्डः)। सम्पादकः फणिभूषण-तर्कवागीशः। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २०११ (द्वितीयसंस्करणम्) (प्रथमं संस्करणम् १९८१)। मुद्रितम्।

______। *न्यायदर्शनम्* (न्यायसूत्र-वात्स्यायनभाष्य-विवृतिसहितम्) (द्वितीय-खण्डः)। सम्पादकः फणिभूषण-तर्कवागीशः। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २०१५ (तृतीयसंस्करणम्) (प्रथमं संस्करणम् १९८२)। मुद्रितम्।

______। *न्यायदर्शनम्* (न्यायसूत्र-वात्स्यायनभाष्य-विवृतिसहितम्) (तृतीय-खण्डः)। सम्पादकः फणिभूषण-तर्कवागीशः। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २००० (द्वितीयसंस्करणम्) (प्रथमं संस्करणम् १९८२)। मुद्रितम्।

______। *न्यायदर्शनम्* (न्यायसूत्र-वात्स्यायनभाष्य-विवृतिसहितम्) (चतुर्थ-खण्डः)। सम्पादकः फणिभूषण-तर्कवागीशः। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २०१५ (द्वितीयसंस्करणम्) (प्रथमं संस्करणम् १९८८)। मुद्रितम्।

______। *न्यायदर्शनम्* (न्यायसूत्र-वात्स्यायनभाष्य-विवृतिसहितम्) (पञ्चम-खण्डः)। सम्पादकः फणिभूषण-तर्कवागीशः। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २०१५ (द्वितीयसंस्करणम्) (प्रथमं संस्करणम् १९८९)। मुद्रितम्।

______। *न्यायसूत्रम्*। सम्पादकः नारायणमिश्रः। वाराणसी : चौखम्बा-संस्कृत-संस्थानम्, १९८३। मुद्रितम्।

घोषालः, चित्तरञ्जनः। *उपनिषद् संग्रहः*। कलिकाता : ग्रन्थिक-संस्करणम्, १३९४। मुद्रितम्।

जगदीशतर्कालंकारः। *तर्कामृतम्* (अनुवादसहितम्)। सम्पादकः राजेन्द्रनाथ-घोषः। कलिकाता : कालिका-प्रेस्, १८४०-वंगाब्दः। मुद्रितम्।

______। *शब्दशक्तिप्रकाशिका*। सम्पादकः ढुण्ढीराजशास्त्री। वाराणसी : चौखम्बा-संस्कृत-भवनम्, २००२ (तृतीयसंस्करणम्)। मुद्रितम्।

जयन्तभट्टः। *न्यायमञ्जरी*। सम्पादकः के. एस्. वरदाचार्यः। महीशूरपुरम् : प्राच्यविद्या-संशोधनालयः, १९८३। मुद्रितम्।

______। सम्पादकः गौरीनाथशास्त्री। वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, १९८४। (शिवकुमारशास्त्रि-ग्रन्थमाला पञ्चमपुष्पम्)। मुद्रितम्।

______। सम्पादकः पञ्चानन-तर्कवागीशः। कलिकाता : कलिकाता-विश्वविद्यालयः, १९३९। मुद्रितम्।

______। सम्पादकः प्रवालकुमार-सेनः। कलिकाता : संस्कृत-वुक्- डिपो, २०१३ (द्वितीयं संस्करणम्) (प्रथमं संस्करणम् २००८)। मुद्रितम्।

झल्किकारः, भीमाचार्य्यः। *न्यायकोषः*। सम्पादकः महामहोपाध्यायः वासुदेव-शास्त्री। पुणा : भाण्डारकर-ओरियेण्टल्-रिसर्च्-इन्स्टिटिउट्, १९२८ (तृतीयसंस्करणम्) (प्रथमं संस्करणम् १८७४)। अमुद्रितम् (pdf)।

तर्कवागीशः, फणीभूषणः। *न्यायपरिचयः*। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २००६ (तृतीयसंस्करणम्) (प्रथमं संस्करणम् १९७८)। मुद्रितम्।

धर्मकीर्तिः। *प्रमाणवार्तिकम्*। सम्पादकः द्वारिकादास-शास्त्री। वाराणसी : चौखम्बा-संस्कृत-संस्थानम्, १९६८। अमुद्रितम् (pdf)।

______। *न्यायविन्दुः*। सम्पादकः सञ्जित्-कुमार-साँधुखाः। कलिकाता : सदेश, २००७ (प्रथमसंस्करणम्)। मुद्रितम्।

धर्मराजाध्वरीन्द्रः। *वेदान्तपरिभाषा*। सम्पादकः पञ्चाननशास्त्रि-भट्टाचार्य्यः। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, १८८३-शकाब्दः। मुद्रितम्।

नारायणभट्टः। *मानमेयोदयः*। सम्पादकः स्वामी योगीन्द्रानन्दः। वाराणसी : चौखम्बा-विद्याभवनम्, २०१७। मुद्रितम्।

______। सम्पादकः दीननाथत्रिपाठी। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, १९९०। मुद्रितम्।

न्यायाचार्य्यः, गङ्गाधर-करः। *नास्तिकदर्शने प्रमाणतत्त्व*। कलिकाता : सेन्टर-अव्-आड्वान्स्ड्-स्टाडिज्-इन्-फिलोजफिः, यादवपुर-विश्वविद्यालयः, २०२१ (प्रथमप्रकाशः)। मुद्रितम्।

पतञ्जलिः। *पातञ्जलदर्शनम्*। सम्पादकः आशुतोष-विद्याभूषण-भट्टाचार्य्यः। कलिकाता : गोवर्धनयन्त्रम्, १९०७। मुद्रितम्।

______। सम्पादकः पूर्णचन्द्रशर्मा। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षद्, २००५ (द्वितीयसंस्करणम्) (प्रथमसंस्करणम् १८९८)। मुद्रितम्।

पतञ्जलिः। *पातञ्जल योगदर्शन*। सम्पादकः स्वामी भर्गानन्दः। कलिकाता : उद्बोधन-कार्यालयः, १४१४-वङ्गाब्दः (चतुर्थप्रकाशः)। मुद्रितम्।

पाणिनिः। *अष्टाध्यायी*। सम्पादकः श्रीब्रह्मदत्त-जिज्ञासुः। हरियाणा : रामलाल-कपूर-ट्रस्ट्-प्रेस्, १९९४ (चतुर्दशसंस्करणम्)। मुद्रितम्।

प्रभाचन्द्रसूरिः। *प्रमेयकमलमार्त्तण्डः*। सम्पादकः पण्डित-महेन्द्रकुमार-शास्त्री। दिल्ली : श्रीसद्गुरुपाव्लिकेशन्स्, १९९० (तृतीयसंस्करणम्) (प्रथमं संस्करणम् १९१२)। अमुद्रितम् (pdf)।

प्रशस्तपादाचार्यः। *प्रशस्तपादभाष्यम् (पदार्थधर्मसंग्रहः)* (खण्डद्वयात्मकम्)। सम्पादकः ब्रह्मचारी मेधाचैतन्यः, कलिकाता : संस्कृत-पुस्तक-भाण्डारः, २०१६ (पुनर्मुद्रणम्)। मुद्रितम्।

______। *प्रशस्तपादभाष्यम् (पदार्थधर्मसंग्रहः)* (श्रीधराचार्यकृतन्यायकन्दलीसहितः)। सम्पादकः विन्ध्येश्वरी-प्रसाद-द्विवेदी। शास्त्री। दिल्ली : श्रीसद्गुरुपाव्लिकेशन्स्, १९८४ (द्वितीयसंस्करणम्) (प्रथमं संस्करणम् १८९५, वाराणसी)। मुद्रितम्।

*पूर्वमीमांसा दर्शन*। सम्पादकः श्रीसुखमय-भट्टाचार्य्यः। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, १९८३। मुद्रितम्।

*बृहदारण्यकोपनिषत्*। सम्पादिका झर्णा-भट्टाचार्य्या। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, १९९९ (द्वितीयसंस्करणम्) (प्रथमं संस्करणम् १९७६)। मुद्रितम्।

भट्टाचार्य्यः, अमितः। *भारतीय दर्शनेर रूपरेखा*। कलिकाता : संस्कृत-वुक्-डिपो, २०१३ (पुनर्मुद्रणसंस्करणम्) (प्रथमसंस्करणम् १९९६)। मुद्रितम्।

भट्टाचार्य्यः, दीनेशचन्द्रः। *वाङ्गालीर सारस्वत अवदान ओ वङ्गे नव्यन्याय चर्चा* (प्रथमः भागः)। कलिकाता : वङ्गीय-साहित्य-परिषत्, १४९४-वङ्गाब्दः (प्रथमसंस्करणम् १३५८)। मुद्रितम्।

भट्टाचार्य्यः, श्रीमोहनः तथा भट्टाचार्य्यः, दीनेशचन्द्रः। *भारतीय दर्शन कोष* (प्रथम-खण्डः)। कलिकाता : संस्कृत-कलेज्, १९५८। मुद्रितम्।

मण्डलः, प्रद्योतकुमारः तथा मण्डलः, केया। *न्यायसम्मत प्रमाणतत्त्वेर रूपरेखा*। कलिकाता : प्रगतिशीलप्रकाशकः, २०१७ (प्रथमसंस्करणम्)। मुद्रितम्।

मधुसूदनसरस्वती। *अद्वैतसिद्धिः*। सम्पादकः अनन्तकृष्ण-शास्त्री। मुम्बई : निर्णय-सागर-प्रेस्, १९३७। अमुद्रितम् (pdf)।

*मनुसंहिता* (सप्तमोऽध्यायः) (राजधर्मप्रकरणम्)। सम्पादकः अशोककुमार-वन्द्योपाध्यायः। कलिकाता : सदेश, २०१३ (प्रथमसंस्करणम्)। मुद्रितम्।

महर्षियाज्ञवल्क्यः। *याज्ञवल्क्यसंहिता* (भाष्यटीकासहिता)। सम्पादकः गुरुप्रसादजी-शास्त्री गिरिजाप्रसादजी-शास्त्री च। लखनऊ : नवल-किशोर-प्रेस्, १९३०। मुद्रितम्।

महापात्रः, ड.विष्णुपदः। *शब्दशक्तिप्रकाशिकासमीक्षणम्* (मूल-जागदीशीसहितम्)। दिल्ली : मान्यताप्रकाशनम्, २०१९ (द्वितीयसंस्करणम्)। मुद्रितम्।

माधवाचार्यः। *सर्वदर्शनसंग्रहः (सर्वदर्शनसंग्रहे बौद्धदर्शन ओ जैनदर्शन)*। सम्पादकः सञ्जित्-कुमार-साँधुखाः। कलिकाता : सदेश, २०११ (प्रथमसंस्करणम् २००५)। मुद्रितम्।

मिश्रः, श्रीनारायणः। *न्यायवैशेषिक दर्शन : एक अध्ययन*। वाराणसी : चौखम्बा-संस्कृत-सिरिज-आफिस्, १९६८ (प्रथमसंस्करणम्)। मुद्रितम्।

मोक्षाकरगुप्तः, जितारिपादः च। *तर्कभाषा ओ वादस्थान*। सम्पादकः एइच्. आर्. रङ्गस्वामी आयेङ्गारः। महीशूरम् : हिन्दुस्थान-प्रेस्, १९५२। अमुद्रितम् (pdf)।

रायः, सुशीलः। *शिक्षातत्त्व ओ शिक्षादर्शन*। कलिकाता : सोमा-वुक्-एजेन्सी, २००४। मुद्रितम्।

वरदराजाचार्यः। *तार्किकरक्षा* (सारसंग्रहटीकासहिता)। सम्पादकः विन्ध्येश्वरी-प्रसाद-द्विवेदी। वाराणसी : पण्डितपत्रिका मेडिकाल्-हाल-प्रेस् च, १९०३। अमुद्रितम् (pdf)।

वाचस्पतिमिश्रः। *न्यायवार्त्तिकतात्पर्यटीका*। सम्पादकः राजेश्वरशास्त्रिद्राविडः। वाराणसी : चौखम्बा-संस्कृत-सिरिज्, १९२६। अमुद्रितम् (pdf)।

______। *सांख्यतत्त्वकौमुदी*। सम्पादकः नारायण-चन्द्र-गोस्वामी। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, १४१८-वङ्गाब्दः (पञ्चमसंस्करणम्) (प्रथमं संस्करणम् १३८९-वङ्गाब्दः)। मुद्रितम्।

विनायकगणेशः आप्टे। *श्रीमद्भगवद्गीता* (आनन्दगिरिकृतटीका-शाङ्करभाष्यसमेता)। पुने : आनन्दाश्रम-मुद्रणालयः, १८५८। मुद्रितम्।

विश्वबन्धुः। *ऋग्वेदः*। होशिआरपुरम् : विश्वेश्वरानन्द-वैदिक-शोधसंस्थानम्, १९६४। मुद्रितम्।

विश्वनाथन्यायपञ्चाननः। *कारिकावली* (सिद्धान्तमुक्तावली-सूर्यनारायणशुक्लकृतमयूख-प्रकाशव्याख्योपेता)। सम्पादकः रामगोविन्द-शुक्लः। वाराणसी : चौखम्बा-संस्कृत-सिरिज्-आफिस, २००८। मुद्रितम्।

______। *कारिकावली* (प्रभा-मञ्जूषा-दिनकरीय-रामरुद्रीय-गङ्गारामीय-सहिता) (खण्डद्वयात्मिका)। सम्पादकः शङ्करराम-शास्त्री। वाराणसी : चौखम्बा-संस्कृत-प्रतिष्ठानम्, २०१० (पुनर्मुद्रणसंस्करणम्)। मुद्रितम्।

______। *भाषापरिच्छेदः*। सम्पादिका अनामिकारायचौधुरी। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, २००४ (प्रथमप्रकाशः)। मुद्रितम्।

विश्वनाथन्यायपञ्चाननः। *भाषापरिच्छेदः* (न्यायसिद्धान्तमुक्तावली-मुक्तावलीसंग्रह-सहितः)। सम्पादकः पञ्चाननभट्टाचार्य्य-शास्त्री। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, १३७७-वङ्गाब्दः (प्रथमसंस्करणम्)। मुद्रितम्।

विश्वनाथन्यायपञ्चाननः। *भाषापरिच्छेदः*। सम्पादकः हरिराम-शुक्लः। वेनारस : चौखम्बा-प्रकाशनम्, २०१८ (प्रथमसंस्करणम्)। मुद्रितम्।

______। *न्यायसूत्रवृत्तिः*। सम्पादकः शेखसाविर-आलिः। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, २०१५ (प्रथमप्रकाशः)। मुद्रितम्।

वेदव्यासः। *ब्रह्मसूत्रम्* (ब्रह्मसूत्रशाङ्करभाष्य-रत्नप्रभाभाषानुवादसहितम्)। सम्पादकः चण्डीप्रसाद-शुक्लः कृष्णपन्त-शास्त्री च। काशी : अच्युतग्रन्थमालाकार्यालयः, १९९३। मुद्रितम्।

शालिकानाथमिश्रः। *प्रकरणपञ्चिका*। सम्पादकः सुब्रह्मण्य-शास्त्री। वाराणसी : वेनारस-हिन्दु-विश्वविद्यालयः, १९६१। अमुद्रितम् (pdf)।

शङ्करमिश्रः। *वैशेषिकसूत्रोपस्कारः* (परिष्कार-प्रकाशसमेतः)। सम्पादकः शेख-साविर-आलिः। कलिकाता : संस्कृत-वुक्-डिपो, २०१३ (प्रथमप्रकाशः)। मुद्रितम्।

______। *वैशेषिकसूत्रोपस्कारः* (प्रकाशिकाख्यहिन्दीटीकासहितः ढुण्ढीराजशास्त्रिकृत-व्याख्यासहितः)। सम्पादकः नारायणमिश्रः। वाराणसी : चौखम्बा-संस्कृत-सीरिज्-आफिस्, १९६९। (काशी-संस्कृत-ग्रन्थमाला १९५)। अमुद्रितम् (pdf)।

शिवादित्यमिश्रः। *सप्तपदार्थी*। (माधवाचार्यकृतमितभाषिणी-शेषानन्तकृतपदार्थ-चन्द्रिका-वलभद्रकृतसन्दर्भ-जिनवर्द्धनकृतजिनवर्द्धनीसहितः)। सम्पादकः तपनशङ्कर-भट्टाचार्य्यः। कलिकाता : संस्कृत-वुक्-डिपो, २०१२ (प्रथमसंस्करणम्)। मुद्रितम्।

श्रीहर्षः। *खण्डनखण्डखाद्यम्*। सम्पादकः हनुमानदासजी-षड्शास्त्री। वाराणसी : चौखम्बा-संस्कृत-सीरिज्, १९७०। अमुद्रितम् (pdf)।

सदानन्दयोगीन्द्रः। *वेदान्तसारः*। सम्पादकः विपद्भञ्जनपालः। कलिकाता : संस्कृत-पुस्तक-भाण्डारः, १४१७ (वङ्गाब्दः) (प्रथमं संस्करणम् १९८२)। मुद्रितम्।

*सायणमाधवीयसर्वदर्शनसंग्रहः* (प्रथमखण्डः)। सम्पादकः सत्यज्योति-चक्रवर्त्ती। कलिकाता : साहित्यश्री, १४२१-वङ्गाब्दः (चतुर्थसंस्करणम्) (प्रथमसंस्करणम् १३८३-वङ्गाब्दः)। मुद्रितम्।

*सायणमाधवीयसर्वदर्शनसंग्रहः* (द्वितीयखण्डः)। सम्पादकः सत्यज्योति-चक्रवर्त्ती। कलिकाता : साहित्यश्री, २०२०(चतुर्थसंस्करणम्)। मुद्रितम्।

हेमचन्द्रः। *प्रमाणमीमांसा*। सम्पादकः पण्डित-सुखलालजी-सङ्घ्वी, पण्डित-महेन्द्रकुमार-न्यायशास्त्री, पण्डित-दलसुख-मालवनिया-न्यायतीर्थः च। आहमेदावादः : सरस्वती-पुस्तक-भाण्डारः, १९८९ (द्वितीयसंस्करणम्)। मुद्रितम्।

Apte, Vaman Shivrama. The Student's Sanskrit-English Dictionary. New Delhi : Rastriya Sanskrit Sansthan, 2010.

Bhasarvjna. The Nyayasara. Ed. K. Sambasiva Shastri, Trivandrum : Rajakiya Mudranalay, 1931.

Bhattacharya, Gopikamohan. Studies in Nyaya-Vaisesika Theism. Calcutta : Sanskrit College, 1961.

Chatterjee, Satishchandra & Datta, Dhirendramohan. An Introduction to Indian philosophy. Calcutta : University of Calcutta, Seventh Edition, 1968.

Dasgupta, S.N. A History of Indian Philosophy (vol.1). Delhi : Motilal Banarasidass, 1988.

Guha, D. C. Navya Nyaya System of Logic. Delhi : Motilal Banarasidass, 1979.

Hiriyanna, M. Outline of Indian Philosophy. Delhi : Motilal Banarasidass, 2009 (rpt.) (1993 1st Ed.).

Maxmuller, Fredrich. The Six Systems of Indian Philosophy. New York : Longmans Green and Co. 1889. Pdf.

Mukhopadhyaya, Govindagopal. A new Trilingual Dictionary. Calcutta : Sanskrit Book Depot, 2011.

NarayanaBatta, Manameyodaya. Ed. C. Kunhan Raja & S. S. Suryanarayana Shastri. Madras : Theosophical Publishing House, 1933.

Potter, Karl H., Encyclopaedia of Indian Philosophy (Vol I-II), Delhi: Motilal Banarasidass, 1977.

S. Kuppuswami Shastri, A Primer of Indian Logic, U.S.A: Franklin Classics Trade Press, 2018.

Vidyabhushana, Satishchandra, A History of Indian Logic, Delhi: Motilal Banarasidass, 1988.

**********